हैमकाव्यानुशासनम्	(K·M·S·)	है·काव्यानु· ।
हैमव्याकरणम् ।	———	है·व्या· ।

उपाध्यायनिरपेक्षा	on	का·नी·सा· । (A manuscript)	उ·नि· ।
घण्टापथः	on	किरा· ।	घं·प· ।
चन्द्रिका	on	प्र·चं· ।	चन्द्रि· ।
तत्त्वबोधिनी	on	पा·व्या· ।	त·बो· ।
पदचन्द्रिका	on	द·कु·च· ।	प·चं· ।
पीयूषधारा	on	मु·चिं· ।	पी·धा· ।
भूषणा	on	द·कु·च· ।	भूष· ।
मिताक्षरा	on	या·स्मृ· ।	मिता· ।
रामसेतुप्रदीपः	on	से·बं· ।	रा·से·प्र· ।
लघुदीपिका	on	द·कु·च· ।	ल·दी· ।
व्याख्यासुधा	on	अ·को· ।	व्या·सु· ।
सर्वंकषा	on	शि·व· ।	स·क· ।
संकेतः	on	ह·च· ।	ह·च·सं· ।

Arjunavarman	on	अमरु· ।	Chaturakallinâtha	on	सं·र· ।
Bhaṭṭa Utpala	on	बृ·सं· ।	Dhanika	on	द·रू· ।
Bhâṇḍârkar	on	मा·मा· ।	Ḍhuṇḍhirâja	on	मु·रा· ।

A·S·S·=Abhidhânasaṃgraha Series. B·S·S·=Bombay Sanskrit Series. K·M·S·=Kâvyamâlâ Series. N·S· Nirnay Sâgar Press Publications.

चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः।
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥ ३ ॥

तद्यावदिदानीं गृहजनेन सह संगीतकमनुतिष्ठामि। परिक्रम्यावलोक्य च। अये किमस्मद्गृहे महोत्सव इवाद्य स्वस्वकर्मण्यधिकतरमभियुक्तः परिजनः। तथा हि

वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथते स्रजो विचित्राः।
मुसलमिदमियं च पातकाले मुहुरनुयाति कलेन हुंकृतेन ॥ ४ ॥

भवतु। कुटुम्बिनीमाहूय पृच्छामि। नेपथ्याभिमुखमवलोक्य।

गुणवत्युपायनिलये स्थितिहेतो साधिके त्रिवर्गस्य।
मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि ॥ ५ ॥

३ नटि०। प्रविश्य। अज्ज इअह्मि। अण्णाणिओएण मं अणुगेण्हदु अज्जो।

---

३. आर्य इयमस्मि। आज्ञानियोगेन मामनुगृह्णात्वार्यः।

सुक्षेत्र A·M·R·K·J·F·S·. शालिस्तम्ब M·. अवे(sic·अपे)क्षते E·. गृहं गत्वा गृहिणीमाहूय added before गृहजनेन A·K·J·F·B·E·N·. इमे नो गृहाः। तद्यावत् प्रविशामि। नाट्येन प्रविश्यावलोक्य च। added before अये in all but M·S·. तत् and इदम् added before and after किम् in all but F· and R· respectively. गृहेषु in all but S·. इव omitted K·. अद्य omitted and दृश्यते added after इव in all but P·. यतः for स्वस्व J·; one स्व- omitted F·S·. उद्ग्रथति F·. मुसलमियमियं M·R·. निपात for च पात S·. तावत् added before आहूय M·R·K·. स्थितिहेतोः in all but S·B·E. साधके M·F·. कार्याचार्ये A·M·R·K·J·F·. उपैहि P·M·K·F·B·E·.   ३. अज्जउत्त for अज्ज S·B·E·. आगा E·. अणुगेण्हदु P·M·R·, अणुगिण्हदु S·E·N. अज्जउत्तो for अज्जो S·E·.

४ सूत्र० । आर्ये तिष्ठतु तावदाज्ञानियोगः । कथय किमद्य भगवतां ब्राह्मणानामुपनिमन्त्रणेन कुटुम्बकमनुगृहीतमभिमता वा भवनमतिथयः प्राप्ता यत एष पाकविशेषारम्भः ।

५ नटी० । अज्ज उवणिमन्तिदा मए भअवन्तो वह्मणा ।

६ सूत्र० । अथ कस्मिन् निमित्ते ।

७ नटी० । उवरज्जदि किल भअवं चन्दो त्ति ।

८ सूत्र० । अये क एवमाह ।

९ नटी० । एवं खु णअरवासी जणो मन्तेदि ।

१० सूत्र० । आर्ये कृतश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे । तत् प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः । चन्द्रोपरागं प्रति तु त्वं केनापि विप्रलब्धासि । पश्य ।

---

५. आर्य उपनिमन्त्रिता मया भगवन्तो ब्राह्मणाः । ७ उपरज्यते किल भगवांश्चन्द्र इति । ९ एवं खलु नगरवासी जनो मन्त्रयते ।

---

४ आर्ये omitted M·R·F· . तावत् omitted F· . कथयतु A·J· . भवत्या added after अद्य in all but M·R· . तत्रभवतां for भगवतां A· P·K·J·F· . आमन्त्रणेन M·R· . एतत् added before कुटुम्बकम् B· . अथ वा अभिमता for अभिमता वा S·B·E· . संप्राप्ता A·P·K·J·F·N· . यत एवैष K· , यदेष M·F·B·E· . ५ अज्जउत्त for अज्ज S·E· . आमन्तिदा in all but P· . ६, कथय for अथ R·S·B·E·N·G·, आर्ये कथय A·M·K·J·F· . ७ अज्ज added before उवरुज्जदि P· . ८ अये omitted M·R·S·B· ; आर्ये for अये A·P·K·J·E·N· . ९ एव्वं K· . क/खु B· . णअरवासिजणो K· . १० परिश्रमो A·J·K·F· . चतुःषष्ट्यङ्गे/ग omitted M·R· . तत् omitted F· . प्रवर्ततां A·P·K· . भगवतो omitted P· . त्वं तु F· ; तु omitted S·N· ; त्वं तु omitted E· . पश्य पश्य R· .

क्रूरग्रहः सकेतुश्चन्द्रं संपूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलाद्

११ (नेपथ्ये)। आः क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति।

१२ सूत्र०। रक्षत्येनं तु बुधयोगः॥ ६॥

१३ नटी०। अज्ज को उण एसो धरणीगोअरो भविअ चन्दं गहाभिओआदो रक्खिदुं इच्छदि।

१४ सूत्र०। आर्ये यत्सत्यं मया नोपलक्षितः। भवतु। भूयोऽभियुक्तः स्वरव्यक्तिमुपलप्स्ये। क्रूरग्रह इत्यादि पुनः पठति।

१५ (पुनर्नेपथ्ये)। आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति।

---

१३ आर्य कः पुनरेष धरणीगोचरो भूत्वा चन्द्रं ग्रहाभियोगाद्रक्षितुमिच्छति।

चन्द्रमसंपूर्ण in all but P·E·. ११ इत्यर्धोक्ते added before नेपथ्ये B·P·; आः omitted S·; बलात् added after इच्छति B·N·; चन्द्र...मिच्छति omitted A·M·R·K·J·F·S·E·. १२ रक्षत्वेनं K·. १३ अज्ज omitted R·; अज्जउत्त अध for it E·, अज्ज अध N·, अध S·. उणो for उण M·; उण omitted S·P·. एसो omitted A·N·J·. धरणि M·R·B·E·. हविअ M·. गहाहिहवादो S·; केतुगहाभिओगादो M·. अहिरक्खिदुं N·. १४ आर्ये omitted P·. मयापि in all but A·J·. लक्षित for लक्षितः M·F·. यतः for भवतु E·, अतः N·. मन् added before स्वर A·M·K·J·F·. लक्ष्ये for लप्स्ये K·. १५ पुनः omitted in all but P·F·E·. आः omitted A·M·J·; कथय for आः S·, आः कथय K·E·. बलात् and ग्रहाभियोगतः respectively added after इच्छति in B·. and E·.

१६ सूत्र० । आर्ये ज्ञातम् ।

कौटिल्यः

नटी भयं नाटयति ।

१७ सूत्र० । कुटिलमतिः स एष येन

क्रोधाग्नौ प्रसभमदाहि नन्दवंशः ।

चन्द्रस्य ग्रहणमिति श्रुतेः सनाम्नो

मौर्येन्दोर्द्विषदभियोग इत्युपैति ॥ ७ ॥

तदित आवां गच्छावः ।

निष्क्रान्तौ ।

प्रस्तावना ।

ततः प्रविशति सकोपश्चाणक्यः ।

१८ चाण० । आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति ।

---

१६ आकर्ण्य added after सूत्र० in all but M·R· . आः for आर्ये B· E· . कौटिल्यः खल्वयम् E· . After नटी भयं नाटयति । is added को एसो कोडिल्लो । in F· and कोऽसौ कौटिल्यः । in E· . १७ कौटिल्यः added before कुटिल in all but B· . इत्यवैति in all but· B· . नटी भयं नाटयति । repeated after उपैति P· . तन्न युक्तं कुपितस्य पुरतः स्थातुम् । added before तद् in E· . १७–१८ मुक्तां शिखां परामृशन् added after प्रविशति P·B·E·N· , मुक्तां शिखां परिमृशन् A·M·R·K·J· , मुक्तां शिखां प्रमृशन् F· , मुक्तशिखां परामृशन् S· . सक्रोधः for सकोपः A·K·J·S· ; सकोपः omitted P·B· . १८ कथय for आः F·S·B· , कथय कथय N· , आः कथयः P·K·E·; आः omitted M·R· . बलात् and पश्य added after इच्छति in B. and A·P·M·R·K·J·F·S·E·N· . respectively. The stanza आस्वादित० (vide मु.रा. ।१। १३५।) with अपि च following it is added after इच्छति । in all but S·E· .

नन्दकुलकालभुजगीं कोपानलनीलधूमलताम् ।
अद्यापि बध्यमानां वध्यः को नेच्छति शिखां मे ॥ ८ ॥

अपि च

उल्लङ्घयन् मम समुज्ज्वलतः प्रतापं
कोपस्य नन्दकुलकाननधूमकेतोः ।
सद्यः परात्मपरिमाणविवेकमूढः
कः शालभेन विधिना लभतां विनाशम् ॥ ९ ॥

शार्ङ्गरव शार्ङ्गरव ।

१९ शिष्य० । प्रविश्य । उपाध्याय आज्ञापय ।

२० चाण० । वत्स उपवेष्टुमिच्छामि ।

२१ शिष्य० । उपाध्याय नन्वियं संनिहितवेत्रासनैव द्वारप्रकोष्ठशाला । तदस्यामुपवेष्टुमर्हत्युपाध्यायः ।

२२ चाण० । वत्स कार्याभियोग एवास्मानाकुलयति न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता । नाट्येनोपविश्यात्मगतम् । कथं प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पितृवधामर्षितेन सकलनन्द-

बहुल and बहल added before नील in A·M·K·J·E· and R·S·B·E·N· respectively. लोल for नील B· . अद्याप्य(sic. अद्याव)-बध्यमानां F· . नाम added after को M·R· . किं च for अपि च A·M·R·K·J·F·N· . उल्लासयन् R· . परिणाम R·K·B·N· . शार्ङ्गरव once in P·M·R·K·N· . २१ उपाध्याय omitted P· . सदा added before संनिहित P·R·K·J·F· . तस्यां for तदस्यां K· . २२ भिनियोग for भियोग M·R·K·F· . एवम् for एव P·M·R·K· . आकुल for व्याकुल P·S·B·E·N· . शिष्यजनदुःशीलता M·R·S· . प्रकाशितां for प्रकाशतां गतो F· . रोषामर्षो M·R· . नन्दकुलराज्य P· .

राज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय तदुपगृहीतेन महता म्लेच्छराजबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति । विचिन्त्य । अथ वा येन मया सर्वलोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा प्रतिज्ञासरित् सोऽहमिदानीं प्रकाशीभवन्तमप्येनमर्थं समर्थः शमयितुम्—कुतः— यस्य मम

श्यामीकृत्याननेन्दूनरियुवतिदिशां संततैः शोकधूमैः
कामं मन्त्रिद्रुमेभ्यो नयपवनहृतं मोहभस्म प्रकीर्य ।
दग्ध्वा संभ्रान्तपौरद्विजगणरहितान् नन्दवंशप्ररोहान्
दाह्याभावान्न खेदाज्ज्वलन इव वने शाम्यति क्रोधवह्निः ॥१०॥

अपि च

शोचन्तोऽवनतैर्नराधिपभयाद् धिक्शब्दगर्भैर्मुखै-
र्मामग्रासनतोऽवकृष्टमवशं ये दृष्टवन्तः पुरा ।
ते पश्यन्ति तथैव संप्रति जना नन्दं मया सान्वयं
सिंहेनेव गजेन्द्रमद्रिशिखरात् सिंहासनात् पातितम् ॥११॥

सोऽहमिदानीमवसितप्रतिज्ञाभरोऽपि वृषलापेक्षया शस्त्रं धारयामि येन मया

समुत्खाता नन्दा नव हृदयशल्या इव भुवः
कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा ।

परिपणप्रोत्सा० P.S.E. . सह omitted M.R.F. . संधाय omitted F.. च added before महता in all but R.F.E. . म्लेच्छबलेन M.R.S. . इदानीम् omitted S. . एतम् K.F. . न समर्थः किम् for समर्थः J.S. E. , किमसमर्थः P. , असमर्थः किम् B. . एतत् added after कुतः S.B. E. N.. रिपु for अरि K.B.E.N. . हरिणदृशां for युवतिदिशां F. . भिया for भयाद् P. . अग्र्यासनतो B. . अपकृष्टम् F.S. . पश्यन्तु R.S.B.E.N. . हृदयरोगा A.M.R.K.J.F.S.B.E.N.. विसिनी for

द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा
फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥ १२ ॥

अथ वा अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य किं वा स्थैर्यमुत्पादितं चन्द्रगुप्तलक्ष्म्याः । विचिन्त्य । अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः । स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे वृषलस्य साचिव्यं ग्राहयितुं न शक्यते नन्दवंशोद्यमं प्रति निरुद्योगोऽवस्थापयितुम् । अस्माभिरनया बुद्ध्या तपोवनगतोऽपि घातितस्तपस्वी नन्दवंशीयः सर्वार्थसिद्धिः । यावदसौ मलयकेतुमङ्गीकृत्यास्मदुच्छेदाय विपुलतरं प्रयत्नमुपदर्शयत्येव । प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा । साधु अमात्यराक्षस साधु मन्त्रिबृहस्पते साधु । कुतः ।

ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्यधुरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः ॥ १३ ॥

अत एवास्माकं त्वत्संग्रहणे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति । कुतः ।

नलिनीं P. विचिन्त्य omitted R. नन्दान्ववायावयवे F. अतः added after शक्यते P·B·E. तदभियोगं for नन्दवंशोद्यमं in all but K. प्रति तु M·R·F. निरुद्योगः स्थापयितुमिति S, निरुद्योगः शक्योऽवस्थापयितुम् A·M·R·K·J·N, निरुद्योगः शक्य उपस्थापयितुम् F, निरुद्योगैरवस्थातुं न युक्तमिति P. with which B·E· on the whole agree. एव omitted E. उरीकृत्य for अङ्गीकृत्य M·R·, उररीकृत्य P. यत्नं S, प्रपञ्चं P·E·N. साधु श्रोत्रिय added before मन्त्रि R, अमात्यश्रोत्रिय साधु F, साधु श्रोत्रिय P·K, साधु श्रोत्रिय साधु A·M·J, मन्त्रिश्रोत्रिय साधु S, साधु मन्त्रिश्रोत्रिय साधु साधु N. भर्तुर्यत् M·R. कार्यधुरं P·K·J·S·E·N. वहवः for कृतिनः A·M·R·K·J·F·N. संग्रहणे P·N. प्रयत्नः P·B. अस्य for असौ M. ग्रहणे E. सानुरागः R·N. इति omitted P.

अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात्फलम्।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥ १४ ॥

तन्मयाप्यस्मिन् वस्तुनि नशयानेन स्थीयते । यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः । कथमिव । अत्र तावद् वृषलपर्वतकयोरन्यतरविनाशेनापि चाणक्यस्यापकृतं भवतीति विषकन्यया राक्षसेनास्माकमत्यन्तोपकारि मित्रं घातितस्तपस्वी पर्वतेश्वर इति संचारितो जनापवादः । लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तये पिता ते चाणक्येन घातित इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः । शक्यं खल्वेष राक्षसमतिपरिगृहीतोऽप्युत्तिष्ठमानः प्रज्ञया निवारयितुं न पुनरस्य निग्रहात् पर्वतकवधोत्पन्नमयशः प्रकाशीभवत् प्रमार्ष्टुमिति । प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासया बहुविधदेशभाषाचारसंचारवेदिनो नानाव्यञ्जनाः प्रणिधयः । अन्विष्यन्ते च कुसुमपुरवासिनां

अज्ञानेन P. सानुरागेण for भक्तियुक्तेन in all but E. अति(sic. अ)शयानेन S. अवस्थीयते M.R.K.F. तत्संग्रहणं प्रति P., तद्ग्रहणे N. कथमिति P. S. B.E.N. तत्र P. विनाशेऽपि A.M.R.F. कन्यकया F. E.N. अत्यन्तोपकारी M.R.F.B.N. पर्वतक in all but B.P. जगति जनापवादः P.R.K.J.F.S.B.E.N., जगतां जनापवादः M. अस्य चार्थस्यैवाभि E., अस्यैवार्थस्यानभि M.R. शक्यः for शक्यम् in all. व्युत्तिष्ठमानः for उत्तिष्ठमानः in all but R. बुद्ध्या B. निग्रहातुम् A.P.M.R.K.J.F. राक्षसस्य added after वधोत्पन्नम् A.M.R.K.J.F. अपयशः M.R. प्रमार्ष्टुमलमिति B., प्रमार्ष्टुमिच्छामि A.P.M.R.K.J.F.N. नियुक्ताश्च B., सुनियुक्ताश्च S.E.N. मया put before पक्ष B. वेष added after देश in all but B. R. वेश added after भाषा B. अन्विष्यन्ते S.B.E.N. निवासिनां

नन्दामात्यसुहृदां निपुणं प्रचारगतम् । तत् तत् कारणमुत्पाद्य कृतकृत्यतामापादिताश्चन्द्रगुप्तसहोत्थायिनो भद्रभटप्रभृतयः प्रधानपुरुषाः । शत्रुप्रयुक्तानां च तीक्ष्णरसदायिनां प्रतिविधानं प्रत्यप्रमादिनः परीक्षितभक्तयः क्षितिपतिप्रत्यासन्ना निरूपिताप्तपुरुषाः । अस्ति चास्माकं सहाध्यायि मित्रमिन्दुशर्मा नाम ब्राह्मणः । स चौशनस्यां दण्डनीत्यां चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः । स मया क्षपणकलिङ्गधारी नन्दवंशवधप्रतिज्ञानन्तरमेव कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितः । विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः । तेनेदानीं महत् प्रयोजनमनुष्ठेयं भविष्यति । तदेवमस्मत्तो न किंचित् परिहीयते । वृषल एव केवलं प्रधानप्रकृतिरस्मास्वारोपितराज्यतन्त्रभारः सततमुदास्ते । अथ वा यत्स्वयमभियोगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति । कुतः ।

स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः ।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥ १५ ॥

ततः प्रविशति यमपटेन चरः ।

नन्दा M·B·E· , वाशिनन्दा S·. हृदयम् added after निपुणं F·. निपुणतरं B· . प्रचारगतयः S·B·E·N· , विचारितम् F· . आपाद्य P·F·. कृत…पुरुषाः omitted S· ; नतकृत्यतायां(sic· तत्तत्कृत्यता)म् P· , कृतकृत्यताम् A· M·R·K·J·F·B·E·N· . च before तीक्ष्ण omitted S· . प्रतिविधानं omitted R· . आप्त omitted S· . नियुक्ताः S·B·N· . सहा- [illegible] F·E· . बिन्दुशर्मा B· . औशनस्यदण्ड B·E· . च added before मया S·B·E· . नन्दवध B· . सर्वामात्यैः A·P· . राक्षसे समुत्पन्नः R· . महदत्र R· , बहु S· . भवति F· . एव for एवम् E·. किंचिदपि M·R· . परिहास्यते in all but P· प्रकृतिष्वारोपितम् M· , प्रकृतिष्वस्मास्वारोपित A·P·R·K· J·F·S· . यत् omitted P· . दुःखितः S·.

२३ चरः। पणमह जमस्स चलणे किं कज्जं देवएहिं अण्णेहिं।
एसो खु अण्णभत्ताण हरदि जीअं तडफडन्तम् ॥ १६ ॥

अवि अ

पुरिसस्स जीविदव्वं विसमादो होदि भत्तिगहिआदो।
मारेदि सव्वलोअं जो तेण जमेण जीआमो ॥ १७ ॥

जाव एदं गेहं पविसिअ जमपडं दंसअन्तो गीआइं गाआमि।

इति परिक्रामति।

२४ शिष्यो विलोक्य। भद्र न प्रवेष्टव्यम्।

२५ चरः। हंहो बह्मण कस्स एदं गेहं।

२६ शिष्यः। अस्माकमुपाध्यायस्य सुगृहीतनाम्न आर्यचाणक्यस्य।

२७ चरो विहस्य। हंहो बह्मण अत्तकेरअस्स य्येव मह धम्मभादुणो

२३ प्रणमत यमस्य चरणौ किं कार्यं देवकैरन्यैः। एष खल्वन्यभक्तानां हरति जीवं परिस्फुरन्तम् ॥ अपि च पुरुषस्य जीवितव्यं विषमाद् भवति भक्तिगृहीतात्। मारयति सर्वलोकं यस्तेन यमेन जीवामः ॥ यावदेतद् गेहं प्रविश्य यमपटं दर्शयन् गीतानि गायामि। २५ हंहो ब्राह्मण कस्यैतद् गेहम्। २७ हंहो ब्राह्मण आत्मीयस्यैव मम धर्मभ्रातुर्गृहं भवति। तस्माद्देहि मे प्रवेशं यावत्ते

२३ सह added before यम B. २३ चलणं A.N.. देवआहिं अण्णाइ F.. कु/खु B.E.. थडफडन्तं B., चडफडन्तं A.P.R.K.J.F., पडपडन्ताणं S., धनफडन्तं E., धणफडन्तं N.. विसमा अवि E., विसमादो वि A.P., विसमाउ वि K.. वअं for जमेण S.. ता for जाव B.. गाइस्सं S.. २४ भद्र twice E.. २५ अह्मो for हंहो throughout the scene R.. बह्मणा K.B.E.N.. २६ सुगृ...... आर्य omitted F.. नामधेयस्य for नाम्नः M.R.. २७ अत्तजस्स A., अत्तणो केरअस्स R.B.E.N.. मम for मह A.P.K.F., एदं B..

घरं होमि। ता देहि मे पवेसं जाव दे उवज्झाअस्स जमपडं पसारिअ धम्मं उवदिसामि।

२८ शिष्यः सक्रोधम्। धिङ् मूर्ख किं भवानस्मदुपाध्यायादपि धर्मवित्तरः।

२९ चरः। हंहो बह्मण मा कुप्प। ण हि सव्वो सव्वं जाणादि। ता किंवि दे उवज्झाओ जाणादि किंवि अह्मारिसा जाणन्दि।

३० शिष्यः। मूर्ख सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्छसि।

३१ चरः। हंहो बह्मण जइ तुह उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चन्दो अणभिप्पेदो त्ति।

३२ शिष्यः। मूर्ख किमनेन ज्ञातेन।

३३ चरः। हंहो बह्मण तुह उवज्झाओ ज्जेव जाणिस्सदि जं इमिणा जाणिदेण होदि। तुमं दाव एत्तिअं जाणासि कमलाणं चन्दो

उपाध्यायाय यमपटं प्रसार्य धर्ममुपदिशामि। २९ हंहो ब्राह्मण मा कुप्य। न हि सर्वः सर्वं जानाति। तत् किमपि ते उपाध्यायो जानाति किमप्यस्मादृशा जानन्ति। ३१ हंहो ब्राह्मण यदि तवोपाध्यायः सर्वं जानाति तदा जानातु तावत् कस्य चन्द्रोऽनभिप्रेत इति। ३३ हंहो ब्राह्मण तवोपाध्याय एव ज्ञास्यति यदनेन ज्ञातेन भवति। त्वं तावदेतावज्जानासि कमलानां चन्द्रोऽ-

---

देहि मे पवेसं omitted M·R·K·. जम... रिअ omitted B·N·. २८ अपि omitted S·. २९ ण कु/नु S·B·. अह्मसरिसा A·, अह्मारिसा वि S·. ३० सक्रोधम् added after शिष्यः A·S·B·E·. धिङ् added before मूर्ख S·. ३१ हंहो omitted A·. ता omitted B·E·. अणभिमदो B·, अणभिक्खदो M. ३२ मूर्ख omitted A·P·. गुरोः added after मूर्ख in S·E·. भवति added after ज्ञातेन S·. गुरोर्भविष्यति B·, अज्ञातेन वा A·P·M·K·J· F·, वाज्ञातेन वा. R·, अज्ञातेन वा गुरोर्भविष्यति N·. ३३ हंहो बह्मण omitted in all but S·B·E·. होदि त्ति R·. उज्जुबुद्धिआ added before तुमं B·. जाणेसि E·. अणभिमदो B·N·.

अणभिप्पेदो त्ति। णं पेक्ख।

कमलाण मणहराण वि रूवाहिन्तो विसंवददि सीलं।
संपुण्णमण्डलम्मि वि जाइं चन्दे विरुद्धाइं ॥ १८ ॥

३४ चाण० आकर्ण्यात्मगतम्। अये चन्द्रगुप्तादपरक्तान् पुरुषान् जानामीत्युपक्षिप्तमनेन।

३५ शिष्यः। मूर्ख किमिदमसंबद्धमभिधीयते।

३६ चरः। हंहो बह्मण सुसंबद्धं य्येव एदं भवे जदि सुणित्तारं जाणित्तारं अ लहे।

३७ चाण०। भद्र विश्रब्धं प्रविश। लप्स्यसे श्रोतारं ज्ञातारं च।

३८ चरः। एसो पविसामि। प्रविश्योपसृत्य च। जेदु अज्जो।

नभिप्रेत इति। ननु प्रेक्षस्व। कमलानां मनोहराणामपि रूपाद्विसंवदति शीलम्। संपूर्णमण्डलेऽपि यानि चन्द्रे विरुद्धानि ॥

३६ हंहो ब्राह्मण सुसंबद्धमेवैतद् भवेद्यदि श्रोतारं ज्ञातारं च लभे। ३८ एष

मणोहराणं B·R·,मणुहराणं S·. रुवाहिन्दो S·,रुअ(sic·रूआ)हिन्तो A·K·J·N·, रूअदो P·, रूआदो B·, रूपआहितो(sic·आहिन्तो) R·, रूआदा-अ(sic·आ)हिन्तोM· . शीलं in all but P·. मण्डले R· . वि omitted P·B· . ३४ अये omitted S· . . ३५ मूर्ख omitted M·R·K·F· . एवमभिधीयते B· , अनुमीयते (?) F· . ३६ स omitted F· . एदं omitted S· . शिष्यः। यदि किं स्यात् ॥ चरः। जदि for जदि in all but M·R·F· . सुणन्तं B·N·F· , सुणदुं (sic· सुणिदुं) M· , सुणिदुं A·P·R·K·J·S· . जाणन्तं J·S·B·N· , जाणदं (sic·जाणन्दं) M· , जाणिदुं A·P· , जाणअन्तं (sic·जाणन्तं) K· , जाणिअन्तं(sic·जाणन्तं)R· . अ omitted in all but B· . जणं added before लहे B· N·. ३७ विलोक्य added before चाण० B·N· . तर्हि for भद्र S· . सुखं for विश्रब्धं B· , भद्र E· ; विश्रब्धं omitted M·R·K·F· . विश for •प्रविश P· . ज्ञातारं च omitted E· . ३८ जेदु twice S·B·N· .

३९ चाण० विलोक्यात्मगतम् । कथमयं प्रकृतिचित्तपरिज्ञाने नियुक्तो निपुणकः। प्रकाशम्। भद्र स्वागतम्। उपविश।

४० चरः। जं अज्जो आणवेदि। भूमावुपविशति।

४१ चाण०। भद्र वर्णयेदानीं स्वनियोगवृत्तान्तम्। अपि वृषलमनुरक्ताः प्रकृतयः।

४२ चरः। अह इं। अज्जेण खु तेसु तेसु विराअकारणेसु परिहारिदेसु सुगहीदणामहेए देवे चन्दउत्ते दिढं अणुरत्ताओ पकिदिओ। किंदु उण अत्थि एत्थ णअरे अमच्चरक्खसेण सह पढमं समुप्पण्णसिणेहबहुमाणा तिण्णि पुरिसा देवस्स चन्दसिरिणो सिरिं ण सहन्दि।

प्रविशामि। जयत्वार्यः। ४० यदार्य आज्ञापयति। ४२ अथ किम्। आर्येण खलु तेषु तेषु विरागकारणेषु परिहृतेषु सुगृहीतनामधेये देवे चन्द्रगुप्ते दृढमनुरक्ताः प्रकृतयः। किं नु पुनरस्त्यत्र नगरेऽमात्यराक्षसेन सह प्रथमं समुत्पन्नस्नेहबहुमानास्त्रयः पुरुषाः देवस्य श्रीचन्द्रस्य श्रियं न सहन्ते.।

---

३९ अये कथम् for कथमयम् S. ज्ञाननियुक्तो R. भद्र omitted F. उपविश्यताम् K.F.S.B.E.N. कथं प्रभूतत्वात् कार्याणां कस्य परिज्ञाने नियुक्तो निपुणक इति न ज्ञायते । आः ज्ञातम् । अये कथमयं...उपविश ॥ B., भद्र निपुणक स्वागतम् । उपविश ॥ विलोक्यात्मगतम् ॥ कथं प्रभूतत्वात् ...ज्ञायते । आम् ज्ञातम् । अये तत् कथं प्रकृति...निपुणकः ॥ E. ४० देवो for अज्जो M.R. ४१ उपवर्णय B. ४२ अज्ज added before अह इं S.E.N. क/खु B.N. कज्जेसु for कारणेसु F. परिहारि(sic-हर्ग)अन्तेसु in all but F.S.B. सुगि...हेअं देवं चन्दउत्त दिढं अणु रत्ता F.S. सुग...हेअं चन्दउत्ते दिढं अणु रत्ता E.N. किं उण S.B.B. गन्ति for अत्थि B.; सन्दि A.P. पढमसमु S., पढं समु F. जे added before देवस्स A.P.B., ज्जेव S.

४३ चाण० सक्रोधमात्मगतम् । ननु वक्तव्यं स्वजीवितं न सहन्त इति । प्रकाशम् । भद्र अपि ज्ञायन्ते नामधेयतः ।

४४ चरः । कहं अजाणिदणामहेआ अज्जस्स णिवेदीअन्ति ।

४५ चाण० । तेन हि श्रोतुमिच्छामि ।

४६ चरः । सुणादु अज्जो । पढमो दाव रिउपक्खे बद्धपक्खवादो खवणओ—

४७ चाण० आत्मगतम् । अस्मद्रिपुपक्षे बद्धपक्षपातः क्षपणकः ।

४८ चरः । जीवसिद्धी णाम जेण सा अमच्चरक्खसपउत्ता विसकण्णा देवे पव्वदीसरे समावेसिदा ।

---

४४ कथमज्ञातनामधेया आर्याय निवेद्यन्ते । ४६ शृणोत्वार्यः । प्रथमं तावद्रिपुपक्षे बद्धपक्षपातः क्षपणकः ४८ जीवसिद्धिर्नाम येन सा अमात्यराक्षसप्रयुक्ता विषकन्या देवे पर्वतेश्वरे समावेशिता ।

---

४३ सक्रोधम् omitted F. . आत्मगतम् omitted in all but E.. एवं added after ननु E. . एव added before न S. . प्रकाशम् omitted in all but E. . ४४ अज्ज added before कहं S.E.N. . असुणिद for अजाणिद S.B.E. . णिवेदि(sic. दी)अन्ति A.J.F.S.E.N. . ४६ पढमं in all but R.F. . अज्जस्स added after दाव M.R.K.F. . जीवसिद्धी added after खवणओ in all but S.B.N. . ४७ सहर्षम् added before आत्मगतम् B. . अस्मद्वन्धु E.. प्रकाशम् ॥ ततः ॥ added after क्षपणकः ॥ R.E., प्रकाशम् ॥ किंनामधेयः सः ॥ N. , प्रकाशम् ॥ किंनामधेयो हि सः ॥ B. . ४८ सो added after णाम in all but B.E. . An additional speech चाण ० ॥ अस्मद्रिपुपक्षे बद्धपक्षपातः क्षपणक इति कथमवगतं भवता ॥ is inserted after णाम in B. . चरः ॥ added before जेण in B. .

४९ चाण० स्वगतम् । जीवसिद्धिः । एष तावदस्मत्प्रणिधिः । प्रकाशम् । भद्र अथापरः कः ।

५० चरः । अज्ज अवरो खु अमच्चरक्खसस्स पिअवअस्सो काअत्थो सअडदासो णाम ।

५१ चाण० आत्मगतम् । कायस्थ इति लघ्वी मात्रा । तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुम् । तस्मिन् मया सुहृच्छद्मना सिद्धार्थको विनिक्षिप्तः । प्रकाशम् । भद्र तृतीयमपि श्रोतुमिच्छामि ।

५२ चरः । तिदीओ वि अमच्चरक्खसस्स दुदीअं हिअअं पुप्फउरणिवासी मणिआरसेट्ठी चन्दणदासो णाम । जस्स गेहे कलत्तं णासीकदुअ अमच्चरक्खसो णअरादो अवक्कन्तो ।

५३ चाण० आत्मगतम् । नूनं स सुहृत्तमः । न ह्यनात्मसदृशे राक्षसः कलत्रं न्यासीकरिष्यति । प्रकाशम् । भद्र चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतमिति कथमवगम्यते ।

---

५० आर्य अपरः खल्वमात्यराक्षसस्य प्रियवयस्यः कायस्थः शकटदासो नाम ।
५२ तृतीयोऽप्यमात्यराक्षसस्य द्वितीयं हृदयं पुष्पपुरनिवासी मणिकारश्रेष्ठी चन्दनदासो नाम । यस्य गेहे कलत्रं न्यासीकृत्यामात्यराक्षसो नगरादपक्रान्तः ।

---

४९ भद्र omitted M. ५० वि for खु in all but F.B.E. ५१ प्राकृतमपि पुरुषमव० S.E., प्राकृतपुरुषमपि रिपुमव० N. °च्छद्मना in all but E. निक्षिप्तः M.R.B. तृतीयमपि S.E. ५२ वि omitted K. विअ added before हिअअं S.B.E.N. पुप्फउरवासी B. ५३ आत्मगतम् omitted A.F. नूनं सुहृत्तमोऽसौ in F., नूनं सुहृत्तमः in the rest. अनात्मसदृशेषु M.R.K.J.F.B.X., अनात्मसदृशे पुरुषे E. नात्मनः सदृशेषु पुरुषेषु R. दासे for दासस्य गृहे S.E.N. राक्षसेन omitted M. भवता added after अवगम्यते S.B.E.N.

५४ चरः । अज्ज इअं अङ्गुलिमुद्दा अज्जं अवगमइस्सदि । इति मुद्रामर्पयति ।

५५ चाण० मुद्रामवलोक्य सहर्षमात्मगतम् । ननु वक्तव्यं राक्षस एवास्मदङ्गुलिप्रणयी संवृत्त इति । प्रकाशम् । भद्र अङ्गुलिमुद्रागमं विस्तरेण श्रोतुमिच्छामि ।

५६ चरः । सुणादु अज्जो । अत्थि दाव अहं अज्जेण पउरजणचरिदअण्णेसणे णिउत्तो परघरप्पवेसे परस्स अणासङ्कणिज्जेण इमिणा जमपडेण हिण्डन्तो अज्ज मणिआरसेट्ठिणो चन्दणदासस्स गेहं पविट्ठोह्मि । तहिं जमपडं पसारिअ पउत्तोह्मि गीदाइं गाइदुं ।

५७ चाण० । ततः किम् ।

५८ चरः । तदो एक्कादो अववरकादो पञ्चवरिसदेसीओ पिअदंस-

---

५४ आर्य इयमङ्गुलिमुद्रा आर्यमवगमयिष्यति । ५६ शृणोत्वार्यः । अस्ति तावदहमार्येण पौरजनचरितान्वेषणे नियुक्तः परगृहप्रवेशे परस्यानाशङ्कनीयेनानेन यमपटेन हिण्डमानोऽद्य मणिकारश्रेष्ठिनश्चन्दनदासस्य गेहं प्रविष्टोऽस्मि । तत्र यमपटं प्रसार्य प्रवृत्तोऽस्मि गीतानि गातुम् । ५८ तत एकस्मादप-

---

५४ अङ्गुलीअमुद्दा A·M·K·J·B· , अङ्गुलीअअमुद्दा P· . ज्जेव added before अज्जं E· . सव्वं पि for अज्जं S·N· . अवगदत्थं करिस्सदि for अवगमइस्सदि A·P·M·R·K·J·F· . ५५ वक्तव्यं omitted B· . अयम् added after एव N· . अस्मद् omitted F· . मुद्राधिगमं in all but R· . ५६ अज्ज added after अत्थि S·N· . चरिददंसणे B·E· . तदो added before परघर B· . परस्स omitted S· . आहिण्डन्तो S·B· . अज्ज omitted in all but S·E· . सेट्ठिचन्दन in all but B· . गादुं M·R·F· . ५७ किम् omitted F·S·E· . ततस्ततः for ततः किम् B· . ५८ तदो अ A·P·K·S· . आवरकादो B· . अति for पिअ E· .

णीअसरीराकिदी कुमारओ बालत्तणसुलहकोदूहलोप्फुल्लणअणो णिक्कमिदुं पउत्तो। तदो हा णिग्गदो हा णिग्गदो त्ति सङ्कापरिग्गहणिवेदइत्तिओ तस्स य्येव अववरकस्स अब्भन्तरे इत्थिआजणस्स उट्ठिदो कलअलो। तदो ईसिदारदेसदाविदमुहीए एक्काए इत्थिआए सो कुमारओ णिक्कमन्तो य्येव णिब्भच्छिअ अवलम्बिदो कोमलाए बाहुलदाए। ताए कुमारसंरोधसंभमप्पचलिदङ्गुलिदो करादो पुरिसङ्गुलिपरिणाहप्पमाणघडिआ इअं अङ्गुलिमुद्दिआ देहलीबन्धम्मि पडिआ ताए अणवबुद्धा य्येव

वरकात् पञ्चवर्षदेशीयः प्रियदर्शनीयशरीराकृतिः कुमारको बालत्वसुलभकुतूहलोत्फुल्लनयनो निष्क्रमितुं प्रवृत्तः। ततो हा निर्गतो हा निर्गत इति शङ्कापरिग्रहनिवेदयिता तस्यैवापवरकस्याभ्यन्तरे स्त्रीजनस्योत्थितः कलकलः। तत ईषद्द्वारदेशदापितमुख्यैकया स्त्रिया स कुमारको निष्क्रामन्नेव निर्भर्त्स्यावलम्बितः कोमलया बाहुलतया। तस्याः कुमारसंरोधसंभ्रमप्रचलिताङ्गुलेः करात् पुरुषाङ्गुलिपरिणाहप्रमाणघटितेयमङ्गुलिमुद्रिका देहलीबन्धे पतिता तयानवबुद्धैव

सुउमारो added before कुमारओ S. सुकुमारओ for कुमारओ P.E.N. बालजण S.B.E.N. एफुल्लमाण E., एफुरिज्जमाण N., एफुरीअमाण S. बालओ added after णअणो S.E.N. हा णिक्कमिदो त्ति N., हा णिक्कन्दो त्ति S. णिब्भरगहओ for णिवेदइत्तिओ B., णिहुअगहओ R.S. सङ्का...कलकलो। तदो omitted E. आवरकस्स B. इत्थिआजणस्स omitted B. महन्तो added after उट्ठिदो in all but A.P.M. कोलाहलो N. जणस्स सत्तासं added after कलकलो E. तदो अ S. देसे K. णिअच्छिअ N. करेण added before कोमलाए E. तिस्साए for ताए in all but M.F. संभमचलिद N. ङ्गुलिआदो S.E. परिमाण E. विअलिदा added before इअं in all but A. देहलीए बद्दे E. णिवडिआ S.B.N., णिवडिअ E. उज्झिदा added after ताए A.P.M.R.K.J.F.N., विउज्झिआ E.

मह चलणपासं समागच्छिअ पणामणिहुदा कुलवहु विअ णिच्चला संवुत्ता । मए वि अमच्चरक्खसस्स णामङ्किदेत्ति अज्जस्स पादमूलं पाविदा । ता एसो इमाए आअमो ।

५९ चाण० । भद्र श्रुतम् । अपसर । नचिरादस्य परिश्रमस्यानुरूपं फलमधिगमिष्यसि ।

६० चरः । जं अज्जो आणवेदि । इति निष्क्रान्तः ।

६१ चाण० । शार्ङ्गरव शार्ङ्गरव ।

६२ शिष्यः । प्रविश्य । उपाध्याय आज्ञापय ।

६३ चाण० । वत्स मसीभाजनं पत्रं चोपानय ।

६४ शिष्यः । यदाज्ञापयत्युपाध्यायः । निष्क्रम्य पुनः प्रविश्य । उपाध्याय इदं मसीभाजनं पत्रं च ।

६५ चाण० गृहीत्वा स्वगतम् । किमत्र लिखामि । अनेन खलु लेखेन राक्षसो जेतव्यः ।

६६ प्रतीहारी प्रविश्य । जेदु अज्जो ।

६७ चाण० सहर्षमात्मगतम् । गृहीतो जयशब्दः । प्रकाशम् । शोणोत्तरे किमागमनप्रयोजनम् ।

मम चरणपार्श्वे समागत्य प्रणामनिभृता कुलवधूरिव निश्चला संवृत्ता । मयाप्यमात्यराक्षसस्य नामाङ्कितेत्यार्यस्य पादमूलं प्रापिता । तदेषोऽस्या आगमः । ६० यदार्य आज्ञापयति । ६६ जयत्वार्यः ।

एताए R· इत्थिआए S· , ताए इत्थिआए B·N· , ताए सा E· . अणववुद्धन्तज्जेव (sic· द्धज्जेव) B· . भाअं for पासं S·N· . आगच्छिअ S·E· , आगच्छिआ K· . णिवडिआ for णिहुदा S·N· . णव for कुल S·B·N· . ५९ अचिराद् E·N· . ६० देवो for अज्जो F· . ६१ One शार्ङ्गरव omitted in R·E· . ६३ उपनय F·S·K· . ६४ शिष्यस्तथा करोति for the whole speech F·B·E·N· . ६५ मषीभाजनं पत्रं च added before गृहीत्वा F· , पत्रं च only added A·P·M·R·K·J·E·N· . अभिलिखामि S·B·E· . खलु omitted M· . ६६ जेदु twice S·B·E·N· .

६८ प्रती० । अज्ज देवो चन्दसिरी सीसे कमलमुउलाआरमञ्जलिं णिवेसिअ अज्जं विण्णवेदि । इच्छामि अज्जेण अब्भणुण्णादो देवस्स पव्वदीसरस्स पारलोइअं कादुं तेण धारिदपुव्वाइं आहरणाइं भअवन्ताणं बह्मणाणं पडिवादेमि त्ति ।

६९ चाण० सहर्षमात्मगतम् । साधु वृषल ममैव हृदयेन सह संमन्त्र्य संदिष्टवानसि । प्रकाशम् । शोणोत्तरे उच्यतामस्मद्वचनाद्वृषलः । साधु वत्स अभिज्ञः खल्वसि लोकव्यवहाराणाम् । तदनुष्ठीयतामात्मनोऽभिप्रायः । किंतु पर्वतेश्वरेण धृतपूर्वाणि गुणवन्ति भूषणानि गुणवद्भ्य एव प्रतिपादनीयानि । तदहं स्वयमेव परीक्षितगुणान् ब्राह्मणान् प्रेषयामीति ।

७० प्रती० । जं अज्जो आणवेदि । निष्क्रान्ता ।

७१ चाण० । शार्ङ्गरव उच्यन्तामस्मद्वचनाद्विश्वावसुप्रभृतयस्त्रयो भ्रातरो वृषलात् प्रतिगृह्याभरणानि भवद्भिरहं द्रष्टव्य इति ।

७२ शिष्यः । यदाज्ञापयत्युपाध्यायः । निष्क्रान्तः ।

---

६८ आर्य देवः श्रीचन्द्रः शीर्षे कमलमुकुलाकारमञ्जलिं निवेश्यार्यं विज्ञापयति । इच्छाम्यार्येणाभ्यनुज्ञातो देवस्य पर्वतेश्वरस्य पारलौकिकं कर्तुं तेन धारितपूर्वाण्याभरणानि भगवद्भ्यो ब्राह्मणेभ्यः प्रतिपादयामीति । ७० यदार्य आज्ञापयति ।

---

६८ अहं added before अज्जेण S·B·E· . कारिदुं in all but K·B·N· . अ added after तेण in all but M·R· . गुणवन्ताणं B· ; भअवन्ताणं omitted A·P·M·R·K·J·F· . ६९ साधु added after वृषल S·B·E· . संमन्त्र्य omitted N· . प्रकाशम् omitted A·P·M· . अस्मद्वचनात् omitted R·K· . साधु added after वत्स S·B· . पर्वतेश्वरभृत B·E· , पर्वतेश्वरस्य भृत A·P· . ब्राह्मणेभ्यः added after एव S·B·N· . तदेव S·E· , तदेषोऽहं B· . एव omitted S·B·E· . ७१ शार्ङ्गरव twice A·S·B·E·N· . The speech शार्ङ्ग० प्रविश्य ॥ उपाध्याय आज्ञापय ॥ added after शार्ङ्गरव in E·. त्रयः omitted P· . ७२ तथा for the whole speech in A·P·M·R·K·J·F· .

७३ चाण०। उत्तरोऽयं लेखार्थः। पूर्वः कथमस्तु। विचिन्त्य। आः ज्ञातम्। उपलब्धवानस्मि प्रणिधिभ्यो यथा तस्य म्लेच्छराजलोकस्य मध्यात् प्रधानतमाः पञ्च राजानः परया सुहृत्तया राक्षसमनुवर्तन्ते। ते यथा

कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादो नृसिंहः
काश्मीरः पुष्कराक्षः क्षतरिपुमहिमा सैन्धवः सिन्धुषेणः।
मेघाक्षः पञ्चमोऽस्मिन् पृथुतुरगबलः पारसीकाधिराजो
नामान्येषां लिखामि ध्रुवमहमधुना चित्रगुप्तः प्रमार्ष्टु ॥ १७ ॥

विचिन्त्य। अथ वा न लिखामि। सर्वमनभिव्यक्तमेवास्ताम्। नाट्येन लिखित्वा। शार्ङ्गरव।

७४ शिष्यः प्रविश्य। उपाध्याय आज्ञापय।

७५ चाण०। वत्स श्रोत्रियाक्षराणि प्रयत्नलिखितान्यपि नियतमस्फुटानि भवन्ति। तदुच्यतामस्मद्वचनात् सिद्धार्थकः। एभिरक्षरैः

---

७३ स्वगतम् after चाण० F·B· . पूर्वं A· , पूर्वस्तु P·F· , पूर्वकस्तु S·N· . कतमोऽस्तु B· , कोऽस्तु S·N· , कथम् M·K·F· . आ E·N· , आम् P· . ज्ञातः B· ; ज्ञातम् omitted P· . प्रणिधिभ्याम् E· . बल for लोक S·B·E·N· . परम for परया K· . भक्त्या for सुहृत्तया B· . तद् for ते B·E· ; ते omitted A·P· . मेघाख्यः A·P·M·K·J·F·N·. मेघार्कः S·. चन्द्रगुप्तः above चित्रगुप्तः R· . विचिन्त्य omitted A·P·M· . पूर्वम् for सर्वम् A·P·M·R·K·J·F· . एव added after सर्वम् S· . तावद् for एव S· . तावद् added before आस्ताम् B·E· . प्रकाशम् for नाट्ये...त्वा B· ; नाट्ये......त्वा omitted K·S·E·N· . शार्ङ्गरव (with ग below) twice A·P·S· B· . ७४ प्रविश्य omitted M· . ७५ श्रोत्रियलिखितान्यक्षराणि S·E·; श्रोत्रियजनलिखितान्यक्षराणि N· . प्रयत्नेन B· , प्रयत्नतो N· , प्रयत्नतोऽपि S· . लिखितान्यपि omitted N· . अपि नियतम् omitted M· . कर्णे कथयित्वा। added before एभि: B·E· .

केनापि कस्यापि किमपि स्वयं वाच्यमित्यदत्तबाह्यनामानं लेखं शकटदासेन लेखयित्वा मामुपतिष्ठस्व । न चाख्येयमस्मै चाणक्यो लेखयतीति।

७६ शिष्यः । यदाज्ञापयत्युपाध्यायः । निष्क्रान्तः ।

७७ चाण० । हन्त जितो मलयकेतुः ।

७८ प्रविश्य लेखहस्तः सिद्धार्थकः । जेदु अज्जो । अज्ज अअं सो सअडदासेण लेहिदो लेहो ।

७९ चाण० गृहीत्वा । अहो दर्शनीयान्यक्षराणि। अनुवाच्य । भद्र अनया मुद्रया मुद्रयैनम्।

८० सिद्धा० । जं अज्जो आणवेदि । लेखं मुद्रयित्वा । अज्ज अअं मुद्दिदो लेहो । आणवेदु अज्जो किं अवरं अणुचिट्ठीअदु ।

८१ चाण० । भद्र कस्मिंश्चिदाप्तजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि ।

---

७८ जयत्वार्यः । आर्य अयं स शकटदासेन लिखितो लेखः । ८० यदार्य आज्ञापयति । आर्य अयं मुद्रितो लेखः । आज्ञापयत्वार्यः किमपरमनुष्ठीयताम् ।

किमपि omitted A·P·M·R·K·J· . चाणक्येन लेखनीयमिति M· . ७६ तथा for the whole speech in all but S·B·E·N· . ७७-७८ These two speeches are omitted in P· . ७८ लेखहस्तः omitted E· . जेदु twice S·B· . अज्ज omitted A·S· . एसो for अअं सो F·, अअं एसो S· ; सो omitted M·N· . सहत्थ added after दासेण B· . लिहिदो in all but R· . अअं सो अप्पइ सअडदासेण अभिलिहिदो लेहो E· . ७९ गृहीत्वा omitted A· ; निरीक्ष्य added after गृहीत्वा B· , अवलोक्य E· . अहो दर्शनीयता अक्षराणाम् B· . अनुभाष्य for अनुवाच्य S·E· . भद्र omitted M·R· . ८० जं... वेदि omitted A·P·M·R·K·J·F· . तथा कृत्वा for ले...त्वा in all. ता added before आणवेदु S·B· . आण...अज्जो omitted A·P·M·R·K·J·F· . ८१ त्वाम् added before and अपि after कस्मिंश्चिद् E· . ०ष्ठेयकर्मणि P·R·S·E· . नियोजयितुम् for त्वां व्यापा-

८२ सिद्धा० सहर्षम् । अज्ज अणुग्गिहिदोह्मि । आणवेदु अज्जो किं इमिणा दासजणेण अणुचिट्ठिदव्वं ।

८३ चाण० । प्रथमं तावद्वध्यस्थानं गत्वा घातकाः सरोषदक्षिणाक्षिसंकोचसंज्ञां ग्राहयितव्याः । ततस्तेषु गृहीतसंज्ञेषु भयापदेशादितस्ततः प्रद्रुतेषु शकटदासो वध्यस्थानादपनीय राक्षसं प्रापयितव्यः । तस्माच्च सुहृत्प्राणपरिरक्षणपरितुष्टात् पारितोषिकं परिगृह्य राक्षस एव कंचित् कालं सेवितव्यः । ततः प्रत्यासन्नेषु परेषु प्रयोजनमिदमनुष्ठेयम् । कर्णे । एवमिव ।

८४ सिद्धा० । जं अज्जो आणवेदि ।

८५ चाण० । शार्ङ्गरव ।

८६ प्रविश्य शिष्यः । उपाध्याय आज्ञापय ।

८७ चाण० । उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकः । यथा वृषलः समाज्ञापयति । य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतेश्वरं घातितवान् स एनमेव दोषं

---

८२ आर्य अनुगृहीतोऽस्मि । आज्ञापयत्वार्यः किमनेन दासजनेनानुष्ठातव्यम् ।

रयितुम् E., इच्छामः S. ८२ अज्ज omitted R.E. ता added before आणवेदु S.B. अज्जो omitted G. जं for किं S.E.N.G. अज्जस्स added after जणेण in all but S.G. ८३ भद्र added before प्रथमं B. घातुकाः M. सरोषं K.F.S.B.E. ग्राहितव्याः in all but F.S. संकेतेषु for संज्ञेषु A.P.M.R.K.J.F. प्रद्रावितेषु F. अपवाह्य E. तस्मात् A.P.G. प्राणरक्षण B.E. ग्राह्यम् for परिगृह्य in all but P. कालान्तरं S.E.G. त्वया added after परेषु B.E. एवमेव S.E.G., एवमेवम् R.B. ८४ निष्क्रामति added after आणवेदि S., निष्क्रान्तः G. ८५ शार्ङ्गरव once R. ८७ मद् for अस्मद् B. च added after दण्डपाशिकः in all but S. यथा omitted G. नाम omitted S.E.G. प्रयुक्तविष P., प्रयुक्तया विष E. पर्वतकं A.P.M.R.J.F.,

प्रख्याप्य सनिकारं नगरान्निर्वास्यतामिति ।

८८ शिष्यः । यदाज्ञापयत्युपाध्यायः । इति परिक्रामति ।

८९ चाण० । वत्स तिष्ठ तिष्ठ । योऽयमपरः कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुं प्रयतते स चाप्येनं दोषं प्रख्याप्य शूलमारोप्यतां गृहजनश्चास्य बन्धनागारं प्रवेश्यतामिति ।

९० शिष्यः । यदाज्ञापयत्युपाध्यायः । निष्क्रान्तः ।

९१ चाण० चिन्तां नाटयित्वात्मगतम् । अपि नाम दुरात्मा राक्षसो गृह्येत ।

९२ सिद्धा० । अज्ज गहीदो–

९३ चाण० सहर्षमात्मगतम् । हन्त गृहीतो राक्षसः ।

९४ सिद्धा० । अज्जसंदेसो । ता गमिस्सं कज्जसिद्धीए ।

---

८४ यदार्य आज्ञापयति । ९२ आर्य गृहीतः

पर्वतं K·N· . बहिर्निःसार्यतामिति A· . ८८ तथा for the whole sseech A·P·M·R·K·J·F·. निष्क्रामति M·R·S·E·G· . ८९ वत्स omitted S·G· . तिष्ठ once R· . इह added before प्रयतते in all but M·E· . यतते E· . चापि omitted N· . एनमेव S·E·G· , एतमेव N· . ९० तथा for the whole speech M·R·K·J·F·G· . आर्यः for उपाध्याय. A·P·S·N· . ९१–९२ These two speeches are omitted in G·. ९३ सहर्षमात्मगतम् omitted in G· . दुरात्मा added before राक्षसः E· . प्रकाशम् ॥ भद्र कोऽयं गृहीतः ॥ added after राक्षसः । in A·P·M·R·K·J·F·B·E·N· , प्रकाशम् ॥ अहो कोऽयं गृहीतः ॥ in S·G·. ९४ गिहिदो added before अज्ज in all but M·R·K· . मए अज्ज for अज्ज M·F·S·, मए अज्जस्स B·E· , अज्जस्स K·G·. गमिस्से R·. अहं added before कज्ज B·E· .

९५ चाण० साङ्गुलिमुद्रं लेखमर्पयित्वा। भद्र गम्यताम्। अस्तु ते कार्यसिद्धिः।

९६ सिद्धा०। तह। निष्क्रान्तः।

९७ प्रविश्य शिष्यः। उपाध्याय अयं कालपाशिको दण्डपाशिक उपाध्यायं विज्ञापयति। इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमिति।

९८ चाण०। शोभनम्। वत्स मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

९९ शिष्यः। यदाज्ञापयत्युपाध्यायः। निष्क्रम्य चन्दनदासेन सह प्रविश्य। इत इतः श्रेष्ठिन्।

१०० चन्द० स्वगतम्।

चाणक्कम्मि अकरुणे सहसा सद्दाविदस्स लोअस्स।
णिद्दोसस्स वि सङ्का किं उण मह जाददोसस्स॥ २०॥

---

९४ आर्यसंदेशः। तद्गमिष्यामि कार्यसिद्धये। ९६ तथा। १००चाणक्येनाकरुणेन सहसा शब्दायितस्य लोकस्य। निर्दोषस्यापि शङ्का किं पुनर्मम जातदोषस्य॥

---

९५ भद्र omitted in all but B·E·G·. सिद्धार्थक added before गम्यताम् B·. ९६ जं अज्जो(v·l·देवो G·) आणवेदि for तह in S·B·E·N·G·. ९७ अयं omitted in all but E·. च added after दण्डपाशिकः in all but S·E·. उपाध्यायं omitted F·. विज्ञापयन्तः in all but S·E·G·. देवस्य omitted G·. ९८ ब्रह्मन् शोभनम् S·, वत्स शोभनम् E·. श्रेष्ठिचन्दन० M·E·. इदानीं omitted A·P·M·R·. ९९ तथा for यदा...ध्यायः A·P·M·R·K·J·F·. चन्दनदास added after श्रेष्ठिन् S·. १०० चाणक्के F·. साद्दिअस्स N·, स्सदाइअस्स K·, शब्दाविअस्स E·. वि जगस्स for लोअस्स in all but B·. वड्ढइ added before णिद्दोसस्स B·E·.

ता भणिदा मए धणसेणप्पमुहा णिअणिवेससंठिदा तिण्णि वाणिज्जआ। कदावि चाणक्कहदओ गेहं मे विचिणावेदि। ता अवहिदा णिव्वहेह भट्टिणो अमच्चरक्खसस्स घरअणं। मह दाव जं होदि तं होदु त्ति।

१०१ शिष्यः। भोः श्रेष्ठिन् इत इतः।

१०२ चन्द०। अज्ज अअमाअच्छामि। उभौ परिक्रामतः।

१०३ शिष्य उपसृत्य। उपाध्याय अयं श्रेष्ठी चन्दनदासः।

१०४ चन्द०। जेदु अज्जो।

१०५ चाण० नाट्येनावलोक्य। श्रेष्ठिन् स्वागतम्। इदमासनम्। आस्यताम्।

तद् भणिता मया धनसेनप्रमुखा निजनिवेशसंस्थितास्त्रयो वाणिज्याः। कदापि चाणक्यहतको गेहं मे विचाययति। तस्मादवहिता निर्वहत भर्तुरमात्यराक्षसस्य गृहजनम्। मम तावद्यद् भवति तद् भवत्विति।
१०२ आर्य अयमागच्छामि। १०४ जयत्वार्यः।

पार्श्वट्ठिदा for णिवेससंठिदा G. तिण्णि वाणिज्जआ omitted in all but B.G. सावका for वाणिज्जआ G. गेहं पि E. मे omitted in all but B.E.G. णिक्कामेह for अव...हेह S.G.N. कलत्तं for घरअणं S.E.N.G. दाणिं for दाव M.R.S.E.N. जि for जं E. भोदु for होदि S.N.G. होदि for होदु A. १०१ इत इतः श्रेष्ठिन् for भोः... इतः S.E.G. १०२ अज्ज omitted in all but S.E.G.. आगदोम्हि for आअच्छामि S.B. The whole speech is omitted in M.R.K.F. १०३ उपसृत्य omitted M.R.S.B.G. देव for उपाध्याय G. चन्दनदासः omitted S.G. १०४ उपसृत्य added after चन्द० B. जेदु twice S.B.E. १०५ भोः added before श्रेष्ठिन् R.S.B.E.G. श्रेष्ठिन् omitted M.

१०६ चन्द० प्रणम्य। किं ण जाणादि अज्जो जह अणुचिदो उवआरो परिहवादो वि महन्तं दुक्खं उप्पादेदि। ता इह य्येव उचिदाए भूमीए उवविसामि।

१०७ चाण०। भोः श्रेष्ठिन् मा मैवम्। उचितमेवेदमस्माद्विधैर्भवतः। तदुपविश्यतामासन एव।

१०८ चन्द० स्वगतम्। उवक्खित्तं णेण दुट्ठेण किंवि। प्रकाशम्। जं अज्जो आणवेदि। उपविष्टः।

१०९ चाण०। भोः श्रेष्ठिन् चन्दनदास अपि प्रचीयन्ते संव्यवहाराणां लाभाः।

११० चन्द० स्वगतम्। अच्चादरो संकणीओ। प्रकाशम्। अह इं। अज्जस्स

---

१०६ किं न जानात्यार्यो यथानुचित उपचारः परिभवादपि महद् दुःखमुत्पादयति। तस्मादिहैवोचितायां भूमावुपविशामि। १०८ उपक्षिप्तमनेन दुष्टेन किमपि। यदार्य आज्ञापयति। ११० अत्यादरः शङ्कनीयः। अथ किम्। आर्यस्य

---

१०६ प्रणम्य omitted M·S·E·G·. ण omitted M·G·. ·हिअअस्स added after उवआरो A·P·M·R·K·J·F·, मह हिअअस्स S·, सहिअअस्स B·E·, परिजनसहिअ (sic·जनहिअअ) स्स G·. वि omitted E·. महन्तं omitted in all but S·B·E·. अहं added after य्येव R·B·E·G·. १०७ भोः omitted G·. चन्दनदास added after श्रेष्ठिन् R·. मा मैवम् omitted E·G·. संभावित for उचित A·P·M·R·K·J·F·N·. एतद् for इदम् P·B·, सह added before भवतः R·B·E·. उपवेष्टुम् added after भवतः E·. आसनम् G·. १०८ उवलक्खिदं S·B·N·G·. दुट्ठेण omitted B·. The whole स्वगत portion is left out in E·. भूमावुपविष्टः A·P·. १०९ भोः omitted E·G·. चन्दनदास omitted P·M·S·G·. खलु added after अपि N·. सर्व for सं F·. वृद्धिलाभाः A·P·K·J·F·S·E·N·, वृद्धिभावाः M·R·. वः added after लाभाः B·.

प्पसाएण अखण्डिदा मे वाणिज्जा लाहा।

१११ चाण०। न खलु चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणानधुना स्मारयन्ति प्रकृतीः।

११२ चन्द० कर्णौ पिधाय। सन्तं पावं। सारअणिसासमुग्गदेण विअ पुण्णिमाचन्देण चन्दसिरिणा अहिअं णन्दन्ति पकिदिओ।

११३ चाण०। भोः श्रेष्ठिन् यद्येवं प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

११४ चन्द०। आणवेदु अज्जो किं केत्तिअं इमादो जणादो इच्छीअदि त्ति।

११५ चाण०। भोः श्रेष्ठिन् चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैवार्थरुचेरर्थसंबन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

११६ चन्द० सहर्षम्। अज्ज अणुगिहीदोह्मि।

प्रसादेनाखण्डिता मे वाणिज्या लाभाः। ११२ शान्तं पापम्। शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण श्रीचन्द्रेणाधिकं नन्दन्ति प्रकृतयः। ११४ आज्ञापयत्वार्यः किं कियदस्माज्जनादिष्यत इति। ११६ आर्य अनुगृहीतोऽस्मि।

---

११० वाणिज्जलाहा S., वणिज्जा A., वणिज्जा K.. १११ आप खलु N., अपि G., अपि न S., भोः श्रेष्ठिन् अपि E., भोः श्रेष्ठिन् अपि कदाचित् B.. प्रदोषान् E., दोषान् G.. स्मरन्ति प्रकृतयः E.. ११२ सन्तं पावं twice A.P.M.F.. सरअ B.N.G.. सम(sic-समु)ग्गएण A.P.. पुण्णमासी S.E.G.. अहिणन्दन्ति A.G.. ११३ भोः omitted S.G.. यद्येवं omitted M.R.. प्रतीताभ्यः S.. प्रति omitted B.. ११४ वा added after केत्तिअं E., अत्थं S.G., वा अत्थजादं B.. जणादो omitted F.. ११५ भोः omitted S.G.. चन्दनदास added after श्रेष्ठिन् S.. चन्द्रगुप्तस्य K.. इदं omitted M.. अयम् added after एव S.G.. प्रतीतिम् for प्रीतिम् S.. ११५–११६. These two speeches are omitted in E.. ११६ सहर्षम् omitted M.R.. अज्ज omitted S.. गिहिदह्मि S.G..

११७ चाण० । भोः श्रेष्ठिन् स चापरिक्लेशः कथमाविर्भवतीति ननु भवता प्रष्टव्याः स्मः ।

११८ चन्द० । आणवेदु अज्जो ।

११९ चाण० । संक्षेपतो राजन्यविरुद्धाभिर्वृत्तिभिः ।

१२० चन्द० । अज्ज को उण अधण्णो रण्णा विरुद्धो त्ति अज्जेण अवगच्छीअदि ।

१२१ चाण० । भवानेव तावत् प्रथमः ।

१२२ चन्द० कर्णौ पिधाय । सन्तं पावं सन्तं पावं । कीदिसो तिणाणं अग्गिणा सह विरोहो ।

१२३ चाण० । अयमीदृशो विरोधो यत्त्वं राजापथ्यकारिणो राक्षसस्य गृहजनमभिरक्षसि ।

---

११८ आज्ञापयत्वार्यः । १२० आर्य कः पुनरधन्यो राज्ञा विरुद्ध इत्यार्येणावगम्यते । १२२ शान्तं पापं शान्तं पापम् । कीदृशस्तृणानामग्निना सह विरोधः ।

---

११७ न पुनः for ननु B. आविर्भविष्यति F., भवता omitted S.B.E. N.G. प्रष्टव्योऽस्मि E.G. तत्रभवता added after स्मः S.N.G., भवता E. ११८–११९ These speeches are omitted in S. ११९ संक्षेपतो omitted M. वर्तितव्यम् added after वृत्तिभिः M.R. K.J.E.N.G., भवितव्यम् A.P.F. १२० अध added before को S.E.G. उण omitted S.E.N.G. एसो added before अधण्णो F.B.E., जो जणो G., अवरो जणो S. १२१ भद्र added before भवान् A.P., ननु S.E. तावत् omitted M.R. प्रथमम् A.P.M.R. K.J.S.B.E.N.G. १२२ सन्तं पावं once A.S. उग added after कीदिसो N. १२३ यः for यत् in all but R.B.G.; यत् omitted G. अमात्य added before राक्षसस्य in all but S.E.G. स्वगृहम् added after गृहजनम् in all but M.R.; गृहम् M. अभि. (v.l. उपE.) नीय रक्षसि for अभिरक्षसि in all but G.

१२४ चन्द० । अज्ज अलिअं एदं केणवि अणज्जेण अज्जस्स णिवेदिदं ।

१२५ चाण० । भोः श्रेष्ठिन् अलमाशङ्कया । भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति । तत्प्रच्छादनमेव दोषमुत्पादयति ।

१२६ चन्द० । एवं णेदं । तस्सिं समए आसि अह्म घरे अमच्चरक्खसस्स घरअणो ।

१२७ चाण० । पूर्वमनृतमिदानीमासीदिति परस्परविरोधिनी वचने ।

१२८ चन्द० । अज्ज एत्तिअं अत्थि मे वाआच्छलं ।

१२९ चाण० । भोः श्रेष्ठिन् चन्द्रगुप्ते राजन्यपरिग्रहश्छलानाम् । तत्समर्पय राक्षसस्य गृहजनम् । अच्छलं भवतु भवतः ।

१३० चन्द० । अज्ज णं विण्णवेमि तस्सिं समये आसि अह्म घरे अमच्चरक्खसस्स घरअणो त्ति ।

१३१ चाण० । अथेदानीं क्व गतः ।

१२४ आर्य अलीकमेतत् केनाप्यनार्येणार्याय निवेदितम् । १२६ एवमिदम् । तस्मिन् समय आसीदस्माकं गृहेऽमात्यराक्षसस्य गृहजनः । १२८ आर्य एतावदस्ति मे वाक्छलम् । १३० आर्य ननु विज्ञापयामि तस्मिन् समय आसीदस्माकं गृहेऽमात्यराक्षसस्य गृहजन इति ।

१२४ अज्ज omitted M. एवं for एदं E. अणभिज्ञेण for अणज्जेण A·P·M·R·K·J·F·N·. १२५ श्रेष्ठिन् omitted M·R·. अलम् twice R·. अनया added after अलम् A·P·M·K.F·. प्रयान्ति S·G·. ततः added before तत् A·P·R·K·J·F·B·G·, यतः S·E·. एव omitted in all but B·E·. अत्र added before दोषम् N·G·, अत्र तु E·, मे K·. प्रदोषम् A·R·. १२७ प्रथमम् for पूर्वम् B·E·. परस्परम् A·K·. १२८ अज्ज omitted in all but N·. य्येव added before अत्थि A·P·M·R·K·J·F·B·, अत्थन्तरे S·E·. १२९ मा शङ्किष्टाः added before चन्द्रगुप्ते S·N·G·. न परिग्रहः B·N·. समर्पयतु E·. भवतु omitted A·P·M·R·K·F·S·G·N·. भवेत (sic·भवेत्) for भवतः E·G·. १३० तस्सिं समए omitted A·P·M·R·K·J·.

१३२ चन्द०। ण जाणामि।

१३३ चाण० स्मितं कृत्वा। कथं न ज्ञायते नाम। भोः श्रेष्ठिन् शिरसि भयम्। अतिदूरे तत्प्रतीकारः।

१३४ चन्द० स्वगतम्।

उवरि वणावणरडिदं दूरे दइदा तमेदमावडिदम्।
हिमवदि दिव्वोसहिओ सीसे सप्पो समाविट्ठो॥ २१॥

१३५ चाण०। अन्यच्च नन्दमिव विष्णुगुप्तः (इत्यर्धोक्ते लज्जां नाटयित्वा) चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मैव मंस्थाः। पश्य।

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीवक्रनासादिभि-
र्नन्दे जीवति या तदा न गमिता स्थैर्यं चलन्ती मुहुः।
तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक्॥ २२॥

अपि च

आस्वादितद्विरदशोणितशोणशोभां

---

१३२ न जानामि। १३४ उपरि घनाघनरटितं दूरे दयिता तदेतदापतितम्। हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः॥

---

१३२ अज्ज added before ण S·G·. जाणीमो G·N·. कहिं गदो त्ति added at the end S·B·E·N·G·. १३३ स्मितं कृत्वा omitted S·. भोः omitted S·E·. श्रेष्ठिन् omitted S·G·. फणी for भयम् B·E·G·. अति omitted S·B·. १३४ स्वगतम् omitted S·. उक्तं कस्यापि for चन्द० स्वगतम् G·. घणं घण in all but M·B·E·. किमेदम् for तमेदम् M·J·B·N·, किमेयद् G·, किमेतद् A·P·R·K·, किमेदद् F·S·. १३५ च omitted E·. गुप्त omitted P·K·N·. ननु added before चन्द्रगुप्तम् E·. मा twice A·P·M·R·K·J·F·N·. एवम् for एव in all but P·. अवमंस्थाः G·. श्रीवक्र A·P·G·. तथा for तदा G·. आस्वादितद्वि-

संध्यारुणामिव कलां शशलाञ्छनस्य ।
जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥ २३ ॥

१३६ चन्द० स्वगतम्। फलेण संवादिदं सोहदि दे विकत्थिदम्।

नेपथ्य उत्सारणा क्रियते ।

१३७ चाण० । शार्ङ्गरव ज्ञायतां किमेतत् ।

१३८ शिष्यः । यदाज्ञापयत्युपाध्यायः। निष्क्रम्य पुनः प्रविश्य । उपाध्याय एष राज्ञश्चन्द्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वास्यते ।

१३९ चाण० । कथं क्षपणकः । अहह कष्टम् । अथ वानुभवतु राजापथ्यकारित्वस्य फलम्। भोः श्रेष्ठिन् चन्दनदास एवमयं राजापथ्यकारिषु तीक्ष्णदण्डो राजा । तत् क्रियतां पथ्यं सुहृद्वचः। समर्प्यतां राक्षसस्य गृहजनः । अनुभूयतां चिरं विचित्रो राजप्रसादः ।

---

१३६ फलेन संवादितं शोभते ते विकत्थितम् ।

रदशोणितशोणशोभामिति पूर्वोक्तं पठति in all but S·E·G· . विजृम्भित for विदारित S· . १३६ स्वगतम् omitted A· . संपादिदं M·R·B·E· , संपाविअं G· , संभाविअं S· . सोहदि omitted A·P·M·R·K·J· . से for दे A·P·M·R·K·J·S· , किं ण E· . फलेण विसंवादिस्सदि मे विकत्थिदं । for the whole speech F· . १३७ कलकलः for उत्सारणा क्रियते A·P·M·R·K·J·F· . १३७ शार्ङ्गरव twice A·E·G· . आः added before ज्ञायताम् A·P·N· . १३८ तथा for यदा...ध्यायः A·P·M·R·K·J·F· . देवस्य for राज्ञः E· . राजापकारी M· R· . १३९ कथम् omitted in all but N· . क्षपणकः omitted S· ; क्षपणक for it A·P·M·R·K·J·F·B·E·N· . कष्टम् omitted in all but E· . स्वकर्मभिः added before अनुभवतु E· . अनुभव A·P·M·R·K·J· . भोः omitted F·S·G· . चन्दनदास omitted G· . अयमपथ्य A·P·M·R·K·J·F· . तत् omitted S·G· . सुहृद्वचनम् S·G· . सम...जनः omitted N·G· . राक्षसगृहजनः A·P·J·F·S·B·N·G· . चिरं omitted G· . अनुभूयन्तां B·G· . विचित्राः B·G· , विचित्रफलो E· . राजप्रसादाः B·G· .

१४० चन्द० । अज्ज णत्थि मे गेहे अमच्चघरअणो ।

नेपथ्ये पुनरुत्सारणा क्रियते ।

१४१ चाण० । शार्ङ्गरव ज्ञायतां किमेतत् ।

१४२ शिष्य० । यदाज्ञापयत्युपाध्यायः । निष्क्रम्य पुनः प्रविश्य । उपाध्याय अयमसौ राजाज्ञया राजापथ्यकारी कायस्थः शकटदासः शूलमारोपयितुं नीयते ।

१४३ चाण० । स्वकर्मफलभाग् भवतु । भोः श्रेष्ठिन् एवमयं राजापथ्यकारिषु तीक्ष्णदण्डो राजा न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः । तद्रक्ष्यतां परकलत्रेणात्मनः कलत्रं जीवितं च ।

---

१४० आर्य नास्ति मे गेहेऽमात्यगृहजनः ।

---

१४० अज्ज omitted in all but S·E·N·G· . गेहे सन्तं (वि ण S·N·) समप्पेमि । कुदो असन्तं समप्पीअदि । for णत्थि मे...अणो । in S·N·G· , गेहे असन्तं कुदो समप्पीअदि । in E· . १४१ कलकलः for उत्सारणा क्रियते P·M·R·J·F·S·B·N·G· , कलहः A·K· . १४१ शार्ङ्गरव twice M·S·E· . संज्ञायताम् E· . भोः added after ज्ञायताम् A·P·N· , पुनः B·E· . १४२ तथा for यदा...ध्यायः A·P·M·R·K·J·F·G· . अयम् omitted B· . अपि for असौ A·P·M·R·K·J·F·G· . राजाज्ञया omitted in all but B·E· . राजापथ्यकारी omitted S·N·G· . एव added before कायस्थः A·P·M·R·K·J·F· , इति E· . १४३ फलमनुभव A· , फलमनुभवतु P·M·R·K·J·E·N· , फलपाकमनुभवतु F· . हे for भोः F· . चन्दनदास added before एवम् S· . राजा before न omitted in all but B·E· . अलं added before राक्षस F· . प्रच्छादनेन F· . परकलत्रसमर्पणेन F· . भवतः omitted G· . रक्ष for रक्ष्यताम् in all but S·E·G· ; परिरक्ष E· , त्यज्यताम् S· .

१४४ चन्द०। अज्ज किं मे भअं दावेसि। सन्तं वि गेहे अमच्चरक्खसस्स घरअणं ण समप्पेमि किं उण असन्तं।

१४५ चाण०। चन्दनदास एष ते निश्चयः।

१४६ चन्द०। बाढं। एसो मे णिच्छओ।

१४७ चाण० स्वगतम्। साधु चन्दनदास साधु।

सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिबिना विना॥ २४॥

प्रकाशम्। चन्दनदास एष ते निश्चयः।

१४८ चन्द०। बाढं।

१४९ चाण० सक्रोधम्। दुरात्मन् दुष्टवणिक् अनुभूयतां तर्हि नरपतिक्रोधः।

१५० चन्द०। सज्जोह्मि। अणुचिट्ठदु अज्जो अत्तणो अहिआरस्स अणुरूअं।

---

१४४ आर्य किं मां भयं दर्शयसि। सन्तमपि गेहेऽमात्यराक्षसस्य गृहजनं न समर्पयामि किं पुनरसन्तम्। १४६ बाढम्। एष मे निश्चयः।
१४८ बाढम्। १५० सज्जोऽस्मि। अनुतिष्ठत्वार्य आत्मनोऽधिकारस्यानुरूपम्।

---

१४४ दंसेसि for दावेसि K·B·E·. अहं added before गेहे S·E·; अहं for गेहे N·G·. १४६ थिरो added after एसो in all but M·R·. १४७ श्रेष्ठिन् for चन्दनदास E·. संवेदने (?) R·. जनः B·. श्रेष्ठिन् for चन्दनदास G·. १४८ The whole speech is omitted in M·. एसो मे थिरो णिच्छओ for बाढं S·B·N·G·. १४९ खड्गमाकृष्य added before सक्रोधम् E·. तिष्ठ added after दुरात्मन् A·P·M·R·K·J·F·S·N·. तर्हि omitted G·. नरपतेः कोपः R·S·G·. राजकोपः B·. १५० बाहू प्रसार्य added after चन्द० B·E·. मुद्दो added before ह्मि F·. अणुट्ठाअदु A·P·. अहिआरसरिसं A·P·M·R·K·J·F·N·G·, अधिआरित्तसरिसं S·.

१५१ चाण० । शार्ङ्गरव शार्ङ्गरव उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकः । शीघ्रमयं दुष्टवणिङ् निगृह्यताम् । अथ वा तिष्ठतु । उच्यतां दुर्गपालो विजयपालः । गृहीतसारमेनं सपुत्रकलत्रं संयम्य तावद्रक्ष यावन्मया वृषलाय कथ्यते । स एवास्य प्राणहरं दण्डमाज्ञापयिष्यति ।

१५२ शिष्यः । यदाज्ञापयत्युपाध्यायः । श्रेष्ठिन् इत इतः ।

१५३ चन्द० उत्थाय । अज्ज अअमाअच्छामि । स्वगतम् । दिट्ठिआ मित्तकज्जेण मे विणासो ण पुरिसदोसेण ।

परिक्रम्य शिष्येण सह निष्क्रान्तः ।

१५४ चाण० सहर्षम् । हन्त लब्ध इदानीं राक्षसः । कुतः ।

त्यजत्यप्रियवत् प्राणान् यथा तस्यायमापदि ।
तथैवास्यापदि प्राणा ध्रुवं तस्यापि न प्रियाः ॥ २५ ॥

---

१५३ आर्य अयमागच्छामि । दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण ।

---

१५१ सक्रोधम् added after चाण० B. , सक्रोधं खड्गमाकृष्य । दुरात्मन् दुष्ट E. . शार्ङ्गरव twice P.M.S.E. . च added after दण्डपाशिकः in all but S. . निगृह्य for निगृह्यताम् N. , शास्यताम् G.E. ; निगृह्यताम् omitted S. . तावत् for अथ वा G. . अस्मद्वचनाद् added before दुर्गपालो S.E.G. . दुर्गपालको A.P.M.R.K.J.F.N. . विजयपालकः A.P.M.R.J.F. , विजयपालकश्च N. , विजयपालश्च B.E.G. . नियम्य for संयम्य F. ; संयम्य omitted S.G. . मया omitted N.G. . स for वृषल B.G. . प्राणहरणं M. , सर्वस्वहरं E. , सर्वस्वहरणं G. . १५३ उत्थाय omitted in all but S.B.E. . मे omitted M.R. . जणिदो added before ण B. . उण added after ण M.B. . शिष्येण सह omitted G. . १५४ हन्त omitted M.R.N. . दिष्ट्या added after हन्त S.G. . दुरात्मा added before राक्षसः E. . तथास्याप्यापदि E. . नूनं for ध्रुवं in all but E. .

नेपथ्ये कलकलः।

१५५ प्रविश्य संभ्रान्तः शिष्यः। उपाध्याय एष खलु शकटदासं वध्यमानं वध्यभूमेरादाय समपक्रान्तः सिद्धार्थकः।

१५६ चाण० स्वगतम्। साधु सिद्धार्थक कृतः कार्यारम्भः। प्रकाशं सक्रोधम्। प्रसह्य किमपक्रान्तः। वत्स उच्यतां भागुरायणो यथा त्वरितमेनं संभावय।

१५७ निष्क्रम्य प्रविश्य च शिष्यः सविषादम्। उपाध्याय हा धिक् कष्टमपक्रान्तो भागुरायणः।

१५८ चाण० स्वगतम्। व्रजतु कार्यसिद्धये। प्रकाशं सक्रोधम्। वत्स उच्यन्तामस्मद्वचनाद् भद्रभटपुरुषदत्तडिङ्गरातबलगुप्तराजसेनरोहिताक्षविजयवर्माणः। शीघ्रमनुसृत्य गृह्यतां दुरात्मा भागुरायण इति।

---

१५५ Before this the speeches चाण० ॥ शार्ङ्गरव शार्ङ्गरव ॥ शिष्यः ॥ प्रविश्य उपाध्याय आज्ञापय ॥ चाण० ॥ किमेष कलकलः ॥ added with slight alterations in A·P·J·S·B·N·G·, and चाण० ॥ शार्ङ्गरव शार्ङ्गरव रे ज्ञायतां किमेतत् ॥ only added in E·. विभाव्य for प्रविश्य संभ्रान्तः A·P·J·S·N·G·, प्रविश्य M·R·K·F·, प्रविश्य सविषादं E·, निष्क्रम्य विभाव्य पुनः प्रविश्य संभ्रान्तः B·. खलु omitted G·. स्थानाद् for भूमेः M·R·. अपक्रान्तः S·. १५६ साधु added before कृतः P·S·B·N·G·. त्वया added after कृतः E·. कृतः कार्यारम्भः omitted N·. कथम् for किम् E·. सक्रोधमिव R·. एनम् omitted A·P·M·R·K·J·F·. १५७ अपि added at the end in all but S·E·G·. १५८ सक्रोधमिव in all but S·E·G·. भद्र for वत्स A·P·M·N·. तत्कृतं विषादेन added before उच्यन्ताम् K·B·. भद्द E·. डिङ्ग R·E·, डिण्ड G·, डिङ्ग B·. लोहि K·S·. भद्रभटप्रभृतयः for भद्र......वर्माणः F·. उपसृत्य B·E·.

१५९ शिष्यः । यदाज्ञापयत्युपाध्यायः । निष्क्रम्य पुनः प्रविश्य सविषादम् । हा धिक् कष्टं सर्वमेव तन्त्रमाकुलीभूतम् । तेऽपि खलु भद्रभटप्रभृतयः प्रथमतरमप्रभातायामेव रजन्यामपक्रान्ताः ।

१६० चाण० स्वगतम् । सर्वेषां शिवाः सन्तु पन्थानः । प्रकाशम् । वत्स अलं विषादेन ।

ये याताः किमपि प्रधार्य हृदये पूर्वं गता एव ते
ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं सकामोद्यमाः ।
एका केवलमर्थसाधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मा गान्मम ॥ २६ ॥

उत्थाय । एष दुरात्मनो भद्रभटप्रभृतीनाहरामि । प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वात्मगतम् । दुरात्मन् राक्षस क्वेदानीं गमिष्यसि । एषोऽहमचिराद् भवन्तम्

---

१५९ तथा for यदा...ध्यायः A·P·M·R·K·J·F· . हा धिक् कष्टम् omitted M·R· ; कष्टम् omitted E· ; उपाध्याय added after हा S·B·E·G· . व्याकुलीभूतम् P· . प्रथमम् P· , प्रथमतः G· . प्रभातायामेव for अप्रभातायाम् G· , उषसि A·P·M·R·K·J·F· . १६० सर्वथा for सर्वेषां A·P·M·K·J·F· , सर्वदा R· . कृतं for अलं S· G· . पश्य added after विषादेन in all but M·R·K· . निघ्नन्ति for तिष्ठन्ति N· . गमनं E· . प्रकामोद्यमाः in all but E· . एव for अर्थ in all but B· . नन्दोत्पाटन E· . उत्थाय omitted F· . आकाशे लक्ष्यं बद्ध्वा added before एष A·P·M·R·K·J·F·N· , प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा B· . खलु added after एषः B· . ग्राहयामि for आहरामि E· , ग्राहयिष्यामि S·G· . आत्मगतम् only for प्रत्य......गतम् in all. आः added before दुरात्मन् R· . इदानीम् omitted S·E·G· . यास्यसि S·B·E·N·G· .

स्वच्छन्दमेकचरमुज्ज्वलदानशक्ति-
मुत्सेकिनं बलमदेन विगाह्यमानम्।
बुद्ध्या निगृह्य वृषलस्य कृते क्रियाया-
मारण्यकं गजमिव प्रवणीकरोमि॥ २७॥

निष्क्रान्तौ।

इति मुद्रालाभो नाम प्रथमोऽङ्कः।

उत्सेकिना in all but R. मदबलेन A.P.M.R.K.J.F. विगाहमानम् A.P.M.K.J.F.B.N., विदह्यमानम् S. प्रगुणीकरोमि in all but M.R.; प्रवणं करोमि M. इति निष्क्रान्ताः सर्वे for निष्क्रान्तौ in all. मुद्रालाभो नाम omitted in all but A.P.N..

ततः प्रविशत्याहितुण्डिकः ।

१ आहि० ।

जाणन्ति तन्तजुत्तिं जहट्ठिदं मण्डलं अहिलिहन्ति ।
जे मन्तरक्खणपरा ते सप्पणराहिवे उवअरन्ति ॥ १ ॥

आकाशे । अज्ज किं तुमं भणासि । को तुमं त्ति । अज्ज अहं खु आहितुण्डिओ जिण्णविसो णाम । किं भणासि । अहं वि अहिणा खेलिदुं इच्छामि त्ति । अह कदरं उण अज्जो वित्तिं उवजीवदि । किं भणासि । राअउलसेवओह्मि त्ति । णं खेलदि ज्येव अज्जो अहिणा । कहं विअ । अमन्तोसहिकुसलो वालग्गाही मत्तो मअङ्गआरोहो जिदकासी लद्धाहिआरो राअउलसेवओ

---

१ जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति । ये मन्त्ररक्षणपरास्ते सर्पनराधिपानुपचरन्ति ॥ आर्य किं त्वं भणासि । कस्त्वमिति । आर्य अहं खल्वाहितुण्डिको जीर्णविषो नाम । किं भणसि । अहमप्यहिना खेलितुमिच्छामीति । अथ कतरां पुनरार्यो वृत्तिमुपजीवति । किं भणसि । राजकुलसेवकोऽस्मीति । ननु खेलत्येवार्योऽहिना । कथमिव । अमन्त्रौषधिकुशलो व्यालग्राही मत्तो मतङ्गजारोहो जितकाशी लब्धाधिकारो राजकुलसेवक

---

१ जुत्ती P·S· . अहिलहन्ति G· , तुमं omitted S·B·E·G· . भणासि K· . क्खु B· . जीवदि F· , आजीवदि N·G· . खेलदु S·E·G· . किं भणासि । अधं त्ति for कहं विअ in B· ; त्ति for विअ S·G· ; विअ omitted E· . मन्तोसहि for अमन्तोसहि A·P·M·N· . अनोसहि E· . अग्गहिदङ्कुसो added after वालग्गाही B· , पमत्तो S· . मत्तो omitted R· ; पमत्ता for मत्तो G· , पियमन्तो (?) E· , पमत्त A· , मत्त P·M·J·F·S·B·N· , मतङ्गआरोहि for मअङ्गआरोहो

त्ति एदे तिण्णि अवस्सं विणासमणुहोन्ति । कहं अदिक्कन्तो एसो । पुनराकाशे । अज्ज किं तुमं भणासि । किं एदेसु पेडाल-समुग्गएसु त्ति । अज्ज जीविआए संपादआ सप्पा । किं भणासि । पेक्खिदुं इच्छामि त्ति । पसीददु अज्जो । अट्ठाणं खु एदं । ता जदि कोदूहलं एहि एदस्सिं आवासे दंसेमि । किं भणासि । एदं खु भट्टिणो अमच्चरक्खसस्स गेहं । णत्थि अह्मारिसाणं इह पवेसो त्ति । तेण हि गच्छदु अज्जो । मम उण जीविआए

इत्येते त्रयोऽवश्यं विनाशमनुभवन्ति । कथमतिक्रान्त एषः । आर्य किं त्वं भणसि । किमेतेषु पेटकसमुद्गकेष्विति । आर्य जीविकायाः संपादका सर्पाः । किं भणसि । प्रेक्षितुमिच्छामीति । प्रसीदत्वार्यः । अस्थानं खल्वेतत् । तस्माद्यदि कुतूहलमेह्येतस्मिन्नावासे दर्शयामि । किं भणसि । एतत् खलु भर्तुरमात्यराक्षसस्य गेहम् । नास्त्यस्मादृशानामिह प्रवेश इति । तेन हि गच्छत्वार्यः । मम पुनर्जीविकायाः

P·J·F· , मतङ्गआरोही A·M· , मदगआरोही R· , मत्तगअवरारोही B· , मत्तगअवरारोहणो S·E·N· , मतङ्गजसंरोहणो G· . लद्धाहिआरो जिदकासी in all. उल omitted in all but E· . तदो ज्जेव added before एदे S·E·G· . वि added before अवस्सं A·P·M·R·J·F·E·N· , वि पुरिसा S·G· . कहं...एसो omitted S·N·G· . एसो omitted E· . मण्डण added after अज्ज N· . तुमं उण किं for किं तुमं S·B·G· . पेडिआ R· , पेडा B·E· . वहासि त्ति for त्ति S· . अप्प added before जीविआए B· . जीविआसंपादआ B·E·G· . भणासि A·M·R· . पसीददु twice B· ; पेक्खदु for it P· , पेक्खीअदु पेक्खीअदु E· . क्खु B·N· . दे added after कोदूहलं B· . ता added before एहि S·B·E·G· . ज्जेव added before आवासे N· . पविसिअ added after आवासे S·N·G· , इह omitted N· . हि omitted S· ; ता for तेण हि N· . मम omitted S· . उण omitted S·B·G· . जीविआपचाएण P· .

पसादेण अत्थि एत्थ पवेसो । कधं एसो वि अदिक्कन्तो । स्वगतम् । अहो आश्चर्यम् । चाणक्यमतिपरिगृहीतं चन्द्रगुप्तमवलोक्य विफलमिव राक्षसप्रयत्नमवगच्छामि । राक्षसमतिपरिगृहीतं च मलयकेतुमवलोक्य चलितमिवाधिराज्याच्चन्द्रगुप्तमवगच्छामि । कुतः ।

कौटिल्यधीरज्जुनिबद्धमूर्तिं मन्ये स्थिरां मौर्यनृपस्य लक्ष्मीम् ।
उपायहस्तैरपि राक्षसेन निकृष्यमाणामिव लक्षयामि ॥ २ ॥

तदेवमनयोर्बुद्धिशालिनोः सुसचिवयोर्विरोधे संशयितेव राजलक्ष्मीः ।

विरुद्धयोर्भृशमिह मन्त्रिमुख्ययो-
र्महावने वनगजयोरिवान्तरे ।
अनिश्चयाद् गजवशयेव भीतया

प्रसादेनास्त्यत्र प्रवेशः । कथमेषोऽप्यतिक्रान्तः ।

पसाहणत्थं for पसाएण E. . इह for एत्थ A.P.R.F.E. , मे for एत्थ S. . अवक्कन्तो A.P. . कधं...क्कन्तो omitted M.R.F. . संस्कृतमाश्रित्य . added before स्वगतम् in all . स्वगतम् omitted R. . आश्चर्यम् twice M.S. . अवेक्ष्य for अवलोक्य A.P.F.N.G. , प्रेक्ष्य S. . राक्षसपरिगृहीतं M.R.F. . च omitted in all but B. . अवेक्ष्य for अवलोक्य N.G. , प्रेक्ष्य S. . अपि omitted S.N.G. . राक्षसमति...... च्छामि omitted in A. , राक्षसमवेक्ष्य विफलमिव चाणक्यप्रयत्नमवगच्छामि for it in P. . तथा हि for कुतः M.B. . कुल for नृप S.B.E. N.G. . इह for अपि S.G. . निःकृ for निकृ E.G. , निष्कृ A.M.F. , विकृ B. . सुनय for बुद्धि B.E. . सचिवयोः E. . नन्दकुलराज्यलक्ष्मीः in E. , नूनं कुललक्ष्मीः in G. , नन्दकुललक्ष्मीः in the rest. लक्ष्यते । कुतः added after लक्ष्मीः in S.B.E.G. , लक्ष्यते । यतः in N. , यतः only in A.P.F. . अन्तिके for अन्तरे M.R. . भृशम् for ध्रुवम् B. .

गतागतैर्ध्रुवमथ खिद्यते श्रिया ॥ ३ ॥

तद्यावदमात्यराक्षसं पश्यामि । इति परिक्रम्य द्वारि स्थितः ।

ततः प्रविशत्यासनस्थः पुरुषेणानुगम्यमानः सचिन्तो राक्षसः ।

२ राक्ष० सबाष्पम् । कष्टं भोः कष्टम् ।

वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां
नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम् ।
चिन्तावेशसमाकुलेन मनसा रात्रिंदिवं जाग्रतः
सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते ॥ ४ ॥

अथ वा

नेदं विस्मृतभक्तिना न विषयव्यासङ्गमूढात्मना
प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना ।
अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
देवः स्वर्गगतोऽपि शात्रववधेनाराधितः स्यादिति ॥ ५ ॥

आकाशमवलोकयन् । भगवति कमलालये भृशमगुणज्ञासि । कुतः ।

आनन्दहेतुमपि देवमपास्य नन्दं
सक्तासि किं कथय वैरिणि मौर्यपुत्रे ।
दानाम्बुराजिरिव गन्धगजस्य नाशे
तत्रैव किं न चपले प्रलयं गतासि ॥ ६ ॥

इव for अथ in R.F., इह in the rest. पीड्यते श्रिया S., भिद्यते क्रिया (?) F.. अहम् added after यावद् B.O.. एव added before पश्यामि S.. इति...स्थितः omitted P.S.. २ स्वभवनगतः added after आसनस्थः in S.B.E.N.O.. सबाष्पम् omitted in S.; ऊर्ध्वमवलोक्य added before it in B.E.. सकले for विपुले S.. अथ वा omitted M.. व्यापार B.. मूढात्मना A.M.R.K.J.. प्रतिष्ठात्मना P.. प्रतिष्ठेच्छुना M.R.. अत्यन्तं P., भीयेत S.. वधैः for वधेन P.. हा added before भगवति R.. कमले S.. रक्ता S.B.N.O.. दुष्कुल for वैरिणि E.. गजप्रणाशे S..

अपि चानभिजाते

पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः
पतिं पापं मौर्यं यदसि कुलहीनं कृतवती ।
प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥ ७ ॥

अयि अविनीते तदहमाश्रयोन्मूलनेनैव त्वामकामां करोमि । विचिन्त्य । मया तावत् सुहृत्तमस्य चन्दनदासस्य गृहे गृहजनं निक्षिप्य नगरान्निर्गच्छता स्थाय्यमनुष्ठितम् । कुतः । कुसुमपुराभियोगं प्रत्यनुदासीनो राक्षस इति तत्रस्थानामस्माभिः सहैककार्याणां देवपादोपजीविनां नोद्यमः शिथिलीभविष्यति । चन्द्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयुक्तानां तीक्ष्णरसदायिनामुपसंग्रहार्थं परकृत्योपजापार्थं च महता कोशसंचयेन स्थापितः शकटदासः । प्रतिक्षणमरातिवृत्तान्तोपलब्धये तत्संहतिभेदनाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयः । तत् किमत्र बहुना ।

इष्टात्मजः सपदि सान्वय एव देवः
शार्दूलपोतमिव यं परिपुष्य नष्टः ।
तस्यैव बुद्धिविशिखेन भिनद्मि मर्म
वर्मीभवेद्यदि न दैवमदृश्यमानम् ॥ ८ ॥

ततः प्रविशति कञ्चुकी ।

हे added before अनभिजाते G. पापे in all but E. वृतवती in all but B.E. प्रकृत्यैवाकाश M.R. अपि च for अयि in all. अयम् added before अहम् G. यदयम् for तदहम् S. आश्रितो for आश्रयो F. गेहे for गृहे F. ; गृहे omitted G. निष्क्रामता G. किं कारणम् for कुतः B.E.N.G. उदासीनः for अनुदासीनः G. शरीरं द्रोग्धुं यातानाम् N. च added before तीक्ष्ण N. परकृत्योपक्षे(sic. परकृत्यपक्षो)पसंग्रहार्थम् S.E.G. वृत्तो for वृत्तान्तो P. भेदाय B.E.N. मया for च E. अत्र omitted P. एष for एव P.E. परिपोष्य in all but B.N.G. म(sic. व)र्मीभवेद् P.S. अदृश्यमानम् J.S.E.N.G. ; अदृश्यरूपम् A.P.F., अदृष्टरूपम् M.R.

३ कञ्चु०। कामं नन्दमिव प्रमथ्य जरया चाणक्यनीत्या यथा
धर्मो मौर्य इव क्रमेण नगरे नीतः प्रतिष्ठां मयि।
तं संप्रत्युपचीयमानमनु मे लब्धान्तरः सेवया
लोभो राक्षसवज्जयाय यतते जेतुं न शक्नोति च॥३॥

परिक्रम्य। इदममात्यराक्षसस्य गृहम्। यावत् प्रविशामि। प्रविश्यावलोक्य च। स्वस्ति भवते।

४ राक्ष०। आर्य जाजले अभिवादये। प्रियंवदक आसनमत्रभवतः।

५ पुरु०। एदं आसणं। उवविसदु अज्जो।

६ कञ्चु०। उपविश्य। कुमारो मलयकेतुरमात्यं विज्ञापयति। चिरात्प्रभृत्यार्यः परित्यक्तोचितसंस्कार इति पीड्यते मे हृदयम्। यद्यपि सहसा स्वामिगुणा न शक्यन्ते विस्मर्तुं तथापि मद्विज्ञापनां मानयितुमर्हत्यार्यः। इत्याभरणं दर्शयति। इदमाभरणं कुमारेण स्वशरीरादवतार्य प्रेषितं धारयितुमर्हत्यार्यः।

---

५ एतदासनम्। उपविशत्वार्यः।

---

३ इदममात्यराक्षसस्य गृहम्। यावत् प्रविशामि॥ विचिन्त्य॥ added after कञ्चु०॥ in S. जरसा N. यया for यथा M.R. प्रनष्य for क्रमेण M.R. अपि for अनु F.S.B.E.G. तम् for च P. इद......लोक्य च omitted in S.; दृष्ट्वा॥ अयममात्यराक्षसः॥ परिक्रम्योपसृत्य च॥ अमात्य for परि......लोक्य च॥ in B. ४ अवलोक्य added after राक्ष० E., विलोक्य S. जाजले omitted A.P.M.R.J.F.E. अत्रभवत उपनय for आनीयताम् in S.B., अत्रभवतः only in E.N.G. ५ प्रियं० for पुरु० F.B.R. ६ अमात्य added before कुमारो S.B.E.G. कुमारो omitted G. आर्यः omitted S.G. परित्यक्तशरीरोचित S.B.E.G. अमात्यः added after संस्कारः S. मम for मद् E. मानयन्त्वार्यः F. इत्याभरणानि in all but S.E.G. अमात्य added before इदम् S.B.E. इमान्याभरणानि and प्रेषितानि in all but S.E.G. आर्यः for अमात्यः B.E.N.G.

७ राक्ष॰। आर्य जाजले विज्ञाप्यतामस्मद्वचनात् कुमारः। विस्मृता मया भवद्गुणपक्षपातेन स्वामिगुणाः। किं तु

न तावन्निर्वीर्यैः परपरिभवाक्रान्तिकृपणै-
र्वहाम्यङ्गैरेभिः प्रतनुमपि संस्कारख्रचनाम्।
न यावन्निःशेषक्षपितरिपुचक्रस्य निहितं
सुगाङ्गे हेमाङ्कं नृवर तव सिंहासनमिदम्॥१०॥

८ कञ्चु॰। अमात्ये नेतरि सुलभमेतत् कुमारस्य। तत् प्रतिमान्यतां कुमारस्य प्रथमः प्रणयः।

९ राक्ष॰। आर्य कुमार इवानतिक्रमणीयवचनो भवानपि। तदनुष्ठीयतां कुमारस्याज्ञा।

१० कञ्चु॰ नाट्यान भूषणं परिधाप्य। स्वस्ति भवते। साधयाम्यहम्।

११ राक्ष॰। आर्य अभिवादये।

कञ्चुकी निष्क्रान्तः।

---

७ मद् for अस्मद् B·. मे for मया S·E·G, एव A·P·M·R· J·F·E·N·. तव for भवद् B·. पक्षपातिना E·. परिभवक्रान्त E·, परिभवाक्रान्त R·. क्षयित S·B·N·. हेमाङ्ग S·. ८ अमात्य added before अमात्ये S·E·G·. अमात्य for अमात्ये N·. त्वयि added before नेतरि B·E·N·. कुमारेण E·G·. परिमान्यताम् S·, परिपण्यताम् G·. प्रथमः omitted G·; प्रथमप्रणयः M·. ९ आर्य omitted R·. वत् for इव S·G·. इव नाति M·R·. मे added before भवान् M·G·. अनुष्ठीयते in all but E·. कुमाराज्ञा G·. १० आभरणानि in M·, भूषणानि in the rest. संधार्य E·. साधयाम्यहम् omitted G·. ११ ताम्बूलं दत्त्वा added after राक्ष॰ S·. अभिवादयाम्यहम् S·G·. सत्कृतो added before कञ्चुकी S·. कञ्चु॰। स्वनियोगं साधयाम्यहम्॥ इति सत्कृतो निष्क्रान्तः॥ for कञ्चुकी निष्क्रान्तः। in B·.

१२ राक्ष० । प्रियंवदक ज्ञायतां कोऽस्मद्दर्शनार्थी द्वारि तिष्ठति ।

१३ पुरु० । जं अमच्चो आणवेदि । परिक्रम्याहितुण्डकं दृष्ट्वा । अज्ज को तुमं ।

१४ आहि० । भद्द अहं खु आहितुण्डिओ जिण्णविसो णाम । इच्छामि अमच्चस्स पुरदो सप्पेहिं खेलिदुं ।

१५ पुरु० । चिट्ठ जाव अमच्चस्स णिवेदेमि । राक्षसमुपगम्य । अमच्च एसो खु सप्पजीवी इच्छदि सप्पेहिं अमच्चस्स पुरदो खेलिदुं ।

१६ राक्ष० वामाक्षिस्पन्दनं सूचयित्वा स्वगतम् । **कथं प्रथममेव सर्पदर्शनम् ।** प्रकाशम् । **प्रियंवदक न नः कुतूहलं सर्पदर्शने । तत् परितोष्य विसर्जयैनम् ।**

---

१३ यदमात्य आज्ञापयति । आर्य कस्त्वम् । १४ भद्र अहं खल्वाहितुण्डिको जीर्णविषो नाम । इच्छाम्यमात्यस्य पुरतः सर्पैः खेलितुम् । १५ तिष्ठ यावदमात्याय निवेदयामि । अमात्य एष खलु सर्पजीवीच्छति सर्पैरमात्यस्य पुरतः खेलितुम् ।

---

१२ अयम् added after कः B. . मद् for अस्मद् M.R. . द्वारे M.R. . १३ प्रियं० for पुरु० throughout M.R.B. . अज्जो for अमच्चो S.B.E.N. , देवो G. . निष्क्रम्य F.S.B.E.N.G. . प्रति for दृष्ट्वा G. . णं added before अज्ज B.N. ; भद्द for अज्ज S.G. . १४ जिण्णविसो णाम omitted S.G. . अमच्चरक्खसस्स F.S.B.N. . १५ दाव added before जाव G. ; दाव for जाव A.S.E. . अमच्चरक्खसस्स F. . अज्ज for अमच्च B.E. . खु omitted P.M.R. . सप्पजीवी S. , सप्पोपजीवी B.N. . सप्पं for सप्पेहिं A.P.M.R.J.F. . अमच्चस्स पुरदो omitted in all but B. . दंसेदुं for खेलिदुं A.P.M.R.J.F. . १६ मे for एव R. . भद्र added before प्रियंवदक R.E. . मे for नः E.G. . कौतूहलं in all but B.E. . अस्ति added after कुतूहलं B. . सर्पेषु for सर्पदर्शने in all but S.B.G. . इतः(sic. अतः) for तत् S.G. .

१७ प्रियं० । जं अमच्चो आणवेदि । आहितुण्डिकमुपसृत्य । अज्ज एसो खु दे दंसणफलेण अमच्चो पसादं करेदि । ण उण दंसणेण ।

१८ आहि० । भद्द विण्णवेहि मह वअणेण अमच्चं । ण केवलं अहं सप्पजीवी पाउअकवी खु अहं । ता जइ मे अमच्चो दंसणेण पसादं ण करेदि तदो एदं पत्तअं वाचेदुं पसीददु त्ति ।

१९ पुरु० पत्रं गृहीत्वा राक्षसमुपसृत्य । अमच्च एसो खु आहितुण्डिओ विण्णवेदि । ण केवलं अहं सप्पजीवी पाउअकवी खु अहं । ता जइ मे अमच्चो दंसणेण पसादं ण करेदि तदो एदं पत्तअं वाचेदुं पसीददु त्ति ।

---

१७ यदमात्य आज्ञापयति । आर्य एष खलु ते दर्शनफलेनामात्यः प्रसादं करोति । न पुनर्दर्शनेन । १८ भद्र विज्ञापय मम वचनेनामात्यम् । न केवलमहं सर्पजीवी प्राकृतकविः खल्वहम् । तस्माद्यदि मेऽमात्यो दर्शनेन प्रसादं न करोति तत एतत् पत्रकं वाचयितुं प्रसीदत्विति । १९ अमात्य एष खल्वाहितुण्डिको विज्ञापयति । न केवलमहं सर्पजीवी प्राकृतकविः खल्वहम् । तस्माद्यदि मेऽमात्यो दर्शनेन प्रसादं न करोति तत एतत् पत्रकं वाचयितुं प्रसीदत्विति ।

---

१७ तथा for जं... वेदि A·P·M·R·J· , तह F· . भद्द for अज्ज B·E·. अदंसणेण for दंसणफलेण S·B·N·; कज्जेण for फलेण A·P·M·R·J·F·. ण added before करेदि F· . उण omitted F· . सप्प added before दंसणेण A·P·M·J·F·N· ; संदंसणेण for दंसणेण R· . १८ सहसुह A·P·M·R·J·F· . मह वअणेण omitted A·P·M·R·J·F· . अहं before सप्प omitted S·E· . सप्पोपजीवी B·N·. मे omitted G· . दंसणपसादं for दंसणेण पसादं A· . ता for तदो in all but A·N· . वि added after एदं B·N· , वि दाव A· , तु E· . वाचेदु for वाचेदुं पसीददु in all but B·E·N· . १९ अज्ज for अमच्च A·P·M·R·J·F· . खु omitted E· . सप्पजीवी for आहितुण्डिओ E· , अमच्च for it in A·P·M·R·J·F· . अमच्चं added before विण्णवेदि G· . अहं omitted E· . सप्पोपजीवी B· . अहं omitted [illegible] R· . दंसणपसादं A·R· . ता for तदो S·G· ; ता omitted E· . वि दाव added after एदं in all but S·G· . वाचिअ for वाचेदुं S·G· . वाचेदु for वाचेदुं पसीददु A·P·M·R·J·F· .

२० राक्ष० पत्रं गृहीत्वा वाचयति ।

पाऊण णिरवसेसं कुसुमरसं अत्तणो कुसलदाए ।
जं उग्गिरेइ भमरो तं अण्णाणं कुणइ कज्जं ॥ ११ ॥

विचिन्त्य स्वगतम् । अये कुसुमपुरवृत्तान्तज्ञो भवत्प्रणिधिरिति गाथार्थः । कार्यव्यग्रत्वान्मनसः प्रभूतत्वाच्च प्रणिधीनां विस्मृतम् । इदानीं स्मृतिरुपलब्धा । व्यक्तमाहितुण्डिकच्छद्मना विराधगुप्तेनानेन भवितव्यम् । प्रकाशम् । प्रियंवदक प्रवेशयैनम् । सुकविरेषः । श्रोतव्यमस्मात् सुभाषितम् ।

२१ पुरु० । जं अमच्चो आणवेदि । आहितुण्डिकमुपगम्य । उवसप्पदु अज्जो ।

२२ आहि० नाट्येनोपसृत्य विलोक्य च स्वगतम् । अयममात्यराक्षसः

वामां बाहुलतां निवेश्य शिथिलं कण्ठे विवृत्तानना
स्कन्धे दक्षिणया बलान्निहितयाप्यङ्के पतन्त्या मुहुः ।
गाढालिङ्गनसङ्गपीडितमुखं यस्योद्यमाशङ्किनी
मौर्यस्योरसि नाधुनापि कुरुते वामेतरं श्रीः स्तनम् ॥१२॥

प्रकाशम् । जेदु अमच्चो ।

---

२० पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया । यदुद्गिरति भ्रमरस्तद्-न्येषामज्ञानां च करोति कार्यम् ॥ २१ यदमात्य आज्ञापयति । उपसर्पत्वार्यः । २२ जयत्वमात्यः ।

---

२० उग्गिरन्दि F·E· . भमरा F·G· . कुसुमरसम् । आम् तनो for कुसुमपुरवृत्तान्तज्ञो N· . अहं added before भवत् S·B·E·G· . त्वत् for भवत् S·G· . च added before इति S·B·E·G· . आः added before कार्य B·E·N· . विस्मृतम् omitted S· . कुसुमपुरादागतेन added after च्छद्मना S·B· . अनेन omitted S·G· . २१ तथा for जं......वेदि A·P·M·R·J·F· २२ संस्कृतमाश्रित्य added after स्वगतम् in all but E·G· . अये added before अयम् S·B·E·G· , स एव added after राक्षसः A·P·J· , स एष M·R·F· , निर्दान B·N· , निष्ठान्ति यः स एव E· . शिथिलां S·E· . निवृत्तानना in all but S·B·G· . मुखं for मुखं B· . जेदु twice S·B·E·N·G· . अज्जो for अमच्चो A·E· , देवो G· .

२३ राक्ष० विलोक्य। अये विराध-। इत्यर्धोक्ते विरूढस्मृतिः। प्रियंवदक भुजङ्गैरिदानीं विनोदयामः। तद्विश्रम्यतामितः परिजनेन। त्वमपि स्वाधिकारमशून्यं कुरु।

२४ पुरु०। जं अमच्चो आणवेदि। इति सपरिजनो निष्क्रान्तः।

२५ राक्ष०। सखे विराधगुप्त इदमासनम्। आस्यताम्।

विराधगुप्तो नाट्येनोपविष्टः।

२६ राक्ष० निर्वर्ण्य सबाष्पम्। अहो देवपादपद्मोपजीविनो जनस्यावस्था।

२७ विरा०। अलममात्य शोकेन। नातिचिरादमात्योऽस्मान् पुनः पुरातनीमवस्थामारोपयिष्यति।

२८ राक्ष०। सखे वर्णय कुसुमपुरवृत्तान्तम्।

२९ विरा०। अमात्य विस्तीर्णः खलु कुसुमपुरवृत्तान्तः। तत् कुतः प्रभृति वर्णयामि।

३० राक्ष०। सखे चन्द्रगुप्तस्य तावन्नगरप्रवेशात् प्रभृत्यस्मत्प्रयुक्तै-

२४ यदमात्य आज्ञापयति।

२३ विराधगुप्तः for विराध M·S·N·G·. विरूढस्मृतिः omitted in all but B·. ननु प्र[illegible]ः added before प्रियंवदक A·M·R·J·F·, न प्ररूढश्मश्रुः P·, विरूढश्मश्रुः S·E·, विरूढश्मश्रो N·G·. विनोदयितव्यम् A·P·M·R·J·F·. इतः omitted B·; मत for इतः G·, नः N·. स्वमधिकारम् for स्वाधिकारम् S·B·E·G·. २४ तथा for जं...... वेदि A·P·M·R·J·, तह F·. २५ विरा०। यदाज्ञापयत्यमात्यः। added before विराध......विष्टः S·B·E·N·G·. सबाष्पम् omitted A·P·M·R·J·F·E·; सखेदम् for सबाष्पम् B·N·. अये for अहो A·P·M·R·J·F·E·. नन्द added before देव G·. पद्म omitted A·P·M·R·J·F·. इयम् omitted E·N·G·. २७ अलम् twice M·R·F·. नूनम् for पुनः B·; पुनः omitted A·P·M·R·J·F·N·G·. २८ विराधगुप्त added after सखे S·B·. २९ खलु omitted B·E·G·. ततः for तत् M. आज्ञापय added before कुतः B·E·N·, आज्ञापयतु S·G·. कथयामि S·B·E·G·. ३० एव added after चन्द्रगुप्तस्य in all but B·N·. मत for अस्मत् B·E·

स्तीक्ष्णरसदायिभिः किमनुष्ठितमित्याद्यादितः श्रोतुमिच्छामि।

३१ विरा०। एष कथयामि। अस्ति तावच्छकयवनकिरातकाम्बोजपारसीकवाह्लीकप्रभृतिभिश्चाणक्यमतिपरिगृहीतैश्चन्द्रगुप्तपर्वतेश्वरबलैरुदधिभिरिव प्रलयोच्चलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम्।

३२ राक्ष० शस्त्रमाकृष्य ससंभ्रमम्। आः मयि स्थिते कः कुसुमपुरमुपरोत्स्यति। प्रवीरक प्रवीरक

प्राकारं परितः शरासनधरैः क्षिप्रं परिक्रम्यतां
द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयताम्।
मुक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले
ते निर्यान्तु मया सहैकमनसो येषामभीष्टं यशः॥ ३॥

३३ विरा०। अमात्य अलमावेगेन। वृत्तमिदं वर्ण्यते।

३४ राक्ष० निःश्वस्य। कथं वृत्तमिदम्। मया पुनर्ज्ञातं स एवायं काल इति। शस्त्रमुत्सृज्य सास्रम्। हा देव नन्द स्मरति ते राक्षसः

प्रणिधिभिः for प्रयुक्तैः B·. रसदैः F·S·G·. आद्यादितः omitted in E·, आदि omitted in the rest. ३१ पारसीक omitted A·P·. बाह्लीक omitted N·G·, पर्वतक G·. प्रलयकालचलितसलिलसंचयैः S·B·N·G, प्रलयकालचलितसलिलगम्भीरैः E·. ३२ आः omitted B·G·; अयि for आः A·P·M·R·J·F·N·. अवरोत्स्यति B·. प्रवीरक once A·P·, वीरक R·, वीरक वीरक S·G·. क्षिप्रमिदानीम् added after it in all; सर्वतः superadded in M·R·F·. प्राकारान् B·, प्राकारः E·. परिक्षिप्यतां S·B·G·, प्रतिक्षिप्यतां E·. पर for प्रति B·E·G·. त्यक्त्वा A·P·M·R·J·F·. शत्रोर्बलं दुर्बलं E·, शत्रोर्बले ये सदा S·. ३३ अलम् twice F·. इदानीम् added after वृत्तम् M·R·. ३४ निःश्वस्य omitted S·B·E·G·. कष्टम् for कथम् A·P·M·R·J·F·N·. अयम् omitted B·. वर्तते added before इति S·B·E·N·G·. कालम् omitted A·P·M·R··JN. सर्वार्थसिद्ध for नन्द E·. स्मरामि A·P·M·R·J·, अनुस्मरामि F·. राक्षस R·, राक्षसं प्रति A·P·M·J·F·.

प्रसादानाम्। त्वमत्र संग्रामकाले

यत्रैषा मेघनीला चरति गजघटा राक्षसस्तत्र याया-
देतत् पारिप्लवाम्भःप्लुति तुरगबलं वार्यतां राक्षसेन।
पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन् मह्यमाज्ञा-
मज्ञासीः प्रीतियोगात्स्थितमिव नगरे राक्षसानां सहस्रम्॥१४॥

विरा०। ततः समन्तादुपरुद्धं कुसुमपुरमवलोक्य बहुदिवसप्रभृति महदुपरोधवैशसमुपरि पौराणां परिवर्तमानमसहमाने तस्यामवस्थायां पौरजनापेक्षया सुरङ्गामेत्यापक्रान्ते तपोवनाय देवे सर्वार्थसिद्धौ स्वामिविरहात् प्रशिथिलीकृतप्रयत्नेषु युष्मद्बलेषु जयघोषणाव्याघातादिसाहसानुमितेष्वन्तर्नगरवासिषु पुनर्नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु चन्द्रगुप्तनिधनाय युष्मत्प्रयुक्तया विषकन्यया घातिते तपस्विनि पर्वतेश्वरे-

---

प्रसादातिशयम् A·P·M·R·J·F·. यः added before त्वम् S·B·E·N·G·. त्वेवंविधे for त्वमत्र संग्राम B· ; संग्राम dropped S·E·N·G·. चलति S·B·E·N·G·. पारिप्लवाम्भःप्रतितुरगबलं G·, पारिप्लवाभ्रद्रुततुरगबलं S·. धार्यताम् S·B·N·G·. राक्षसस्तन्नयतु A·P·, राक्षसोऽन्तर्नयतु S·N·G·. स्नेह for प्रीति B·. इह for इव S·B·G·. ततस्ततः added after the stanza B·E·N·G·. ३५ पुष्पपुरम् B·N·. प्रवृत्त for प्रभृति R·E·, प्रवृत्तं M·, प्रवृत्तमति A·P·J·N·. पौराणां परि omitted S·. अपि added after तस्याम् in all but B·N·. सुरङ्गामेत्य omitted S·N·. उपेत्य for एत्य B·. परिक्रान्ते for अपक्रान्ते M·, प्रक्रान्ते R·. तस्मात् added before तपोवनाय E·. सुशिथिलीकृत B·. युष्मद्बलेषु omitted S·. जय omitted S·E·G· ; जया for जय A·P·. घोषण M·. व्याघातादिना E·. मितान्तर्नगर S·B·N·G·. निवासिषु E·G·. पुनरपि in all but M·. सुरङ्गामधि (v·l· भि N·) गतेषु S·B·E·N·G·. युष्मासु omittde A·.

३६ राक्ष०। सखे पश्याश्चर्यम्।

कर्णेनेव विषाङ्गनैकपुरुषव्यापादिनी रक्षिता
हन्तुं शक्तिरिवार्जुनं बलवती या चन्द्रगुप्तं मया।
सा विष्णोरिव विष्णुगुप्तहतकस्यात्यन्तिकप्रीतये
हैडिम्बेयमिवैत्य पर्वतनृपं तद्वध्यमेवावधीत्॥ १५॥

३७ विरा०। अमात्य दैवस्यात्र कामचारः। किं क्रियताम्।

३८ राक्ष०। ततस्ततः।

३९ विरा०। पितृवधत्रासादपक्रान्ते कुमारे मलयकेतौ विश्वासिते पर्वतेश्वरभ्रातरि वैरोचके प्रकाशिते च चन्द्रगुप्तस्य नन्दभवनप्रवेशे चाणक्यहतकेनाहूयाभिहिताः सर्व एव कुसुमपुरनिवासिनः सूत्रधाराः। सांवत्सरिकादेशादद्यार्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यति। ततः प्रथमद्वारात्

---

३६ इह for इव before अर्जुनं R. चन्द्रगुप्त N. श्रेयसे for प्रीतये in all but E. हैडम्बेयम् G. इवेत्य R·J·F·B·E·G. यद् for तद् G. ३७ सखे for अमात्य G. अत्र omitted G. तत् किं S·G. अत्र क्रियते for क्रियताम् B·N. ३८ ततः om. A·R. ३९ ततः added before पितृ in all but M·G.; पितृ...केतौ omitted G. वधाद् for वधत्रासाद् A·P., वधपरित्रासाद् B. कुसुमपुरात् added after अपक्रान्ते B·N. कुमारे omitted M·R. च added before पर्वतक B·N. वैरोचने M·N., वैरोचनिके F., वैरोधके E. च omitted P·R·S·E·G. वंश for भवन E. चाणक्येन S·G. आहूय omitted P·M·G. कुसुमपुरवासिनः M·R. सूत्रकाराः M. यथा added before सांवत्सरिक in all but S·G. सांवत्सरिकदत्तलग्नवशाद् E., सांवत्सरिकवचनाद् B·N. अद्यैव B·N.; अद्य omitted A·P·M·R·J·F. एवाभिमतः added after समये B·N. वंश for भवन E. ततः omitted S·E·G. पूर्वद्वारात् A·R·J. पूर्वद्वारप्रवेशात् F., पुरद्वारप्रवेशात् P·M., अन्तःपुरद्वारप्रवेशात् S·E·G.

प्रभृति संस्क्रियतां राजभवनमिति। ततः सूत्रधारैरभिहितम्। आर्य प्रथममेव देवस्य चन्द्रगुप्तस्य नन्दभवनप्रवेशमुपलभ्य सूत्रधारेण दारुवर्मणा कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमं राजभवनद्वारम्। अस्माभिरिदानीमभ्यन्तरे संस्कार आधेय इति। ततश्चाणक्यबटुनानादिष्टेनैव सूत्रधारेण दारुवर्मणा संस्कृतं राजभवनद्वारमिति परितुष्टेन सुचिरं दारुवर्मणो दाक्ष्यं प्रशस्याभिहितम्। अचिरादस्य दाक्ष्यस्यानुरूपं फलं दारुवर्मन्नधिगमिष्यसीति।

४० राक्ष० स्वगतं सोद्वेगम्। कुतश्चाणक्यबटोः परितोषः। अफलमनिष्फलं वा दारुवर्मणः प्रयत्नमवगच्छामि। यदनेन बुद्धिमोहादथ वा राजभक्तिप्रकर्षान्नियोगकालमप्रतीक्षमाणेन जनितश्चाणक्यबटोश्चेतसि बलवान् विकल्पः। प्रकाशम्। ततस्ततः।

४१ विरा०। ततश्चाणक्यहतकेनानुकूललग्नवशादर्धरात्रसमये चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकमेकासने चन्द्रगुप्तेन सहोपविश्य कृतः पृथ्वीराज्यविभागः।

सत्कृते for संस्कृतं G. प्रथमं for प्रथमं A.P.M.R.J.B.E.; प्रथमं omitted F.S.G. राजद्वारे G., राजद्वारम् B. अपि added before अभ्यन्तरे G. विधेयः B.E.N. ततश्च A. सूत्रधारेण omitted R.B.E.G. इव added before सुचिरं A.P.M.R.J.N., एव S₂. दारुवर्माणं G.; दारुवर्मणो omitted E. दाक्षिण्यं S. अभिप्रशस्य S.G., अभिनन्द्य B.N. दाक्ष्यस्य omitted S. दारुवर्माधिगमिष्यति B., दारुवर्मणाधिगमिष्यते S. ४० स्वगतम् omitted in all. अधिगच्छामि A.P., अभिगच्छामि F. यदेनं न (sic. यदनेन) S. राजप्रकर्षं नयता for राजभक्तिप्रकर्षात् D., राजभक्तिप्रकर्षं नयता E., राजभक्तिप्रकर्षतया N. अभियोग for नियोग E. संजनितः B. महान् A. प्रकाशम् omitted in all. ततः once P.R. ४१ अद्य added before अर्ध B. वैरोचनिकम् F., वैरोचनम् S. पृथग् for पृथ्वी R., पृथिवी S.N.

४२ राक्ष॰। किमतिसृष्टं पर्वतेश्वरभ्रात्रे वैरोचकाय पूर्वप्रतिश्रुतं राज्यार्धम्।

४३ विरा॰। अथ किम्।

४४ राक्ष॰ स्वगतम्। नियतमतिधूर्तेन चाणक्यबटुना तस्यापि तपस्विनः कमप्युपांशुवधमाकलय्य पर्वतेश्वरविनाशेन जनितमयशः प्रमार्ष्टुमेषा लोकप्रसिद्धिरुपचरिता। प्रकाशम्। ततस्ततः।

४५ विरा॰। ततः प्रथममेव प्रकाशिते चन्द्रगुप्तस्यार्धरात्रे नन्दभवनप्रवेशे कृताभिषेके विमलमुक्तागुणपरिक्षेपोपरचितपट्टमयप्राव-

राज्यप्रविभागः G·, राज्यार्धप्रविभागः N·, राज्यार्धविभागः S·, राज्यार्धभागः B·. ४२ किं वातिसृष्टः A·P·M·R·J·F·, किं चातिसृष्टः B·, किमतिसृष्टः S·E·G·, किमभिसृष्टः N·. पर्वतक A·P·M·R·J·FE·, पर्वत N·. वैरोचनिकाय F·. पूर्व omitted G·, प्रतिश्रुतः in all but E·. राज्यार्धविभागः in all but E·G·; राज्यार्धप्रविभागः G·. ४३ अमात्य added before अथ B·E·N·. ४४ चाणक्य omitted S·E·G·; धूर्त for चाणक्य B·N·. एकान्ते added before कमपि G·; कथमपि for कमपि M·R·F·. उपायान्तर for उपांशु G·. विनाशजनितम् F·, विनाशजनितस्य S·B·E·N·G·. अपयशः M·R·, अयशसः B·E·N·G·, अपयशसः S·. परिहारार्थम् for प्रमार्ष्टुम् S·B·E·N·G·, परिमार्ष्टुम् R·. एव for एषा G·. लोकोक्तिः E·, लोकप्रतिपत्तिः N·. उपचिता A·P·M·R·J·. ततः once R·. ४५ प्रकाशीकृते B·E·N·. रात्रौ for अर्धरात्रे in all but B·N·. किल added after कृताभिषेके A·P·M·R·J·F·, च B·, च किल N·. वैरोचके added before विमल in all but G·. हिमविमल B·E·N·. मणि for गुण A·P·M·R·J·F·, गण N·. परिक्षेपेणोप S·G·, परिक्षेपवि A·P·M·R·J·F·. चित्र added after रचित A·P·M·R·J·E·N·, विचित्र F·S·. पटमय A·P·M·R·J·F·N·, पट्टामल S·, पट्ट(sic· पट्ट)B·. वारवाण for प्रावरण A·P·M·R·J·F·S·B·, बाणवार E·, वारण N·.

रणप्रच्छादितशरीरे मणिमयमुकुटनिबिडनियमितरुचिरतरमौलौ सुरभिकुसुमदामवैकक्षकावभासितविपुलवक्षःस्थले परिचितदर्शनैरप्यनभिज्ञायमानाकृतौ चाणक्यहतकादेशाच्चन्द्रगुप्तोपवाह्यां चन्द्रलेखां नाम गजवशामारुह्य चन्द्रगुप्तानुयायिना राजलोकेनानुगम्यमाने देवस्य नन्दस्य भवनं प्रविशति वैरोचके युष्मत्प्रयुक्तेन सूत्रधारेण दारुवर्मणा चन्द्रगुप्तोऽयमिति मत्वा तस्योपरि पातनाय सज्जीकृतं यन्त्रतोरणम्। अत्रान्तरे बहिर्निगृहीतवाहनेषु स्थितेषु चन्द्रगुप्तानुयायिषु नृपेषु युष्मत्प्रयुक्तेन चन्द्रगुप्तनिपादिना बर्बरकेणान्तर्निहितामसिपुत्रिकामाक्रष्टुकामेनावलम्बिता करेण कनकशृङ्खलालम्बिनी कनकदण्डिका।

४६ राक्ष० स्वगतम्। उभयोरप्यस्थाने यत्नः।

४७ विरा०। अथ जघनाभिघातमुत्प्रेक्षमाणा गजवधूरतिजवनतया

मणिमुकुट S·G·. बन्ध added before निबिड E·, पट्टबन्ध N·, पट्ट-(sic· पट्ट)बन्ध B·, बद्ध G·, निबद्ध S·. नियत for नियमित B·. वैकक्ष्याव A·P·M·R·J·F·, वैकक्षका S·B·N·G·. विपुल omitted B·. परिचितै: P·, परिचिततमैः A·M·R·J·F·S·E·N·. ज्ञायमानरूपाकृतौ E·G·, ज्ञायमाने नृपाकृतौ B·N·. चाणक्याज्ञया E·, चाणक्यहतकस्याज्ञया B·N·, चाणक्यहतकोपदेशात् F·. वाह्यं F·. चन्द्रलेखं F·, चन्द्रलेखाभिधानां B·N·. गजवरम् F·, नागवशाम् E·. जवेन added before देवस्य B·. नन्ददेवस्य for देवस्य नन्दस्य S·B·G·. वैरोचनिके F·. सूत्रधारेण omitted A·P·. मन्यमानेन S·B·E·G·. वैरोचकस्य for तस्य S·B·E·N·G·. निपातनाय B·N·. तोरणयन्त्रम् S·. हि for बहिः G·. गृहीत for निगृहीत M·. वारणेषु R·F·. स्थितेषु omitted G·. भूमिपालेषु S·B·E·G·. एव added before चन्द्रगुप्त in all. वधाय added after चन्द्रगुप्त G·. कनकदण्डिकान्तर्निहिताम् A·P·M·R·J·F·E·N·G·, कनकदण्डान्तर्निहिताम् B·, कनकदण्डिकान्तर्हितां वाहनस्थिताम् S·. शृङ्खलामुखा for शृङ्खला E·, शृङ्खलामुखाव F· B·. ४६ स्वगतम् omitted in all but S·E·. ततस्ततः added at the end B·N·. ४७ घनाभि M·, जनाभि G·. अतिजवतया F·E·. ततः

गत्यन्तरमारूढवती। प्रथमगत्यनुरोधप्रत्याकलितमुक्तेन प्रभ्रष्टलक्ष्यं पतता यन्त्रतोरणेनाकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव चन्द्रगुप्ताशया वैरोचकं हतस्तपस्वी बर्बरकः। ततो दारुवर्मणा यन्त्रतोरणनिपातनादात्मवधमाकलय्य पूर्वमेवोत्तुङ्गतोरणस्थलमारूढेन यन्त्रघट्टनबीजं लोहकीलकमादाय हस्तिनीगत एव हतस्तपस्वी वैरोचकः।

४८ राक्ष०। कष्टमनर्थद्वयमापतितम्। न हतश्चन्द्रगुप्तो हतौ वैरोचकबर्बरकौ दैवेन। अथ सूत्रधारो दारुवर्मा कथम्।

४९ विरा०। वैरोचकपुरःसरेण पदातिलोकेनैष लोष्टघातं हतः।

---

added before प्रथम B·N·. भ्रष्टलक्ष्यं B·E·, च भ्रष्टलक्ष्यं N·. यतता S·. उत् for आकृष्ट E·G·. कृपाण M·R·S·, कृपाणीको B·N·. पाणिना S·. अनासादयतैव S·, अनासाद्यैव B·N·. चन्द्रगुप्तप्रत्याशया B·N·. वैरोचनिकं F·. दारुवर्मणा added before हतः S·B·E·. यन्त्रतोरण omitted S·. पातनाद् S·, पातम् B·G·N·, निपातम् E·. आत्मविनाशम् for आत्मवधम् S·, आत्मविनाशफलम् B·E·N·G·. अवधार्य S·B·G·. शीघ्रम् for पूर्वम् S·B·G·. स्थानम् for स्थलम् B·N·. आरूढो S·. घटन S·B·N·G·. बीजलोह B·, हेतुलोह P·, हेतुं लोह A·M·R·J·. कीलमादाय R·. हस्तिगत S·. एव omitted M·R·. तपस्वी omitted E·. वैरोचनिकः F·. ४८ हा added before कष्टम् R·S·B·E·N·. असौ added before हतौ B·N·. च added after हतौ F·. वैरोचनिक F·. दैवेन omitted S·E·G·. स्वगतम् ॥ न हतौ तौ। सर्वथा हता वयम् ॥ प्रकाशम् ॥ added before अथ in E·, स्वगतम् ॥ न तौ हतौ। हता वयम् ॥ प्रकाशम् ॥ in G·, सावेगमात्मगतम् ॥ नैतौ हतौ दैवेन। सर्वथा वयमेव हताः ॥ प्रकाशम् ॥ in S·, सावेगमात्मगतम् ॥ नैतावुभौ हतौ दैवेन। वयमेव हताः ॥ प्रकाशम् ॥ in B·N·. स added after अथ B·N·. क for कथम् B·N·. ४९ वैरोचनिक F·. पुरःसरैः B·N·. लोकैः B·N·. एव for एष N·; एष omitted E·. लोष्टघातेन M·. घातितः F·.

५० राक्ष० सास्रम् । कष्टमहो वत्सलेन सुहृदा दारुवर्मणा वियुक्ताः स्मः । अथ तेन भिषजाभयदत्तेन किमनुष्ठितम् ।

५१ विरा० । सर्वमनुष्ठितम् ।

५२ राक्ष० सहर्षम् । अपि हतश्चन्द्रगुप्तहतकः ।

५३ विरा० । अमात्य दैवान्न हतः ।

५४ राक्ष० सविषादम् । तत् किमिति कथयसि सर्वमनुष्ठितमिति ।

५५ विरा० । अमात्य कल्पितमनेन योगचूर्णमिश्रितमौषधं चन्द्रगुप्ताय । तत् प्रत्यक्षीकुर्वता चाणक्यहतकेन कनकभाजने वर्णान्तरमुपलभ्याभिहितश्चन्द्रगुप्तः । वृषल सविषमिदमौषधम् न । पातव्यमिति ।

५६ राक्ष० । शठः खल्वसौ बटुः । अथ स वैद्यः कथम् ।

५७ विरा० । स खलु वैद्यस्तदेवौषधं पायितश्चोपरतश्च ।

---

५० भोः added before कष्टम् B·N· . कष्टम् twice M·B·N· . वत्सलेनैव S· . दारुवर्मणा omitted S·E·G· . विप्रयुक्ताः G· . तत्रत्येन for तेन A·M·J·N· , तत्र तेन P·R·F·B·E· . ५१ अमात्य added before सर्वम् B·E·G· . अनुष्ठितम् omitted G· . ५२ अपि सखे for अपि S·N·G· , अपि नाम सखे B· , किं A·P·M·R·J·F· . दुरात्मा चन्द्रगुप्तः for चन्द्रगुप्तहतकः A·P·M·R·J·F· . ५३ अमात्य omitted E· . ५४ किमिदानीं in all but E· . परितुष्टः added after किमिति B·E· . ५५ प्रयोग for योग F· , विष B· , विषयोग E· . चूर्णित for चूर्ण R· . मिश्रित omitted E· ; मिश्र for मिश्रित B·G· ; मिश्रौषधं S· . तच्च S·B·E·G· . पान for कनक S· . भाजनस्य वर्णान्तरगमनम् E· . उपगतम् added before उपलभ्य A·B· . वृषल twice S·B·E·G· . इदम् omitted M·R·B·. न पातव्यं न पातव्यमिति E· ५६ स omitted M·S·G· . ५७ ततः added before स E· . स खलु वैद्यः omitted in all but B·E· . पायित उपरतश्च B· , पायितो मृतश्च A·P·M·R·J·F· .

५८ राक्ष० सविषादम् । अहो महान् विज्ञानराशिरुपरतः । अथ तस्य शयनाधिकृतस्य प्रमोदकस्य किं वृत्तम् ।

५९ विरा० । आत्मविनाशः ।

६० राक्ष० सोद्वेगम् । कथमिव ।

६१ विरा० । स खलु मूर्खस्तं युष्माभिरतिसृष्टं महान्तमर्थराशिमवाप्य महता व्ययेनोपभोक्तुमारब्धवान् । ततः कुतोऽयं भूयान् धनागम इति पृच्छ्यमानो यदा वाक्यभेदान् बहूनगमत् तदा चाणक्यहतकेन विचित्रेण वधेन व्यापादितः ।

६२ राक्ष० सोद्वेगम् । कथमत्रापि दैवेनोपहता वयम् । अथ शयितस्य चन्द्रगुप्तस्य शरीरे प्रहर्तुमस्मत्प्रयुक्तानां नरपतिशयनगृहस्या-

---

५८ सविषादम् omitted in E· ; सोद्वेगम् for it S· . अहह B·E· ; अहो omitted G· . महान् कार्यराशिः S· , महाकार्यराशिः N·G· . भद्र added before अथ B· , सखे E· ; अथ omitted E·G· . तस्य omitted M· . ५९ यदितरेषाम् for आत्मविनाशः A·P·M·R·J·F·E· ; यदितरेषाम added before आत्मविनाशः S· . ६० सोद्वेगम् omitted S·. इव omitted E· . ६१ अनुसृष्टम् A·P· . प्रभूतम् for महान्तम् E· . जालम् for राशिम् R· . आरब्धः S·E·G· . ततः omitted S·G· . अयं omitted P·S·G· ; एवं for अयं E· . तव added before इति S·B·E·N·G· . अयं added before यदा B·N· . अवदत् M·R· , अकथयत् B·N· ; आगमत् S· . ततः for तदा F· . चाणक्यहतकादेशाद् for चाणक्यहतकेन S·B·E·N·G· , चाणक्येन P·. विचित्रवधेन A·P·M·R·J·F· . ६२ सोद्वेगम् omitted A·P·R·F· ; सविषादम् M· . वयमेवोपहता दैवेन B·E·N· . शरीरं F·. राजगृहस्य for नरपतिशयनगृहस्य A·P·M·R·J·F·, नरपतिगृहस्य

न्तर्भित्ति सुरङ्गामेत्य निवसतां बीभत्सकादीनां को वृत्तान्तः।

६३ विरा०। अमात्य दारुणो वृत्तान्तः।

६४ राक्ष० सावेगम्। न खलु विदितास्ते तत्र निवसन्तश्चाणक्यहतकेन।

६५ विरा०। अथ किम्। प्राक् चन्द्रगुप्तप्रवेशात् प्रविष्टमात्रेणैव दुरात्मना चाणक्येन शयनगृहं समन्तादवलोकितम्। ततोऽन्यस्माद्भित्तिच्छिद्राद् गृहीतभक्तावयवां निष्क्रामन्तीं पिपीलिकापङ्क्तिमवलोक्य पुरुषगर्भमेतद् गृहमिति गृहीतार्थेन दाहितं तच्छयनगृहम्। तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथमपिहि-

---

G. अन्तः for अन्तर्भित्ति S·B·E·N·G. सुरङ्गायाम् for सुरङ्गामेत्य B·N. को वा A·P. ६३–६४ These two speeches are omitted in M·R. ६४ सोद्वेगम् G.; सावेगम् omitted P. कथं दारुणो वृत्तान्तः। added before न खलु A·P·J·F·S·B·E·N. तत्र तु P., तत्रैव F.; तत्र omitted N·G. वसन्तः G. चाणक्येन F., चाणक्यहतकस्य E.; चाणक्यहतकेन omitted S·N·G. ६५ अमात्य अथ किम् M·R. अमात्य omitted. S·B·N·G. राक्ष०॥ कथमिव॥ विरा०॥ added before प्राक् in B. दुरात्मना omitted N. चाणक्यहतकेन A·P·M·R·J·F·S·E·G. शयनगृहे S·B·G. समन्ताद् omitted S·E·G.; निपुणम् for it A·P·M·R·J·F. अवलोकिते S·B·G.; अवलोकयता A·P·M·R·J·F. कस्माच्चिद् for ततोऽन्यस्माद् A·P·M·R·J·F., ततस्तस्माद् S·G., ततस्त्वेकस्माद् B. पिपीलिकाम् G·N. गृहीतभक्तावयवानां पिपीलिकानां निष्क्रामन्तीं पङ्क्तिम् E. आलोक्य S. तत् omitted F.; तच्छयनगृहम् omitted G. एव added before शयन E., अन्तः B·N. धूमाभिरुद्ध N·G., धूमनिवहनिरुद्ध E. दृष्टिविषयाः S·B·E·G., विषयाः N. प्रथमम् for प्रथम A·P·M·R·J·B.

तमनधिगम्य द्वारं सर्व एव बीभत्सकादयो ज्वलनमुपगम्य तत्रैव नष्टाः।

६६ राक्ष॰ सास्रम्। कष्टं भोः कष्टम्। सखे पश्य दैवसंपदं दुरात्मनश्चन्द्रगुप्तस्य। कुतः

कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया
दैवात् पर्वतकस्तया विनिहतः यस्तस्य राज्यार्धहृत्।
ये शस्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता
मौर्यस्यैव फलन्ति तस्य विविधश्रेयांसि मन्नीतयः ॥ १६ ॥

६७ विरा॰। अमात्य तथापि प्रारब्धमपरित्याज्यमेव। पश्यत्वमात्यः।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

अपिहितनिर्गमनमार्गम् B., अभिहितनिर्गमनमार्गम् A.P.J., पिहितम् F., विहितम् M.R.. अनुगम्य N.G.. द्वारं omitted B.. निग-(sic. निर्ग)मनपथं for द्वारं E.. सर्वेऽपि बीभत्सकादयस्तत्रैव ज्वलिताः for सर्व......नष्टाः E., सर्व एव बीभत्सादयस्तत्रैव ज्वलनमुपगता उपरताश्च B., तदैव संतापाद् दुरात्मानः सर्व एवोपरताः S.N.G., तत्रैव नष्टाः F.   ६६ सचिन्तः for सास्रम् G.. कष्टं भोः omitted N.G., कष्टं भोः कष्टम् omitted M.R.F.S.B.E.. सखे...कुतः omitted N.. विचिन्त्य। added before सखे G.. सखे पश्य चन्द्रगुप्तस्य दैवसंपदा सर्व एवोपरताः। सचिन्तम्। added before सखे in B.. दैवसंपदः G., संपदं E.. दुरात्मनः omitted M.R.F.. चन्द्रगुप्तहतकस्य A.P.J.B.N.. कष्टम् added before कुतः S.. पूर्वं for गूढं E.. न निहतो A.P.M.R.J.F.. भाक् for हृत् B.G.. यन्त्रेषु for शस्त्रेषु B.. पश्य for तस्य in all but M.R.. मे नीतयः B.E.N..   ६७ खलु added after तथापि A.P.M.J.F.E.. इति for एव E.. पश्य for पश्यत्वमात्यः A.P.M.R.J.F.E.; आरभ्यते G.. निहता B..

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजनास्त्वमिवोद्वहन्ति ॥ १७॥

अपि च

किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किं त्वङ्गीकृतमुत्सृजन् कृपणवच्छ्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेकं हि गोत्रव्रतम् ॥ १८॥

६८ राक्ष० । सखे प्रारब्धमपरित्याज्यमिति प्रत्यक्षमेवैतद् भवतः । ततस्ततः ।

६९ विरा० । ततः प्रभृति चन्द्रगुप्तशरीरे सहस्रगुणमप्रमत्तश्चाणक्यहतक एभ्य एतदीदृशं भवतीत्यन्विष्य निगृहीतवान् कुसुमपुरनिवासिनो युष्मदीयानाप्तपुरुषान् ।

७० राक्ष० सावेगम् । कथय कथं के के निगृहीताः ।

सहस्रगुणितैः for पुनः पुनरपि E· . गुणाः for जनाः in all. न परित्यजन्ति for त्वामिवोद्वहन्ति A·P·M·R·J·F· . अपि च omitted E· ; तथा च for it S· . चार्यो for श्लाघ्यो N· . निर्व्यूढिः E·G· , निर्व्यूढं A·P·M·R·J·F·. एतद्धि for एकं हि A·P·M·R·J·F·B·N· . ६८ सखे omitted S·G· . एव omitted S·B· . एतद् omitted G· . भवताम् A·P·M·R·J·F·S·N· · ततः once A·R· . ६९ चन्द्रगुप्तस्य शरीरे B·N· . हतक omitted M·R·F·E· . एभ्यः omitted S·G· . एव for एतद् B· . भविष्यति for भवति P·S·B·N·G· . अन्विष्य twice S·B· . कुसुम omitted A·P·M·R·J·F· ; वासिनो for निवासिनो M·R· ; कुसुमपुरवासिनो omitted N· . युष्मत् for युष्मदीयानाप्त E· , नन्दामात्य B· ; आर्य for आप्त M· . गुप्त added before पुरुषान् G· . ७० सोद्वेगम् A·P·M·R·J·F·N· . कथय कथं omitted M·R· ; अथ for कथय कथं G·S· , वयस्य अथ B·E· ; कथय for कथं A·J·F·N· .

७१ विरा०। प्रथमं तावत् क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः।

७२ राक्ष० स्वगतम्। एतत् तावत् सह्यम्। न निष्परिग्रहं स्थानभ्रंशः पीडयिष्यति। प्रकाशम्। वयस्य कमपराधमुद्दिश्य निर्वासितः।

७३ विरा०। एष राक्षसप्रयुक्तो विषकन्यया पर्वतेश्वरं व्यापादितवानिति।

७४ राक्ष० स्वगतम्। साधु कौटिल्य साधु

परिहृतमयशः स्वीयं पातितमस्मासु घातितोऽर्धहरः।
एकमपि नीतिबीजं बहुफलतामेति यस्य तव ॥ १३ ॥

प्रकाशम्। ततस्ततः।

७५ विरा०। ततश्चन्द्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता दारुवर्मादय इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः।

७६ राक्ष० सास्रम्। हा सखे शकटदास अयुक्तस्तवायमीदृशो मृत्युः।

---

७१ अमात्य added before प्रथमं B·E·N·. आदावेव for प्रथमं S·B·E·. तावत् omitted G·. ७२ एतावत् for एतत् तावत् A·P·J·F·B·N·G·. शक्यम् for सह्यम् A·P·M·R·F·S·E·G·. परिभ्रंशः B·E·. पीडयति M·R·. वयस्य omitted M·; सखे for it S·B·E·N·G·. कथय added before कम् E·. निर्वासितः omitted G·. एष added at the end B·, जीवसिद्धिः E·. ७३ दुरात्मा added after एष B·. प्रयुक्तया विष in all but S·N·G·; प्रयुक्तविष G·. कन्यकया F·. घातितवान् S·B·E·N·G·. ७४ कौटिल्य omitted S·. कुतः added after साधु S·E·N·G·. स्वस्मिन् added before परि A·P·M·R·J·F·, नूनं E·. अपहृतम् for परिहृतम् A·P·. अप(sic· अ)यशः R·. स्वीयं omitted in all but N·. च added after अस्मासु B·. राज्य for अर्ध in G·, राज्यार्ध in S·, अर्धराज्य in the rest. ततः once M·R·. ७५ दारुचर्मणा S·. ७६ हे for हा A·P·. वयस्य for सखे E·. अयुक्तरूपः A·P·M·R·J·F·.

अथ वा स्वाम्यर्थमुपरतो न शोच्यस्त्वम्। वयमेवात्र शोच्या ये नन्दकुलविनाशेऽपि जीवितुमिच्छामः।

७७ विरा०। अमात्य नैवम्। स्वाम्यर्थ एव साश्रयितव्य इति प्रयतसे।

७८ राक्ष०। सखे

अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम्।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥ २० ॥

७९ विरा०। अमात्य नैतदेवम्।

युष्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम्।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥ २१ ॥

८० राक्ष०। सखे कथ्यतामपरस्यापि सुहृद्व्यसनस्य श्रवणे सज्जोऽस्मि।

अथ वा omitted P. स्वाम्यर्थे S.G. असि added after त्वम् S.B.E.N.; असि for त्वम् G. एव omitted A.P. अपि for एवात्र E. अनुशोच्याः for अत्र शोच्याः G. येन for ये R.G. कुलनाशे R. ७७ नैवम् omitted A.P.M.R.J.F.N.; नैतदेवम् for it S.B.E.G. न वयं शोच्याः added after इति E. इति omitted B. प्रयतसे omitted S.B.E.G. ७८ सखे omitted F. अस्माकम् for अस्माभिः B.G. अवलम्ब्य for आलम्ब्य न B.G. जिजीविषा B.G. ७९ अस्माकम् for युष्माभिः B.N. अवलम्ब्य for आलम्ब्य न B.N. जिजीविषा B.N. कृतघ्नैः B.E. The whole speech is omitted in A.P.M.R.J.F.S. ८० राक्ष०। सखे omitted and the remaining portion read in continuation of मु.रा. ।२।७८। in A.P.M.R.J.F.S.G. सुहृदो for सुहृद P.; व्यसनशतस्य B.N.; श्रवणाय S. व्यसनश्रवणे A.P. सज्जा वयम् S.B.N.G.

८१ विरा०। एतदुपलभ्य चन्दनदासेन दृढसौहार्देनापवाहितममात्य-कलत्रम्।

८२ राक्ष०। सखे क्रूरस्य चाणक्यवटोर्विरुद्धमयुक्तमनुष्ठितं तेन।

८३ विरा०। अमात्य नन्वयुक्ततरः सुहृद्द्रोहः।

८४ राक्ष०। ततस्ततः।

८५ विरा०। ततो याच्यमानेनापि यदा न समर्पितमनेनामात्यकलत्रं तदातिकुपितेन चाणक्यवटुना

८६ राक्ष० सावेगम्। न खलु व्यापादितः।

८७ विरा०। न हि। गृहीतसारः सपुत्रकलत्रः संयम्य बन्धनागारे निक्षिप्तः।

८८ राक्ष०। तत् किं परितुष्टः कथयस्यपवाहितं राक्षसकलत्रमिति। ननु वक्तव्यं संयमितः सपुत्रकलत्रो राक्षस इति।

---

८१ ततः added before एतद् B·E·N·. उपरूढ for दृढ B·, उपारूढ N·; दृढ omitted S·G·; दृढसौहार्देन omitted A·P·M·R·J·F·. राक्षस added after अमात्य M·E·. ८२ सखे omitted A·P·M·R·J·F·. नार्पितमिति added after वटोः E·G·, न समर्पितमिति S·. अयुक्तम् omitted B·N·. चन्दनदासेन for तेन S·B·E·N·G·. ८३ नन्वयुक्तः S·, न युक्ततरः E·N·G·. ८४ ततः once M·R·. ८५ यतो for ततो S·. अपि omitted A·P·M·R·J·F·N·. अनेन omitted F·. ततः for तदा S·B·E·N·G·. ८६ सावेगम् S·G·; सोद्वेगम् omitted B·. न for न B·. ८७ न हि न हि for न हि A·P·, न खलु व्यापादितः S·B·N·. किं तु added before गृहीत S·B·E·N·G·. हृत for गृहीत G·. संयम्य omitted A·P·M·R·J·F·S·G·. क्षिप्तः for निक्षिप्तः G·. ८८ सखे added before तत् A·P·M·F·S·. ततः for तत् B·N·; तत् omitted G·. किमिति for किम् E·, किं नु G·. अनेन added before राक्षस S·B·E·N·. वक्तव्यं omitted S·. संयतः S·B·N·G·, गृहीतस्तेन E·. पुत्र omitted S·B·N·G·.

८९ प्रविश्य पटाक्षेपेण पुरुषः। जेदु अमच्चो। एसो खु सअडदासो पडिहारभूमिं उवट्ठिदो।

९० राक्ष०। अपि सत्यम्।

९१ पुरु०। अमच्चपादोपजीविणो जणा ण अलिअं मन्तिदुं जाणन्ति।

९२ राक्ष०। सखे विराधगुप्त कथमेतत्।

९३ विरा०। अमात्य स्यादेवम्। यतो भव्यं रक्षति भवितव्यता।

९४ राक्ष०। प्रियंवदक यद्येवं तत् किं चिरयसि। क्षिप्रं प्रवेशयैनम्।

९५ पुरु०। जं अमच्चो आणवेदि। निष्क्रान्तः।

ततः प्रविशति सिद्धार्थकेनानुगम्यमानः शकटदासः।

---

८९ जयत्वमात्यः। एष खलु शकटदासः प्रतीहारभूमिमुपस्थितः। ९१ अमात्यपादोपजीविनो जना नालीकं मन्त्रयितुं जानन्ति। ९५ यदमात्य आज्ञापयति।

---

८९ ततः added in the beginning S·G·. जेदु twice S·B·E·N·G·. अज्जो for अमच्चो S·B·G·. अमच्च added before एसो E·, अज्ज S·B·N·G·. भूमीए S·G·. ९० सहर्षम् added after राक्ष० S·E·. भद्र added before अपि A·P·M·J·F·S·E·, प्रियंवदक B·N·G·. ९१ प्रिय० for पुरु० B·N·. अमच्च पादोपजीविजनो for अमच्च...जणा in E·, अमच्चपादोपजीविणो in B·N·, अमच्चपादेसु in A·P·M·R·J·F·. णं for ण G, किं A·P·M·R·J·F·S·B·N·; ण omitted E·. जानादि E·; णिवेदेमि for मन्तिदुं जाणन्ति A·P·M·J·, विणिवेदेमि R·, विण्णविज्जदि F·. ९२ किम् for कथम् B·N·. ९३ स्यादेवम् omitted B·. एतद् added after स्याद् R·J·E·N·G·. यतो omitted B·E·. हि added after यतो G·. भवितव्यं for भव्यं G·. खलु added after रक्षति B·E·. ९४ यद्येवं तत् omitted A·P·M·R·J·F·. तर्हि for तत् S·G·. अद्यापि added after किम् A·P·M·R·J·F·. विचारयसि for चिरयसि F·S·G·, विलम्बयसि E·. क्षिप्रमेव R·. प्रवेश्य E·. समाश्वासय for एनम् G·, मामाश्वासय S·, समाश्वासय माम् E·. ९५ तथा for जं...वेदि A·P·M·R·J·F·.

९६ शक० स्वगतम् ।

दृष्ट्वा मौर्यमिव प्रतिष्ठितपदं शूलं धरित्र्यास्तले
तल्लक्ष्मीमिव चेतनाप्रमथनीमाबध्य वध्यस्रजम् ।
श्रुत्वा स्वाम्यपरोपरोधविषमानाघाततूर्यस्वनान्
न ध्वस्तं प्रथमाभिघातकठिनं मन्ये मदीयं मनः ॥२२॥

नाट्येनावलोक्य सहर्षम् । अयममात्यराक्षसस्तिष्ठति य एष

अक्षीणभक्तिः क्षीणेऽपि नन्दे स्वाम्यर्थमुद्वहन् ।
पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ॥२३॥

उपसृत्य । जयत्वमात्यः ।

९७ राक्ष० विलोक्य सहर्षम् । सखे शकटदास दिष्ट्या कौटिल्यगोचरगतोऽपि त्वं दृष्टोऽसि । तन् परिष्वजस्व माम् । इति परिष्वज्य । इदमासनम् । आस्यताम् ।

९८ शक० । यदाज्ञापयत्यमात्यः । इत्युपविष्टः ।

---

९६ स्थले for तले A·P·M·R·J·F· . उद्बध्य for आवध्य S· , उन्मुच्य B·N·G· . कण्ठ for वध्य N·G· . मूर्धावबद्धां स्रजम F· , मूर्धावबद्धस्रजाम् P·M·J· , मूर्धावबद्धस्रजम् R· , मूर्धावबध्य स्रजम् A· . स्वाम्युपरोध [illegible] , [illegible] M·R· . यत्तद् for मन्ये A·P·M·R·J·F· . [illegible] added before अयम् S·E· . स एष E· . क्षीणेऽपि S· . नन्दे omitted S·E·N·G· . स्वाम्यर्थं G· . धुरम् added before उद्वहन् S·E·N·G· . ९७ सखे omitted [illegible] . गोचरोऽपि for गोचरगतोऽपि F· . कौटि...गतोऽपि त्वम् omitted [illegible] ; त्वम् only omitted B·E·G· . शकटदासस्तथा करोति ॥ राक्ष० चिरं परिष्वज्य for इति परिष्वज्य A·P·M·R·J·F· , शकटदास उपसर्पति ॥ राक्ष० चिरं परिष्वज्य E· . ९८ शकटदासो नाट्येनोपविष्टः । for शक० । यदा...विष्टः । A·P·M·R·J·F· .

९९ राक्ष० । सखे शकटदास अथ कोऽयमस्य मे हृदयानन्दस्य हेतुः ।

१०० शक० सिद्धार्थकं निर्दिश्य । अनेन प्रियसुहृदा सिद्धार्थकेन घातकान् निष्क्राम्य वध्यस्थानादपहृतोऽस्मि ।

१०१ राक्ष० सहर्षम् । भद्र सिद्धार्थक काममपर्याप्तमिदमस्य प्रियस्य । तथापि गृह्यताम् । इति स्वगात्रादवतार्य भूषणं प्रयच्छति ।

१०२ सिद्धा० गृहीत्वा पादयोर्निपत्य स्वगतम् । अअं खु अज्जोवदेसो । होदु । तह करिस्सं । प्रकाशम् । अमच्च एत्थ मे पढमपविट्ठस्स णत्थि कोवि परिचिदो जत्थ एदं अमच्चस्स पसादं णिक्खिविअ णिव्वुदो भविस्सं । ता इच्छामि अहं इमाए मुद्दाए मुद्दिदं अमच्चस्स य्येव भण्डाआरे ठाविदुं । जदा मे पओअणं तदा गेण्हिस्सं ।

१०२ अयं खल्वार्योपदेशः । भवतु । तथा करिष्यामि । अमात्य अत्र मे प्रथमप्रविष्टस्य नास्ति कोऽपि परिचितो यत्रैतदमात्यस्य प्रसादं निक्षिप्य निर्वृतो भविष्यामि । तस्मादिच्छाम्यहमनया मुद्रया मुद्रितममात्यस्यैव भाण्डागारे स्थापयितुम् । यदा मे प्रयोजनं तदा ग्रहीष्यामि ।

९९ सखे omitted S·G· . अथ omitted F·S· . ईदृशस्य for अस्य A·P·M·R·J·F· . मे omitted F·G· . हृदयस्यानन्दहेतुः E· , हृदयानन्दकस्य हेतुः G· . १०० अमात्य for अनेन B·N· . घातकान् omitted F· . वध for वध्य S· . अपवाहितोऽस्मि B· . १०१ भद्र सिद्धार्थक omitted S· . किं पर्याप्तम् for काममपर्याप्तम् A·P·M·R·J·F· . इदम् omitted F·G· . भूषणानि in all. १०२ All from स्वगतम् to प्रकाशम् omitted S·E·G· . एदं for अअं B·N· . अज्जोवदेसेण B·N· . होदु । तह omitted B·N· . मे omitted A·P·M·R·J·F· . एणं for एदं S·G· , इमं A·P· ; एदं omitted M·R·F· . अमच्चपसादं S·G· . अहं omitted A·P·F·S· . एदाए for इमाए S·N·G· . मुद्दिआए B·G· . मुद्दिदुं A·P· . य्येव omitted E·G· . णिक्खिविदुं for ठाविदुं B·E·G· , विणिक्खिदुं S·N· . एदिणा added after मे B·N· , एदाणं G· . संविज्जदि added before तदा S·B·E·N·G· . All from ता इच्छामि to गेण्हिस्सं omitted in M· , but the chhâyâ given.

१०३ राक्ष० । भवतु । को भारः । शकटदास एवं क्रियताम् ।

१०४ शक० । यदाज्ञापयत्यमात्यः । मुद्रां विलोक्य जनान्तिकम् । अमात्य भवन्नामाङ्कितेयं मुद्रा ।

१०५ राक्ष० विलोक्यात्मगतम् । सत्यम् । नगरान्निष्क्रामतो मम हस्ताद् गृहिण्योत्कण्ठाविनोदार्थं गृहीता । कथं पुनरस्य हस्तमुपागता । प्रकाशम् । भद्र सिद्धार्थक कुतस्त्वयेयमधिगता ।

१०६ सिद्धा० । अमच्च अत्थि कुसुमपुरे मणिआरसेट्ठी चन्दणदासो णाम । तस्स गेहदुआरपरिसरे पडिदा मए उवलद्धा ।

१०७ राक्ष० । युज्यते ।

१०८ सिद्धा० । अमच्च किं एत्थ जुज्जदि ।

१०९ राक्ष० ।—महाधनानां गृहद्वारि पतितस्यैवंविधस्योपलब्धिः ।

---

१०६ अमात्य अस्ति कुसुमपुरे मणिकारश्रेष्ठी चन्दनदासो नाम । तस्य गेहद्वारपरिसरे पतिता मयोपलब्धा । १०८ अमात्य किमत्र युज्यते ।

---

१०३ भवतु omitted in all but B·N·. को दोषः in all but N·. शकटदास omitted P·S·E·. १०४ सिद्धा० ॥ जं अमच्चो आणवेदि ॥ तथा करोति ॥ added before this speech in E·. यदाज्ञापयत्यमात्यः omitted E·. यथा for यदा A·. आयुष्मान् for अमात्यः G·. जनान्तिकम् omitted S·E·N·. भवत् omitted S·E·N·. १०५ विलोक्यात्मगतम् omitted G·. कष्टम् for सत्यम् B·N·. निष्क्रमतो F·. ब्राह्मण्या for गृहिण्या in all but S·G·, अस्मद् added after गृहिण्या E·G·, मद् B·N·. तत्कथम् for कथं पुनः A·P·M·R·J·F·B·E·N·, कथम् S·. उपगता B·E·N·. १०६ अमच्च omitted A·P·M·R·J·F·. अत्थि omitted G·. पुरणिवासी for पुरे B·N·. दुआरे for दुआरपरिसरे F·S·B·E·N·G·. भूमीए added before पडिदा B·N·G·. मए omitted E·. आसादिदा for उवलद्धा A·P·M·R·J·F·, समासादिदा B·E·N·. १०८ एत्थ omitted S·G·. १०९ भद्र महा S·G·, भद्र यन्महा A·P·M·R·J·F·E·, भद्र यतो महा B·N·. गृहे A·P·M·R·J·, द्वारि P·N·.

११० शक०। सखे सिद्धार्थक अमात्यनामाङ्कितेयं मुद्रा। तदितो बहुतरेणार्थेन भवन्तममात्यस्तोषयिष्यति। दीयतामेषा।

१११ सिद्धा०। अज्ज णं एसो मे परितोसो जं अमच्चो इमाए मुद्दाए परिग्गहप्पसादं करेदि। इति मुद्रामर्पयति।

११२ राक्ष०। सखे शकटदास अनयैव मुद्रया स्वाधिकारे व्यवहर्तव्यं भवता।

११३ शक०। यदाज्ञापयत्यमात्यः।

११४ सिद्धा०। अमच्च विण्णवणीअं किं वि अत्थि।

११५ राक्ष० भद्र ब्रूहि विश्रब्धम्।

११६ सिद्धा०। जाणादि य्येव अमच्चो जह चाणक्कबडुअस्स विप्पिअं कदुअ णत्थि मे पुणो पाडलिउत्ते पवेसो। ता इच्छामि अहं

---

१११ आर्य नन्वेष मे परितोषो यदमात्योऽस्या मुद्रायाः परिग्रहप्रसादं करोति। ११४ अमात्य विज्ञापनीयं किमप्यस्ति। ११६ जानात्येवामात्यो यथा चाणक्यवटुकस्य विप्रियं कृत्वा नास्ति मे पुनः पाटलिपुत्रे प्रवेशः।

---

११० भद्र for सखे M·R·E·. यदि for तदितो S·G·. तद् added before दीयताम् B·N·, तदा S·. मुद्रा added after एषा S·B·E·N·G·. १११ णं omitted B·E·N·. पसादो for मे परितोसो A·P·M·R·J·F·. जे for जं G·, जइ F·. परिग्गहं for परिग्गहप्पसादं A·P·M·R·J·F·S·G·. ११२ सखे omitted M·S·E·G·. व्यवहारः कर्तव्यः F·. त्वया for भवता S·G·. ११४ विण्णव्वं S·G·; विण्णवेमि A·P·M·R·J·F·. किं वि अत्थि omitted A·P·M·R·J·F·. ११५ भद्र omitted in all but B·E·N·. ११६ चाणक्कहदअस्स P·E·. अप्पियं E·. मे omitted in all but B·E·N·. वि added after पुणो M·R·. पाडलिउत्तप्पवेसो F·E·G·. ता omitted A·P·M·R·J·F·.

अमच्चचरणे य्येव सुस्सूसिदुं ।

११७ राक्ष० । भद्र प्रियं नः । त्वदभिप्रायापरिज्ञानान्तरितोऽयमस्मद्नुनयः । तदेवं क्रियताम् ।

११८ सिद्धा० सहर्षम् । अणुगिहिदोह्मि ।

११९ राक्ष० । सखे शकटदास विश्रामय सिद्धार्थकम् ।

१२० शक० । यदाज्ञापयत्यमात्यः । सिद्धार्थकेन सह निष्क्रान्तः ।

१२१ राक्ष० । सखे विराधगुप्त वर्णय वृत्तशेषम् । अपि क्षमन्तेऽस्मदुपजापं प्रकृतयः ।

१२२ विरा० । अमात्य बाढम् । क्षमन्ते । ननु प्रकाशमवगम्यते–

तस्मादिच्छाम्यहममात्यचरणावेव शुश्रूषितुम् । ११८ अनुगृहीतोऽस्मि ।

अमच्चस्स S·E·G· . सुप्पसण्णे पादे for चलणे B·E·N·G· . सेविदुं B·E·G· . ११७ भद्र omitted M·R·G· . किंतु added before त्वदभि in all but S· . त्वदभिप्रायपरिज्ञानेन B·N· , त्वदभिप्रायापरिज्ञानेन E· , त्वदभिप्रायापरिज्ञानम् G· . ततः for अन्तरितः G· . अयं omitted S·B·E·N·G· . अस्माकम् for अस्मद् S·B·E·N·G . ११९ सखे omitted in all but B·N· . गच्छ added after दास E· . विश्रमय S· . एनम् for सिद्धार्थकम् E· १२० तथा for यदा...मात्यः A·P·M·R·J·F· . १२१ इदानीं added after वर्णय B·E·N· . कुसुमपुर added before वृत्त B·E· , वृत्तान्त for वृत्त S·B·E·N·G· ; शेषवृत्तम् P· . कुसुमपुरनिवासिनो added after क्षमन्ते B·E· . मद for अस्मद S· . प्रकृतिस्था अमात्यादयः for प्रकृतयः in E· , चन्द्रगुप्तप्रकृतयः in the rest. १२२ यथा for ननु A·P·M·R·J·F· . यथाप्रधानम् for प्रकाशम् B· . अनुगच्छन्ति for अवगम्यते A·P·M·R·J·F·B·N· , आगच्छन्ति E· . एव added at the end in all but G· .

१२३ राक्ष० । सखे किं तत् प्रकाशम् ।

१२४ विरा० । मलयकेतोरपक्रमणात् प्रभृति कुपितश्चन्द्रगुप्तश्चाणक्यस्योपरीति । चाणक्योऽपि जितकाशितया तैस्तैराज्ञाभङ्गैश्चन्द्रगुप्तस्य चेतःपीडामुपचिनोति । इत्थमपि मयानुभवः ।

१२५ राक्ष० सहर्षम् । सखे विराधगुप्त गच्छ त्वमनेनैवाहितुण्डिकच्छद्मना पुनः कुसुमपुरम् । तत्र मे सुहृद् वैतालिकव्यञ्जनः स्तनकलशो नाम प्रतिवसति । स त्वया मद्वचनाद्वाच्यः । चाणक्येन क्रियमाणेष्वाज्ञाभङ्गेषु चन्द्रगुप्तस्त्वया समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्यः । कार्यं चातिनिभृतं करभकहस्तेन संदेष्टव्यमिति ।

---

१२३ तत्र for तत् in all but P. कारणम् for प्रकाशम् B·G·. १२४ इदं तत्र प्रकाशम् । added before मलय in A·P·, अमात्य इदं प्रकाशम् । in G·, अमात्य इदं कारणम् । in B·, अमात्य इदं तत्र प्रकाशम् । in M·R·J·F·E·N·. यन्मलय A·P·M·F·. पीडितः for कुपितः B·. चन्द्रगुप्तेन B·G·. चाणक्योपरीति R·, चाणक्यस्येति S·E·N·. चाणक्य इति B·G·. अति added befor जित in all but B·. असहमानश्चन्द्रगुप्तं added before तैः in A·P·M·R·J·F·, असहमानः B·E·N·. चेतसः पीडाम् B·N·. अयम् for इत्थम् S·B·N·G·, इत्ययम् P·. अपि omitted F·. १२५ प्रियं नः added before सखे E·. तद्गच्छ for गच्छ B·N·; गच्छ omitted S·G·. एतेन for अनेन A·M·F·. एव omitted S·B·N·G·. पुनः omitted A·P·. कुसुमपुरमेव B·E·N·, कुसुमपुरमेव व्रज S·G·. स added before तत्र S·G·. हि added after तत्र B·N·G·. मे omitted E·. प्रियसुहृद् A·P·M·R·J·F·. व्यञ्जनकः P·. प्रतिवसति स्म S·. यथा added before चाणक्येन in all but S·G·. क्रियमाणे आज्ञाभङ्गे N·, क्रियमाणे सत्याज्ञाभङ्गे S·G·. त्वया omitted A·P·M·R·J·F·. रूपैः for समर्थैः S·B·N·; समुत्तेजनश्लोकैः G·. अति omitted S·G·. हस्ते for हस्तेन S·E·G·.

१२६ विरा० । यदाज्ञापयत्यमात्यः। निष्क्रान्तः।

१२७ प्रविश्य पुरुषः। जेदु अमच्चो। अमच्च सअडदासो विण्णवेदि। एदे क्खु तिण्णि अलंकारविसेसा विक्कीअन्दि। ते पच्चक्खी-करेदु अमच्चो त्ति।

१२८ राक्ष० विलोक्यात्मगतम् । अहो महार्हाण्याभरणानि । प्रकाशम् । भद्र उच्यतां शकटदासः। परितोष्य विक्रेतारं गृह्यन्तामिति।

१२९ पुरु०। जं अमच्चो आणवेदि । निष्क्रान्तः।

१३० राक्ष०। यावदहमपि कुसुमपुराय करभकं प्रेषयामि। उत्थाय। अपि नाम दुरात्मनश्चाणक्याच्चन्द्रगुप्तो भिद्येत । अथ वा

१२७ जयत्वमात्यः। अमात्य शकटदासो विज्ञापयति। एते खलु त्रयोऽलंकार-विशेषा विक्रीयन्ते। तान् प्रत्यक्षीकरोत्वमात्य इति। १२९ यदमात्य आज्ञापयति।

१२७ जेदु twice S·B·E·N·G·. अज्जो for अमच्चो S·N·G·. जेदु अमच्चो omitted A·P·M·R·J·F·. एसो क्खु added after अमच्च A·P·M·R·J·F·. क्खु after एदे omitted S·G·. संजोआ for विसेसा in all but B·. जा for ते in P·, ता in the rest. १२८ आत्मगतम् omitted in A·P·M·R·J·F·. महाधनानि for महार्हाणि A·P·M·R·F·. प्रकाशम् omitted A·P·M·R·J·F·. भद्र omitted G·. उच्यताम् omitted S·G·. अस्मद्वचनात् added after उच्यताम् A·P·M·R·J·, मद्वचनात् F·. शकटदासं ब्रूहि for शकटदासः S·, शकटदास G·. गृह्य-ताम् in all but F·E·; परिगृह्यताम् in E·. इति omitted P·. १२९ देवो for अमच्चो G·. तथा for जं...वेदि. A·P·M·R·J·F·. १३० स्वगतम् added after राक्ष० B·N·. नाम omit-ted S·G·. चाणक्यहतकात् B·E·N·. भिद्यते S·. वा omitted P·.

सिद्धमेव नः समीहितं पश्यामि । कुतः ।

मौर्यस्तेजसि सर्वभूतलभुजामाज्ञापको वर्तते
चाणक्योऽपि मदाश्रयादयमभूद्राजेति जातस्मयः ।
राज्यप्राप्तिकृतार्थमेकमपरं तीर्णप्रतिज्ञार्णवं
सौहार्दात् कृतकृत्यतैव नियतं लब्धान्तरा भेत्स्यति ॥२४॥

निष्क्रान्तः ।

इति राक्षसविचारो नाम द्वितीयोऽङ्कः ।

सिद्ध......कुतः । omitted G., नः only omitted S.B.E.N.. अपि omitted S.. मदुपाश्रयाद् for मदाश्रयाद् S.. लब्धान्तरं P.. निष्क्रान्तः omitted in A.P.; इति निष्क्रान्ताः सर्वे for निष्क्रान्तः in the rest. राक्षसविचारो नाम omitted in all but A..

ततः प्रविशति कञ्चुकी ।

१ कञ्चु० ।

रूपादीन् विषयान् निरूप्य करणैर्यैरात्मलाभस्त्वया
लब्धस्तेष्वपि चक्षुरादिषु हताः स्वार्थावबोधक्रियाः ।
अङ्गानि प्रसभं त्यजन्ति पटुतामाज्ञाविधेयानि ते
न्यस्तं मूर्ध्नि पदं तवैव जरया तृष्णे मुधा ताम्यसि ॥ १ ॥

परिक्रम्याकाशे । भो भोः सुगाङ्गप्रासादाधिकृताः पुरुषाः सुगृहीतनामा देवश्चन्द्रगुप्तो वः समाज्ञापयति । प्रवृत्तकौमुदीमहोत्सवरमणीयं कुसुमपुरमवलोकयितुमिच्छामि । तत्संस्क्रियन्तां सुगाङ्गप्रासादस्योपरिभूमय इति । पुनराकाशे । किं ब्रूथ । आर्य किमविदित एवायं देवस्य कौमुदीमहोत्सवप्रतिषेध इति । आः दैवोपहताः किमनेन वः प्राणहरेण कथोपोद्घातेन । शीघ्रमिदानीम्

---

१ सनिर्वेदम् added after कञ्चु० A·P·M·R·J·F· . तया for त्वया P· . हता A·P· . बोधाः M·R· , रोध N· . क्रिया A·P· . मे for ते S·B·E·N·G· . त्वय्येव (sic·तवैव) S· , तथैव N(r)· . मायसि for ताम्यसि B· . भोः once S· . एव added after पुरुषाः A·P·F· . नामधेयः R·. वः omitted S· . यथा added before प्रवृत्त B·N· . रमणीयतरं B·E·N·G· . तत्क्रियन्ताम् S·B·E·N·G· . अस्मद्दर्शनयोग्याः added before सुगाङ्ग in all but M·R· . उपरितन G· . प्रासादोपरिभूमयः A·P·M·R·J·F· . तत् किं चिरयन्ति भवन्तः । added before पुनराकाशे in S·B·N·G· . पुनः omitted S·B·E·N·G· . आर्याः added before किं E· . इदं added after किम् G· . कथयन्ति भवन्तः for ब्रूथ E·G· . चन्द्रगुप्तस्य added after देवस्य B·E·N·G· . दैवोपहतकाः A·P·F· . वः omitted M·R· ; एव for it G· . सद्यः added before प्राण A·P·M·R·J·F· . प्राणापहारेण M·R· , प्राणहरेणैव S· . कथोद्घातेन R·B· , कथाघातेन E· . अनवद्य for गृहीत R· , किमद्य M· .

आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धस्रजः
संपूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रियः ।
सिंहाङ्कासनधारणाच्च सुचिरं संजातमूर्छामिव
क्षिप्रं चन्दनवारिणा सकुसुमः सेकोऽनुगृह्णातु गाम् ॥ २ ॥

पुनराकाशे । किं ब्रूथ । आर्य इदमनुष्ठीयते देवस्य शासनमिति । भद्राः त्वरध्वम् । अयमागत एव देवश्चन्द्रगुप्तः । य एष

सुविश्रब्धैरङ्गैः पथिषु विषमेष्वप्यचलता
चिरं धुर्येणोढा गुरुरपि भुवो यास्य गुरुणा ।
धुरं तामेवोच्चैर्नववयसि वोढुं व्यवसितो
मनस्वी दम्यत्वात् स्खलति न च दुःखं वहति च ॥३॥

२ नेपथ्ये प्रतीहारी । इदो इदो देवो ।

ततः प्रविशति राजा प्रतिहारी च ।

३ राजा स्वगतम् । राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महद्प्रीतिस्थानम् । कुतः ।

परार्थानुष्ठाने रहयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः ।

---

२ इत इतो देवः ।

धूम M., दीप S.. सुरभि- P.. सुकुसुमः P.. किं कथयन्ति भवन्तः । एते त्वरामहे इति । for किं ब्रूथ......शासनमिति in S.B.E.N.G.. भद्रम् for भद्राः S.. आरभध्वम् for त्वरध्वम् S.; त्वरध्वम् twice E.G.. देवः omitted F.B.N.G.. स एष M.R.. वधु(sic-वधूः) E.. याद्य F.., च न for न च A.M.R.J.E.. न सहते S.G.. २ कञ्चुकी for नेपथ्ये S.G.. प्रतीहारी omitted in all. इत इतो देवः। in all but N.. ३ राज्यश्रीः for राज्यं हि F.. राज्य for राज G.. वृत्तस्य for वृत्तिपरस्य M.. परतन्त्रस्य for परस्य B.N.. नृपतेः omitted R.; नरपतेः for it E., भूपतेः B.N... कुतः omitted S.; यतः for it B.N.. जडयति S.B.E.G.. परित्यक्तः E.G.

परार्थश्चेत् स्वार्थादभिमततरो हन्त परवान्
परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः ॥ ४ ॥

अपि च दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः। कुतः।

तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न संतिष्ठते
मूर्खान् द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि।
शूरेभ्योऽभ्यधिकं बिभेत्युपहसत्येकान्तभीरूनपि
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ॥ ५ ॥

अन्यच्च कृतककलहं कृत्वा स्वतन्त्रेण त्वया कंचित् कालं व्यवहर्तव्यमित्यार्यादेशः। स च कथमपि मया पातकमिवाभ्युपगतः। अथ वा शश्वदार्योपदेशसंस्क्रियमाणमतयः स्वतन्त्रा वयम्। कुतः।

इह विरचयन् साध्वीं शिष्यः क्रियां न निवार्यते
त्यजति तु यदा मार्गं मोहात् तदा गुरुरङ्कुशः।
विनयरुचयस्तस्मात् सन्तः सदैव निरङ्कुशाः
परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ्मुखाः ॥ ६ ॥

अभिमतपरो A. P. वेत्तु B. दुराराधा E. हि omitted S. E. राज्यलक्ष्मीः M. F. S. E. G. आत्मविद्भिः S. परिभवात् for परिभव A. संतुष्यते M. मूर्खं A. P. M. J. F. S. E. G. अप्यधिकं for अभ्यधिकं in all but P. E. अपसरति for उपहसति E. अहो for अपि in all but E. कृतककलहं कृत्वा omitted M. R. F. स्वातन्त्र्येण P. S. त्वया omitted A. P. M. J.; च त्वया for it B. E. N. किंचित् कालान्तरं in all but B. N. आर्योपदेशः B., आचार्यादेशः G. कथं कथमपि S. N. महापातकवद् N. अनुगतः E. सदा for शश्वद् S. मतयः for मतयः N. सदैवास्वतन्त्राः for स्वतन्त्राः in B. N., सर्वदैव स्वतन्त्राः in S., सदैव स्वतन्त्राः in the rest. हि रचयन् R. B. विचार्यते for निवार्यते N. हि for तु S. G.; च F. यथा for यदा M. परतरमतःस्वातन्त्र्येभ्यो S., पदमपि यतः स्वातन्त्र्येभ्यो E.

प्रकाशम्। आर्य वैहीनरे सुगाङ्गमार्गमादेशय।

४ कञ्चु०। इत इतो देवः। नाट्येन परिक्रम्य। अयं सुगाङ्गप्रासादः। शनैरारोहतु देवः।

५ राजा नाट्येनारुह्य दिशोऽवलोक्य। अहो शरत्समयसंभृतशोभानां दिशामतिरमणीयता। संप्रति हि

शनैः श्येनीभूताः सितजलधरच्छेदपुलिनैः
समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः।
चिताश्चित्राकारैर्निशि विकचनक्षत्रकुमुदै-
र्नभस्तः स्यन्दन्ते सरित इव दीर्घा दश दिशः ॥ ७ ॥

अपि च

अपामुद्वृत्तानां निजमुपदिशन्त्या स्थितिपथं
दधत्या शालीनामवनतिमुदारे सति फले।
मयूराणामुग्रं विषमिव हरन्त्या मदमहो
कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥ ८ ॥

इमामपि

प्रकाशम् omitted R. प्रासाद added after सुगाङ्ग S.B.E.N.G. मार्ग omitted E.G.; पथ for it S. आदर्शय M.R. ४ देवः added before अयं E. एव added before सुगाङ्ग S. शनैः twice S.E.G. आरोढुमर्हति for आरोहति S.B.E.N., उपरोढुमर्हति G. आर्यः for देवः S.B.N.G. ५ संप्रति added before शरत् G. समय omitted F.; समागम for it G. संभृत omitted N.; समागत for it G. शोभाविभूतीनां S.B.E., शोभां विभ्रतीनां N.G. अतिशय for अति S. रामणीयकम् G. संप्रति हि for कुतः N. संप्रति हि added after कुतः E. श्यानीभूताः A.P.M.R.J.F., शान्ताकाराः S., शान्ता भूताः B.N., शान्ताकृताः E., शान्तीभूताः G. पुलिनाः for पुलिनैः in all. पुरस्ताद् for समन्ताद् S.G. कुसुमैः E. शतश इव नद्यो for सरित इव दीर्घा S. अपि च omitted S. नयम् for निजम् S. पदम् for पथम् in all but B.E.N. ददत्या M.R. मुदम् for मदम् P.S. सर्वस्य for कृत्स्नस्य S. इमां च for अपि च S.G., इमामपि A.P.M.R.J.F.E.

भर्तुस्तथा कलुषितां बहुवल्लभस्य
मार्गे कथंचिदवतार्य तनूभवन्तीम्।
सर्वात्मना रतिकथाचतुरेव दूती
गङ्गां शरन्नयति सिन्धुपतिं प्रसन्नाम्॥ ९॥

समन्तादवलोक्य। अये कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम्। आर्य वैहीनरे अथास्मद्वचनादाघोषितः कुसुमपुरे कौमुदीमहोत्सवः।

६ कञ्चु०। अथ किम्।

७ राजा०। तत् किं न गृहीतमस्मद्वचनं पौरैः।

८ कञ्चु० कर्णौ पिधाय। शान्तं पापम्। पृथिव्यामस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति।

९ राजा। तत् कथमप्रवृत्तकौमुदीमहोत्सवमद्यापि कुसुमपुरम्।
धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो

मार्ग for मार्गे F., कण्ठात् S.G.. अवतीर्य for अवतार्य S.. प्रसन्नम् P.. तत् added after अये S.E.G.. किम् for कथम् F.. एव added before कुसुम E.. पश्यामि added after पुरम् B.N.G.. कथम् for अथ S.. त्वया added after अथ B.N.. मद् for अस्मद् G.. नाघोषितः for आघोषितः S.. ६ देव added before अथ किम् and आघोषितो देवस्याज्ञया कुसुमपुरे कौमुदीमहोत्सवः after it in S.B.E.N.. ७ आर्य added before तत् S.B.E.N.G.. एवम् added after तत् B.N. इति added after किम् S.. परिगृहीतम् M.R.B.N.. पौरजनेन for पौरैः S.P.E.N.G.. ८ देव added before शान्तं S.B.E.N.G.. शान्तं पापम् twice in all but R.S.E.. स्खलितमर्हति for स्खलिष्यति S.B.E.N.G.. ९ आर्य वैहीनरे added before तत् B.N., आर्य वैहीनरे यद्येवं S.E.G.. किम् for कथम् E., किमर्थम् S.G.. अद्यापि कुसुमपुरम् omitted A.P.. पश्यामि। पश्य added after पुरम् S.B.E.N.G.. दूतैः for धूर्तैः M..

नालंकुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रयातैः ।
अन्योन्यं स्पर्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः ॥१०॥

१० कञ्चु० । देव एवमेतत् ।

११ राजा । किमेतत् ।

१२ कञ्चु० । देव एवमिदम् ।

१३ राजा ।—स्फुटं कथय ।

१४ कञ्चु० । प्रतिषिद्धः कौमुदीमहोत्सवः ।

१५ राजा सक्रोधम् । आः केन ।

१६ कञ्चु० । देव नातः परं विज्ञापयितुं शक्यम् ।

१७ राजा । न खल्वार्यचाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः ।

१८ कञ्चु० । देव कोऽन्यो जीवितुकामो देवस्य शासनमुल्लङ्घयिष्यति ।

क्रान्त for क्रान्ति S·G· . सार्यं for साकं N· . पावनं for पार्वणं A·M·R· F· . १० देव omitted A·P·M·R·J·F· . एव for एतत् S·G· , एव तत् M·R· , एवैतत् A·P·J· . १२ देव omitted E·G·, आर्य for it S· . एवम् omitted A·P·M·R·J·F·S· ; अतः for it B·N·G· , आः E· . १३ आर्य added before स्फुटम् B·E·N·G· . अभिधीयताम् for कथय S·B·E·N·G· . १४ देव added before प्रति S·B·E·N·G· . १५ आर्य added before आः B·N· . आः omitted G· . १६ देव omitted B·N· . ईशस्य added after परम् F· , अस्माभिर्देवो B·E· N·G· . शक्यते B·E·N· , शक्यः G· . The whole speech is omitted in S· . १७ आर्येण for आर्य B·N·; आर्य put before न E·. परिहृतः S· . अतिरमणीयः S· . चक्षुषोः S·E·. अपहृ...... विषयः omitted F· . १८ देव omitted M·R·F· . जीवितकामो A·P· . अतिवर्तेत for उल्लङ्घयिष्यति A·P·M·R·J·F· .

१९ राजा० । शोणोत्तरे उपवेष्टुमिच्छामि ।

२० प्रती० । देव एदं सिंहासणं । उवविसदु देवो ।

२१ राजा नाट्येनोपविश्य । आर्य वैहीनरे आर्यचाणक्यं द्रष्टुमिच्छामि ।

२२ कञ्चु० । यदाज्ञापयति देवः । निष्क्रान्तः ।

ततः प्रविशत्यासनस्थः स्वभवनगतः कोपानुविद्धां चिन्तां नाटयंश्चाणक्यः ।

२३ चाण० । कथं स्पर्धते मया सह दुरात्मा राक्षसः ।

कृतागाः कौटिल्यो भुजग इव निर्याय नगराद्
यथा नन्दान् हत्वा नृपतिमकरोन्मौर्यवृषलम् ।
तथाहं मौर्येन्दोः श्रियमपहरामीति कृतधीः
प्रकर्षं मद्बुद्धेरतिशयितुमेष व्यवसितः ।। ११।।

प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा । राक्षस राक्षस विरम्यतामस्माद्दुर्व्यवसितात् । कुतः ।

---

२० देव एतत् सिंहासनम् । उपविशतु देवः ।

---

१९ सक्रोधम् added after राजा A·P·F·S·E·, सरोषम् G·. २० देव omitted M·G·. देवस्स added before एदं E·. इमं for एदं E·G·. उवविसदु देवो omitted A·P·M·R·J·F·. २१ सक्रोधम् added before नाट्येन E·. अकृतकृत्यान्तरम् added after वैहीनरे A·P·. आर्य before चाणक्यं omitted G·; आर्यं for it A·M·. प्रष्टुम् for द्रष्टुम् N·. २३ आत्मगतम् added after चाण० S·B·N·G·. राक्षसहतकः B·N·. कुतः added after राक्षसः S·B·E·N·G·. निर्गत्य M·R·. नन्दं B·N·G·. हतधीः G·. प्रभावं for प्रकर्षं S·B·E·N·, प्रसादं G·. यद् for मद् A·. प्रत्यक्षवद् omitted A·P·M·R·J·F·. रे added before राक्षस G·. राक्षस once M·R·E·. विरम्यताम् twice G·. दुरध्यवसितात् E·, व्यवसितात् G·, व्यसनात् A·P·M·R·J·F·. कुतः added at the end S·E·.

उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रो
नन्दोऽसौ न भवति चन्द्रगुप्त एषः।
चाणक्यस्त्वमपि च नैव केवलं ते
साधर्म्यं मदनुकृते प्रधानवैरम्॥ १२॥

विचिन्त्य। अथ वा नातिमात्रमत्र मया मनः खेदयितव्यम्।

मद्भृत्यैः किल नाम पर्वतसुतो व्याप्तः प्रविष्टान्तरै-
रुद्युक्ताः स्वनियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः।
कृत्वा संप्रति कैतवेन कलहं मौर्येन्दुना राक्षसं
भेत्स्यामि स्वमतेन भेदकुशलं ह्येष प्रतीपं द्विषः॥ १३॥

२४ प्रविश्य कञ्चु०। कष्टं खलु सेवा।

भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा-
दन्येभ्यश्च भवन्ति येऽस्य भवने लब्धप्रसादा विटाः।
दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः॥१४॥

परिक्रम्यावलोक्य च। इदमार्यचाणक्यस्य गृहम्। यावत् प्रवि-

भारो for तन्त्रो A·P·M·R·J·F· . कौटिल्यः S· . असि for अपि N· . न चैव P·R· . मदनुकृतौ F· , मदनुकृतेः A·P·M·R·J·B·E·N· . प्रपन्नवैरम् F· . विचिन्त्य omitted R· . अस्मिन् for अत्र S·B·E·N·G· . खेदयितव्यम्। कुतः in all but R·F· . सोऽपि for नाम A·P·M·R·J·F·. प्रतिष्ठान्तरैः B·N·. च for स्व B· . चराः for स्पशाः F·S·E·N· . कुशलो ह्येष S·B·E·N· , कुशलस्त्वेष A·P·M·R·J·F· . प्रतीपद्विषः M·R· . २४ कष्टा S·B·N·G· . राजसेवा S· . नाम। कुतः added after सेवा S·B·E·N·G· . भेत्त(sic·त)व्यं A·F·S· . वसन्ति for भवन्ति A·P·M·R·J·F·S· . दर्शनापनयनैः G· , दर्शनोपनयनैः E· . सेवार्थम् for पिण्डार्थम् P· . आपश्य(sic·यस्य)तः E· , आयास्यतः F·S·B· , आदा(sic·या) स्यतः G· . आचार्य for आर्य P·G· . चाणक्यगृहम् B·E·N·G· .

शामि। प्रविश्यावलोक्य च। अहो राजाधिराजमन्त्रिणो विभूतिः। तथा हि

उपलशकलमेतद् भेदकं गोमयानां
बटुभिरुपहृतानां बर्हिषां स्तूपमेतत्।
शरणमपि समिद्भिः शुष्यमाणाभिराभि-
र्विनमितपटलान्तं दृश्यते जीर्णकुड्यम्॥ १५॥

तत्स्थाने खल्वस्य वृषलो देवश्चन्द्रगुप्तः। कुतः।

स्तुवन्त्यश्रान्तास्याः क्षितिपतिमभूतैरपि गुण-
प्रवादैः कार्पण्याद्यदवितथवाचोऽपि पुरुषाः।
प्रभावस्तृष्णायाः स खलु सकलः स्यादितरथा
निरीहाणामीशस्तृणमिव तिरस्कारविषयः॥ १६॥

विलोक्य सभयम्। अयमार्यचाणक्यस्तिष्ठति

यो नन्दमौर्यनृपयोः परिभूय लोक-
मस्तोदयौ प्रतिदिशन्नविभिन्नकालम्।
पर्यायपातितहिमोष्णमसर्वगामि
धाम्नातिशाययति धाम सहस्रधाम्नः॥ १७॥

महाराजस्य for राजाधिराज S·, महाराजाधिराज E·, राजाधिराजस्य G·. अपि added after मन्त्रिणः S·. गृहभूतिः B·N·, गृहभूमिः S·. कुतः for तथा हि S·B·E·N·G·. स्तोम B·G·, कूट E·. विमलित for विनमित A·. ततः for तत् B·N·. खलु omitted M·R·E·N·. वृषलोद्यः for वृषलो देवः A·P·M·R·J·F·. इति added after चन्द्रगुप्तः in all but S·E·G·. श्रान्तास्याः for अश्रान्तास्याः in all but S·B·N·. गुणैः in all. प्रवाचः in all but M·R·. अतिवितथ for यदवितथ B·. कृतिनः for पुरुषाः B·. अये added before अयम् E·, अये तद् A·P·M·R·J·F·, तद् B·N·. स एव added after तिष्ठति N·, य एष E·. अदिशदप्रति for प्रति...न्नि in all but B·N·. हिमोष्णिमसर्वगामि B·N·.

जानुभ्यां भूमौ निपत्य प्रकाशम्। जयत्वार्यः।

२५ चाण०। वैहीनरे किमागमनप्रयोजनम्।

२६ कञ्चु०। आर्य प्रणतिसंभ्रमोच्चलितभूमिपालमौलिमालामाणिक्यशकलशिखापिशङ्गीकृतपादयुगलो देवश्चन्द्रगुप्त आर्यं पादपद्मयोः प्रणिपत्य विज्ञापयति। अकृतक्रियान्तरायमार्यं द्रष्टुमिच्छामीति।

२७ चाण०। वृषलो मां द्रष्टुमिच्छति। वैहीनरे न खलु वृषलस्य श्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः।

२८ कञ्चु०। आर्य अथ किम्।

२९ चाण० सक्रोधम्। आः केन कथितम्।

३० कञ्चु० सभयम्। प्रसीदत्वार्यः। स्वयमेव सुगाङ्गप्रासादगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवं पुरम्।

जयतु twice B·N· ; जयति for it E· . २५ आर्य added before वैहीनरे E· . २६ आर्य omitted S· . प्रणत A·P·M·R·J·F· . ससंभ्रमाचलित P· , ससंभ्रमचलित A·F· , संभ्रमसमुच्चलित B·N· , संभ्रमप्रचलित S· , संभ्रमचलित E· , संभ्रमे G· . माला omitted S·B·E·N·G· . मणि for माणिक्य S·B·E·N·G· . शकल omitted S· . पादपद्मयुगलः in all. सुगृहीतनामधेयः added before देवः A·P·M·R·J·F· . शिरसा प्रणम्य for पादपद्मयोः प्रणिपत्य A·P·M·R·J·F· , आर्यस्य for आर्यं G· . पादयोः E·G· . क्रियान्तरायमन्तरेण for अकृतक्रियान्तरायम् E·, क्रियान्तरमन्तरायमन्तरेण B· . २७ वृषलश्रवणपथं A·P·M·R·J·F· , वृषलस्य श्रवणं B·N· . उपगतः B·N· G· , आगतः S·E· . अयम् omitted F·. मत्कृत omitted S·G· ; मया कृतः for it B·N· . ३० शिखर added before गतेन B·N· . आलोकितम् A·P·F· . कौमुदी omitted A·P·F· . कुसुमपुरम् S·B·E·N·G· .

३१ चाण० । आः ज्ञातम् । ततो भवद्भिर्मदन्तरेण प्रोत्साह्य कोपितो वृषलः । किमन्यत् ।

कञ्चुकी भयं नाटयंस्तूष्णीमधोमुखस्तिष्ठति ।

३२ चाण० । अहो राजपरिजनस्य चाणक्योपरि प्रद्वेषपक्षपातः । अथ क्व वृषलः ।

३३ कञ्चु० भयं नाटयन् । आर्य सुगाङ्गगतेन देवेनाहमार्यपादमूलं प्रेषितः ।

३४ चाण० उत्थाय । सुगाङ्गमार्गमादेशय ।

३५ कञ्चु० । इत इत आर्यः । उभौ परिक्रामतः ।

३६ कञ्चु० । एष सुगाङ्गप्रासादः । शनैरारोढुमर्हत्यार्यः ।

३७ चाण० । नाट्येनारुह्यावलोक्य च । अये सिंहासनमध्यास्ते वृषलः । साधु साधु ।

---

३१ आ E. आः ज्ञातम् omitted G. तिष्ठ added before ज्ञातम् S·B·N·, तिष्ठतु G·, उत्तिष्ठ E·. तावद् for ततो B·N·. एव added after भवद्भिः B·N·. अन्तरा for मदन्तरेण A·P·M·R·J·F·. रोषितः B·N·. ३२ चाणक्यस्योपरि F·S·B·E·N·G·. प्रद्वेष omitted S·; विद्वेष for it B·N·, द्वेष P·, महान् G·. तिष्ठति added at the end S·B·N·G·. ३३ भयं नाटयन् omitted S·E·G·. आर्य omitted G·. प्रासाद added before गतेन S·B·E·N·G·. देवेन omitted S·. आर्यस्य S·E·. ३४ कञ्चुकिन् added before and प्रासाद after सुगाङ्ग S·B·E·N·G·. पथम् for मार्गम् S·. आदर्शय R·F·. ३५ इतः once P·R·. ३६ आर्यः added before एष S·E·G·. अयं for एष S·B·E·N·, अमुं G·. प्रासादं G·. शनैः twice S·E·G·. आरोहत्वार्यः A·P·M·R·J·F·. ३७ सहर्षमात्मगतम् added after च F·S·B·E·N·G·. साधु once F·B·N·G·.

नन्दैर्वियुक्तमनपेक्षितराजवृत्तै-
रध्यासितं च वृषलेन वृषेण राज्ञाम् ।
सिंहासनं सदृशपार्थिवसंगतं च
प्रीतिं परां प्रगुणयन्ति गुणा ममैते ॥ १८ ॥

उपसृत्य । विजयतां वृषलः ।

३८ राजा सिंहासनादुत्थाय । आर्य चन्द्रगुप्तः प्रणमति । इति पादयोः पतति ।

३९ चाण० पाणौ गृहीत्वा । उत्तिष्ठ वत्स ।

आ शैलेन्द्राच्छिलान्तःस्खलितसुरनदीशीकरासारशीता-
दा तीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य ।
आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्तां
चूडारत्नांशुगर्भास्तव चरणयुगस्याङ्गुलीरन्ध्रभागाः ॥१९॥

४० राजा । आर्यप्रसादादनुभूयत एव सर्वमेतन्नाशास्यते । तदुपविशत्वार्यः ।

उभौ यथोचितमुपविष्टौ ।

४१ चाण० । वृषल किमर्थं वयमाहूताः ।

४२ राजा । आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् ।

विमुक्तम् S. . राजराजैः for राजवृत्तैः in all but B.N. . प्रीतिं भृशं G. , प्रीतिं त्रयः S. , प्रीतित्रयं E. . देवः for वृषलः G. . ३९ उत्तिष्ठ twice in all but B.E.N. . प्रवाह for शिलान्तः S., शिलान्त P.M.R.J.F.B.E.N. . सुरधुनी B.N. . वर्षाद् for शीताद् S.E.N. . आ पाराल्लोलदूर्मि for आ तीरान्नैकराग F. , आ प्रान्तान्नैकराग N. , तीरान्तान्नैकराग A.M.R.J. , तीरान्तान्नैकधाम P. . स्फुटित P. . भीत M.R. . एवं for एव A.P.S. . ४० आर्य युष्मत् for आर्य E. . प्रसादाद् omitted G. . एव सर्वम् omitted S. . एतत् omitted A.P.M.R.J.F.S. . अतो added before नाशास्यते S. नाशास्यते omitted A.P.M.R.J.F. ; नाशास्यं मे for it E. . ४१ आकारिताः for आहूताः S. . ४२ आर्यस्य omitted G. . अनुगृहीतुम् S.B.N. .

४३ चाण० सस्मितम्। अलमनेन प्रश्रयेण। न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते।

४४ राजा। आर्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति।

४५ चाण० स्मितं कृत्वा। उपालब्धुं तर्हि वयमाहूताः।

४६ राजा। शान्तं पापं शान्तं पापम्। न हि न हि। विज्ञापयितुम्।

४७ चाण०। यद्येवं तर्हि विज्ञापनीयानामवश्यं शिष्येण रुचयोऽनुरोद्धव्याः।

४८ राजा। एवमेतत्। कः संदेहः। किं तु न कदाचिदप्यार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः।

---

४३ वृषल added before अलम् B·E·N·G·. किम् for अलम् S· प्रणयेन N·. तत्प्रयोजनमभिधीयताम् added after प्रश्रयेण S·B·E·N·G·. ४४ आर्य omitted S·G·. महोत्सव omitted S·. ४५ वृषल added before उपालब्धुं B·E·G·, वृषल यद्येवम् N·. तर्हि omitted G·. ४६ शान्तं पापम् once F·. राजा ॥ आर्य नोपालब्धुम्। किंचिद्विज्ञापयितुम्॥ for the whole speech in S·, राजा ॥ नोपालब्धुम् ॥ चाण० ॥ किं तर्हि ॥ राजा ॥ विज्ञापयितुम् ॥ in B·N·, राजा ॥ नोपालब्धुम्। किं तर्हि(sic·तु) विज्ञापयितुम् in E·G·. ४७ वृषल added before यद्येवं S·B·E·N·G·. यदि omitted S·. शिष्यैः M·E·. स्वैर added before रुचयः A·P·M·R·J·F·. स्वतंत्राः added after रुचयः M·R·. नानुरोद्धव्याः for अनुरोद्धव्याः N·G·, नोपरोद्धव्याः S·, नावरोद्धव्याः A·R·F·, न निरोद्धव्याः P·J·E·, रोद्धव्याः M·. ४८ एवम् omitted S·. आर्य for एतत् S·B·E·N·G·. अपि added after कदाचिद् B·E·N·G·. रुचिः प्रवर्तिष्यते for प्रवृत्तिः B·N·, रुचिः प्रवर्तयिष्यति S·, रुचिः प्रवर्तयिष्यते G·, प्रवृत्तिर्भविष्यति E·. इतः for इति G·. प्रश्नस्यावकाशः S·E·G·.

४९ चाण०। वृषल सम्यग् गृहीतवानसि। न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टते।

५० राजा। आर्य अत एव शुश्रूषा मां मुखरयति।

५१ चाण०। वृषल इह खल्वर्थशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयन्ति राजायत्तां सचिवायत्तामुभयायत्तां च। तत्र सचिवायत्तसिद्धेस्तव किं प्रयोजनान्वेषणेन। वयमेवात्राभियुक्ता वत्स्यामः।

राजा सकोपं मुखं परावर्तयति। नेपथ्ये वैतालिकौ पठतः।

५२ प्रथमः। आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती
शीतांशोरंशुजालैर्जलधरमलिनां क्लिश्नती कृत्तिमैभीम्।
कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा
हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः॥२०॥

---

४९ महाशयम् added after असि B.N. . न हि for न B.N. . अनपेक्षमाणः for अन्तरा B.E.N. , अनपेक्ष्य G. , प्रे(sic.अप्रे)क्षमाणः S. . श्रूयताम् added after चाणक्यः E. . सुप्तोऽपि for स्वप्नेऽपि E. . चेष्टिष्यते E. , चेष्टयिष्यति S. , रुचिं प्रवर्तयिष्यति B.N. . इति added at the end in all but P.G. . ५० आर्य omitted F. . प्रयोजनशुश्रूषा S.B.E.N.G. . ५१ श्रूयताम् added after वृषल in all but S.G. ; अवधार्यताम् superadded in R. . शास्त्रार्थकाराः R. . त्रिविधसिद्धिम् B.N. . तद्यथा added before राजायत्तां S.B.E.N.G. . ततः for तत्र A.P.M.R.J.F. , तत् S.B.N.G. . भवतः for तव S.B.N.G. . फलान्वेषणेन B.N. , प्रयोजनान्वेषणेन G. . वाङ्मनसो(sic.सौ) खेदयितुम् added after this S. , वाङ्मनसी खेदयितुम् N.G. , वाङ्मनसयोः खेदमुत्पादयितुम् B. , वाङ्मनसयोः खेदमुत्पादयितुं फलम् F. . यतो added before वयम् in all but E.G. - एव omitted S. . नियुक्ताः for अभियुक्ताः in all but S.E.G. . एव स्मः for वत्स्यामः S. , वेत्स्यामः B.N. , वेदिष्यामः M.R. . ५२ तूल for काश S.E. . क्लिश्यती S.E.N.G. . हास A.P.M.R.J.F. .

अपि च

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
मात्मव्यापारगुर्वी जनितजललवा जृम्भितैः साङ्गभङ्गैः।
नागाङ्कं मोक्तुमिच्छोः शयनमुरु फणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः॥२१॥

५३ द्वितीयः।

सत्त्वोत्कर्षस्य धात्रा निधय इव कृताः केऽपि कस्यापि हेतो-
र्जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणाम्।
दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपा
नाज्ञाभङ्गं सहन्ते नृवर नृपतयस्त्वादृशाः सार्वभौमाः॥ २२॥

अपि च

भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः।
परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते॥ २३॥

५४ चाण० स्वगतम्। प्रथमं तावद्विशिष्टदेवतास्तुतिरूपेण प्रवृत्तशरद्गुणप्रख्यापनम्। इदमपरं किमिति नावधारयामि। विचिन्त्य। आः ज्ञातम्। राक्षसस्यायं प्रयोगः। दुरात्मन् राक्षस दृश्यसे। जागर्ति खलु कौटिल्यः।

जम्भितैः A. . स्वाङ्ग N. . नागाङ्कं in all but F.E. . ५३
त्यक्त(sic.व्यक्त)S. . भङ्ग R. . भूषणाद्युपयोगेन M.R.F. , भ्रमणा-
द्युपचारेण N. . परैरनभि for परैरपरि P.R.E. . त्वमेव F. . ५४
देवतारूपेण S. , देवतारूपकेण E.G. , देवतारूपेण B.N. . प्रख्यापनेन
for प्रख्यापनम् E. ; वर्णनम् for गुणप्रख्यापनम् G. . आशीर्वचनम्
added after प्रख्यापनम् in all but A.P. ; इदम् superadded
in B.N.G. . न before अवधारयामि omitted S.G. . भवतु for
ज्ञातम् S.E.G. . राक्षसप्रयोगः F. . आ दुरात्मन् राक्षसहतक B.N. . भोः
added before जागर्ति A.P.M.R.J.F. .

५५ राजा । आर्य वैहीनरे आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

५६ कञ्चु० । यदाज्ञापयति देवः । इत्युत्थाय परिक्रामति ।

५७ चाण० सक्रोधम् । वैहीनरे तिष्ठ तिष्ठ न गन्तव्यम् । वृषल किमयमस्थाने महानर्थोत्सर्गः ।

५८ राजा सकोपम् । आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बन्धनमिव राज्यं न राज्यमिव ।

५९ चाण० । वृषल स्वयमनभियुक्तानां राज्ञामेते दोषाः संभवन्ति । तद्यदि न सहसे ततः स्वयमभियुज्यस्व ।

६० राजा । एते स्वकर्मण्यभियुज्यामहे ।

६१ चाण० । प्रियं नः । वयमपि स्वकर्मण्यभियुज्यामहे ।

६२ राजा । यद्येवं तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत्प्रयोजनं श्रोतुमिच्छामि ।

---

५५ दीयताम् for दापय S·B·E·N·G· . ५७ तिष्ठ once A·P·M·R·J·F· . न गन्तव्यम् twice S·E· . वृषल twice S·E·G· . एव added after अस्थाने B·N· . अर्थव्ययः G· . क्रियते added at the end S·B·E·N·G· . ५८ आर्ये मैवम् । for आर्येणैवं S· . सर्वतः for सर्वत्र S·B·N· . चेष्टाप्रसर omitted M· ; चेष्टाप्रसरं for चेष्टाप्रसरस्य F· , चेष्टावसरस्य S· . मम B·N· . इदम् for इव A·P·R·F· ; इदम् added after इव M· , राज्यसुखावाप्तिरिति S· . ५९ एतद्दोषः S· ; संभवन्ति omitted S· , भवन्ति for it B·E·N·G· . ततः omitted E· ; तदा for it B·N· . एव added after स्वयम् B·N· . अभियुज्यस्व F· . ६० वयं added before एते B·N· . ६१ कल्याणं for प्रियं A·M·R·F· . वय ......युज्यामहे omitted in M· . The whole speech is omitted in P· . ६२ तेनाहं for तर्हि S·E· , तेन हि चाणक्य G· . महोत्सवानुष्ठान for महोत्सव G· . एव added before तावत् S·E· . तावत् omitted B·N·. एव added after प्रयोजनम् G·.

६३ चाण० । वृषल कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि ।

६४ राजा । प्रथमं तावन्ममाज्ञाया अव्याघातः ।

६५ चाण० । वृषल ममापि तवाज्ञाया व्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनम् । कुतः ।

अम्भोधीनां तमालप्रभवकिसलयश्यामवेलावनाना-
मा पारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम् ।
मालेवाम्लानपुष्पा तव नृपतिशतैरुह्यते या शिरोभिः
सा मय्येव स्खलन्ती कथयति विनयालंकृतं ते प्रभुत्वम् ॥२८॥

६६ राजा । अथापरमपि प्रयोजनं यत् तच्छ्रोतुमिच्छामि ।

६७ चाण० । तदपि कथयामि ।

---

६३ तर्हि added before कौमुदी G· . कौमुदी omitted M·R·F· . करण for अनुष्ठान G· . किम् and इति omitted G· . ६४ तावन्मम omitted G· . आज्ञाव्याघातः A·P·M·J·B· , आज्ञाविघातः S·G· , आज्ञाविधानम् N· , आर्याज्ञाव्याघातः F· . ६५ ममापि G· . खलु त्वदाज्ञाव्याघातः for तवाज्ञाया व्याघातः B·E·N· , त्वदाज्ञाविघातः G· , तवाज्ञाविघातः S· , तवाज्ञाव्याघातः A·P·M·R·J·F· . तत् for कौमुदीमहोत्सव G· . प्रतिषेध omitted P· . कारणम् for प्रयोजनम् E· . प्रचल for प्रभव S· . तीरेभ्यः for पारेभ्यः S· . चतुर्भिर्मि(sic· तिमि) E· . मालेवाज्ञा नपुष्पा B·N· . नतनृपति S·B·E·N· , नवनृपति G· . प्रथयति S·B·E·N· , कथमि(sic·य)ति P· . ६६ तु added after अथ G· . ६७ ततः added before तदपि G· . ६६—६७ These two speeches are replaced by अथ त्वमपरमपि प्रयोजनं श्रोतुमिच्छसि तदपि कथयामि read in continuation of मु·रा·।३।६५। in A·P·M·R·J·F·S·E· , of these E· . omitting अथ and S·E· adding ततः before तदपि.

६८ राजा । **कथ्यताम् ।**

६९ चाण० । **शोणोत्तरे मद्वचनात् कायस्थमचलं ब्रूहि यत् तद् भद्रभटप्रभृतीनां लेख्यपत्रं दीयताम् ।**

७० प्रती० । **जं अज्जो आणवेदि ।** निष्क्रम्य पुनः प्रविश्य । **अज्ज इमं तं पत्तअं ।**

७१ चाण० गृहीत्वा । **वृषल श्रूयताम् ।**

७२ राजा । **दत्तावधानोऽस्मि ।**

७३ चाण० वाचयति । **स्वस्ति । सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोऽपरागादपक्रम्य वध्यमलयकेतुमाश्रितानां प्रमाणलेख्यपत्रमिदम् । प्रथमं तावद् गजाध्यक्षो भद्रभटोऽश्वाध्यक्षः पुरुषदत्तो महाप्रतीहारस्य चन्द्रभानोर्भा-**

---

७० यदार्य आज्ञापयति । आर्य इदं तत् पत्रकम् ।

---

६८ अवहितोऽस्मि added after कथ्यताम् A·P· . ६९ शोणोत्तरे twice B·N·G· . अचलदत्तं B·N· . भद्रभट्ट E· . इतोऽपरागादपक्रम्य (वध्य R·)मलयकेतुमाश्रितानां added before लेख्यपत्रं in A·P·M·R·J·F· . तावद् added before दीयताम् in S·B·E·N·G· . इति added after दीयताम् in all but G· . ७० एदं for इमं S·B·N· . तं omitted P·J·S·B·E·N·G· . ७१ दृश्यताम् for श्रूयताम् A·P·M·R·J·N· , प्रदृश्यताम् F· . इदम् added at the end A·P·M·J·N·G· . ७२ This speech is omitted in A·P·M·R·J·F· . ७३ राजा स्वगतं for चाण० A·P·M·R·J·F· . स्वस्ति । omitted S·E· . देवस्य omitted S·E· . प्रधान omitted S·G· . अपरागाद् omitted in all. वध्य omitted S·B· . परिमाण for प्रमाण S·B·E·G· . पत्र omitted P· ; इदम् omitted B· ; पत्रमिदं omitted S·N·G· . तत्र added before प्रथमं in all. एव added after प्रथमम् in all but B·N· . तावद् omitted G·. न added after तावत् R·. भद्रभट्टो E·. चन्द्रसेनस्य S·.

गिनेयो डिङ्गरातो देवस्य स्वजनगन्धी महाराजो बलगुप्तो देवस्यैव कुमारसेवको राजसेनः सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणो मालवराजपुत्रो रोहिताक्षः क्षत्रगणमुख्यो विजयवर्मेति।

७४ राजा। अथैतेषामपरागहेतून् श्रोतुमिच्छामि।

७५ चाण०। वृषल श्रूयताम्। अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ भद्रभटपुरुषदत्तनामानौ तौ खलु स्त्रीमद्यमृगयाशीलौ हस्त्यश्वावेक्षणेऽनभियुक्तौ मयाधिकाराभ्यामवरोप्य स्वजीवनमा-

---

डिङ्गि R·E·, डिण्डि N·G·, हिङ्गु B·. एव added after देवस्य G·. संबन्धी for गन्धी in all but B·N·G·. महाराज for महाराजो G·, महाराजवल्लभो S·E·. देवगुप्तो for बलगुप्तो in S·, बलदेवगुप्तो in A·P·M·R·J·F·. देवस्यैव omitted G·. सिंहबलदत्तस्य B·, सिंहपालस्य N·G·; सिंहबलस्य omitted M·R·. लोहिताक्षः in all but B·E·N·. क्षत्रिय S·. मुख्यतमो B·N·, मुख्यभूतो E·. विनयवर्मेति G·. After this is added एते वयं देवस्य कार्ये (v.l. वयं कर्मसु P·) अवहिताः स्म इति ॥ प्रकाशम् ॥ आर्य एतावदेतत् पत्रकम्। अथैतेषामपरागहेतून् विज्ञातुमिच्छामि ॥ in A·P·M·R·J·F·, आत्मगतम् ॥ एते वयं देवस्य कार्ये अवहिताः स्म इति ॥ प्रकाशम् ॥ एतावदेतत् पत्रम् ॥ in B·N·, and एतावदेवैतत् पत्रकम् ॥ only in S·E·. ७४ आर्य for अथ B·E·N·G·; अथ omitted S·. हेतुं S·E·G·. विज्ञातुम् for श्रोतुम् E·G·, ज्ञातुम् S·. पृच्छामि for इच्छामि G·. The whole speech is omitted in A·P·M·R·J·F·. ७५ अत्र omitted M·. दत्तौ for दत्तनामानौ E·. एतौ for तौ B·. खलु omitted S·G·. ०क्षणे हि for ०क्षणे B·N·, ०क्षणेषु S·G·. स्वाधिकाराभ्याम् for अधिकाराभ्याम् B·N·. स्वकन्य for स्व E·; स्व omitted P·.

त्रेणैव स्थापितावित्यपरक्तावपक्रम्य स्वेन स्वेनाधिकारेण मलयकेतुमाश्रितौ। यावेतौ डिङ्गरातबलगुप्तौ तावप्यत्यन्तलोभाभिभूतौ त्वद्दत्तं जीवनमबहु मन्यमानौ तत्र बहु लभ्यत इत्यपक्रम्य मलयकेतुमाश्रितौ। योऽप्यसौ भवतः कुमारसेवको राजसेनः सोऽपि तव प्रसादादतिप्रभूतकोशहस्त्यश्वं सहसैव सुमहदैश्वर्यमवाप्य पुनरुच्छेदशङ्कयापक्रम्य मलयकेतुमाश्रितः। योऽयमपरः सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणोऽसावपि तत्र काले पर्वतकेन सह समुत्पन्नसौहार्दस्तत्प्रीत्या च पिता ते चाणक्येन व्यापादित इत्युत्पाद्य रहसि त्रासयित्वा मलयकेतुमपवाहितवान्। ततो भवदपथ्यकारिषु चन्दनदासादिषु निगृह्यमाणेषु स्वदोषाशङ्कयापक्रम्य

अपक्रान्तौ for अपरक्तौ in E·, परपक्षे in A·P·J·F·, and अपरपक्षे in M·R·. इदानीमितो added after अपरक्तौ S·E·. गत्वा for अपक्रम्य B·N·; अपक्रम्य omitted A·P·M R·J·F·E·. स्वेन once P·M·R·F·. च added before अधिकारेण in B·N·, एव in S·. व्यवस्थाप्य added before मलय० in S·B·E·N·G·, गत्वा in A·P·M·R·J·F·. यौ च तौ for यावेतौ G·. डिण्डि S·. गुप्ताख्यौ for गुप्तौ A·M·R·, भद्राख्यौ P·. तौ omitted G·. अपि omitted A·P·R·. अत्यर्थं for अत्यन्त N·, अति E·. लोभासक्तौ B·, लोभाभियुक्तौ N·, लोभाभिभूतत्वात् S·E·. दत्तं for त्वद्दत्तं B·N·, दत्तमपि S·. धनम् for जीवनम् B·N·. अल्पं for अबहु S·. अपक्रम्य omitted S·B·E·N·G·. इति added after राजसेनः A·P·M·R·J·F·E·. अतिमात्रं for अतिप्रभूत S·B·N·G·, अतिमात्र E·. कोशसहस्रं for कोशहस्त्यश्वं S·. तन्महद् A·P·M·R·J·F·. उच्छेदा for उच्छेद E·G·, एवोच्छेद S·. अपक्रम्य omitted M·. सिंहबलदत्तस्य B·. उत्पन्न for समुत्पन्न E·. च omitted M·. घातितः for व्यापादितः S·B·E·N·G·. उत्पाद्य omitted S·B·E·N·G·. ततो omitted F·. भवदपकारिषु S·. ०दासप्रमुखेषु S·E·, ०दासप्रभृतिषु B·N·G·. निगृहीतेषु A·P·M·R·J·F·. स्व omitted A·P·F·G·; राज for स्व M·R·. दोषशङ्कया P·M·R·S·. अपक्रम्य omitted S·.

मलयकेतुमाश्रितः । तेनाप्यसौ मम प्राणरक्षक इति कृतज्ञतामनुवर्तमानेनात्मनोऽनन्तरममात्यपदं ग्राहितः । यौ तौ रोहिताक्षविजयवर्माणौ तावप्यतिमानित्वात् स्वदायादेभ्यस्त्वया दीयमानं मानमसहमानौ मलयकेतुमाश्रितौ । इत्येषामपरागहेतवः ।

७६ राजा । एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण ।

७७ चाण० । वृषल न पारितं प्रतिविधातुम् ।

७८ राजा । किमकौशलादुत प्रयोजनापेक्षया ।

७९ चाण० । कथमकौशलं भविष्यति । प्रयोजनापेक्षयैव ।

८० राजा । प्रयोजनमिदं श्रोतुमिच्छामि ।

प्राणरक्षिता for प्राणरक्षकः in S. , अनेन (v.l. एतेन G.) प्राणाः परिरक्षिताः B.E.N.G. . पैतृकं च परिचयम् added before आत्मनो S.B.E.N.G. ; ज्ञात्वा superadded S.E. . पदवीमारोपितः E. . यावेतौ S.B.E.N.G. . लोहिताक्ष A.P.M.R.J.F.S. . अपि omitted B.N. . अत्यन्त for अति S.B.E.N.G. . मानम् omitted A.P.J.G. ; बहु for it M.R. , बहु धनम् E. , बहुसंमानम् B.N. . एतेषाम् for एषाम् A.P.G. , एवमेतेषाम् S. . ७६ आर्य added before एवम् B.N.G. . एषु for एतेषु S.G. . विज्ञा for परिज्ञा M.R.F. , विज्ञापि A.P. . हेतु omitted S. . अपि added before क्षिप्रम् B.N. . प्रतिविधानं विहितम् for प्रतिविहितम् G. . ७७ सांप्रतं for पारितं M. . प्रतिविधातुम् omitted G. . ७८ प्रयोजनापेक्षितया S.B. . उत omitted F. . वा added at the end F. . ७९ किम् for कथम् M.R. . नियतं added before प्रयोजना० S.B.E.N.G. . प्रयोजनापेक्षितया B. . एव omitted S.B.E.N.G. . ८० तदप्रतिविधान added in the beginning in B.N. , अप्रतिविधानस्य in E.G. . इदानीं for इदं in all but P. .

८१ चाण०। श्रूयतामवधार्यतां च । इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानमनुग्रहो निग्रहश्च । अनुग्रहस्तावदाक्षिप्ताधिकारयोर्भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव । अधिकारश्च तादृशेषु व्यसनयोगादनभियुक्तेषु पुनरारोप्यमाणः सकलमेव राज्यस्य मूलं हस्त्यश्वमवसादयेत् । डिङ्गरातबलगुप्तयोरतिलुब्धयोः सकलराज्यप्रदानेनाप्यपरितुष्यतोरनुग्रहः कथं शक्यः । राजसेनभागुरायणयोस्तु धनप्राणनाशभीतयोः कुतोऽनुग्रहस्यावकाशः । रोहिताक्षविजयवर्मणोरपि दायादमानमसहमानयोरतिमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यति । इति परिहृतः पूर्वः पक्षः । उत्तरोऽपि

---

८१ वृषल added before श्रूयताम् S·B·E·N·G· . च omitted P· . Before इह is inserted an additional speech राजा ॥ उभयमपि क्रियते। (तत् E·) कथ्यताम् ॥ and then चाण० ॥ वृषल &c. in S·B·E·N·G· . खलु omitted E· . तद्यथा added before अनुग्रहो S·B·N·G· . पुनः added before तादृशेषु B·N· . दोषाद् for योगाद् B·E·N·, विशेषाद् S· . अयुक्तेषु for अनभियुक्तेषु G· . सकलस्यैव B·. आ मूलं for मूलं F·, सकलराज्यमूलं N·. सादयेत् for अवसादयेत् M· , अवसादयति S·B·E·N·G· . डिण्डि S· . अतिलुब्धयोः omitted F· . अत्यन्त for अति B·E·N· . लुब्धप्रकृतिकयोः for लुब्धयोः S·B·N· , लुब्धप्रकृत्योः E·G· . संप्रदानेन B·N· , संपादनेन S·G· , प्रसादनेन E· . कर्तुं न for कथं E· . कर्तुं शक्यते for शक्यः B·N· . स्व added before धन B·N· . प्रणाश for प्राणनाश A·P·M·R·J·F·S·G· . अनुग्रहावकाशः S· . दायादमसहमानयोः for दायादमानमसहमानयोः in A·P·R·J· , दायादमानपीडितयोः in S·G· , and दायादमानप्रदानपीडितयोः in B·E·N· ; after it मानमप्यपमानं मन्यमानयोः added in S·B·E·N·. अत्यन्त for अति S·B·E·N·. विजनयिष्यति E·. इति omitted M·R· . पूर्वपक्षः G· . अयम् added after पक्षः M· . अपरो for उत्तरो E·. अपि omitted S· .

खलु वयमचिरादधिगतनन्दैश्वर्याः सहोत्थायिनं प्रधानपुरुषवर्गमुग्रेण दण्डेन पीडयन्तो नन्दकुलानुरक्तानां प्रकृतीनामविश्वास्या एव भवाम इति परिहृत एव। तदेवमनुगृहीतास्तत्पक्षो राक्षसोपदेशप्रवणो महीयसा म्लेच्छराजबलेन परिवृतः पितृवधामर्षी पर्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यतः। सोऽयं व्यायामकालो नोत्सवकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेन।

८२ राजा। आर्य बहु प्रष्टव्यमत्र।

८३ चाण०। वृषल विश्रब्धं पृच्छ। ममापि बह्वाख्येयमत्र।

खलु omitted M· . वयमपि for वयम P·M·R·F· , वयमति A· . नन्दैश्वर्यं for अचिरादधिगतनन्दैश्वर्याः A·P·M·R·F· . सहोत्थायिनः A·P·M·R·F· , सहास्थान S· , चन्द्रगुप्तसहोत्थायि G· . पुरुषानुल्लक्ष्य for पुरुषवर्गमुग्रेण M·R·F· , पुरुषानुल्लक्ष्येन A·P· , पुरुषमुग्र G· . दण्डयन्तो for पीडयन्तो S· . प्रकृतीनाम् omitted M·R· . एव omitted S·B·E·N·G· . मा भूम for भवामः B·E·G· . अतः added after इति in all but G· . उप for अनु after तदेवम् in E· , उपगं in S· . कृत्यपक्षो for पक्षो S· , भृत्यपक्षो B·E·N· , बलो G· . राक्षसस्योपदेशप्रवणो E· , राक्षसोपदेशश्रवणप्रवणो B·N· . म्लेच्छबलेन A·P·M·R·J·F·S· . परिवृतः omitted M·R· . वधामर्षितः S·B·N·G· , वधादमर्षितः E· . उद्यत इति S·B·N·G· . तत्सोऽयं G· . न सुवासिकायाः for नोत्सवकालः S·E· . अतः added before दुर्ग B·N·G· . आरब्धव्ये B·N· , एवारब्धव्ये E· , विधातव्ये G· . इति प्रतिषिद्धः (v.l. ०द्धम् M·R·) added at the end in all but G· . ८२ बहु omitted R· . मया added at the end G· . ८३ मयापि for ममापि E· . अस्ति for अत्र G· . राजा ॥ एष पृच्छामि ॥ added after अत्र in S·B·E·N·G· ; चाण० ॥ एष कथयामि ॥ superadded in S· . चाण० ॥ अहमप्येष कथयामि ॥ in B·N· , चाण० ॥ वृषल अहमप्येष कथयामि ॥ in E· .

८४ राजा। सोऽप्यस्य सर्वस्यानर्थस्य हेतुर्मलयकेतुः कस्मादपक्रामन्नुपेक्षितः।

८५ चाण०। वृषल अनुपेक्षणे द्वयी गतिर्निगृह्येत वा प्रतिश्रुतं राज्यार्धं प्रतिपाद्येत वा। निग्रहे तावत् पर्वतकोऽस्माभिरेव व्यापादित इतिकृतघ्नतायाः स्वहस्तो दत्तः स्यात्। राज्यार्धप्रतिपादनेऽपिपर्वतकविनाशे कृतघ्नतामात्रपरिहारः स्यात्। इति मलयकेतुरपक्रामन्नुपेक्षितः।

---

८४ राजा omitted and the speech read in continuation of राजा ॥ एष पृच्छामि ॥ given in the foregoing footnote in G. . आर्य योऽस्य for सोऽप्यस्य E., आर्य योऽस्माकम् S., आर्य योऽयमस्माकम् G. . एव added after सर्वस्य S.B.E.N. . अनर्थहेतुः B.N. . स added after केतुः S.B.E.N.G. . कथम् for कस्माद् E.G. . आर्येण added after कस्माद् S.B.N. . ८५ वृषल omitted M. . उपेक्षणे for अनुपेक्षणे M.F. , मलयकेतोरपक्रमणानुपेक्षणे B.N. , मलयकेतोरनुपेक्षितो (sic.ते)ऽपक्रमणे G. , मलयकेतावनुपेक्षितापक्रमणे E. , मलयकेतोरप्यनुपेक्षितस्यानपक्रमणे S. . स्यात् added after गतिः B.E.N. . द्वे गती स्याताम् for द्वयी गतिः S. . अनुगृह्येत निगृह्येत वा। अनुग्रहे (तावत् G.) for निगृह्येत वा in B.N.G. ; दीयतेऽस्य for प्रतिपाद्येत वा G. ; वा omitted B.E.N. . त्वस्य पिता for तावत् G. . अस्य added after तावद् S.B.E.N. . एव omitted F.B.E.N.G. . कृतघ्नतायां G. , कृतज्ञ (sic.घ्न)तायाः S. . स्वयं for स्व B.E.N. . भवति for स्यात् G. . प्रतिश्रुत added before राज्यार्धं A.P.J.B.E.N.G. . अर्धराज्य for राज्यार्ध B.N. . प्रदाने for प्रतिपादने G. . विनाशः for विनाशे in all but M.R.F. . केवलं added before कृतघ्नता A.J.B.E.N.G. , केवलमेव P.S. . कृतज्ञ(sic.घ्न)ता S. . मात्रकं for मात्रपरिहारः E. . फलः for परिहारः A.P.J.B.N. , फलकः G. .

८६ राजा। अत्र तावदेवम्। राक्षसः पुनरिहैव वर्तमान आर्येणोपेक्षितइत्यत्र किमुत्तरमार्यस्य।

८७ चाण०। राक्षसोऽपि स्वामिनि स्थिरानुरागित्वात् सुचिरमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तविश्वास्यः प्रज्ञापुरुषकाराभ्यामुपेतः सहायसंपदा युक्तः कोशवानिहैवान्तर्नगरे वर्तमानः खलु महान्तमन्तःकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि न दुःखसाध्यो भविष्यति। इत्यपक्रामन्नुपेक्षितः।

८८ राजा। तत् किमर्थमिहस्थ एवोपायैर्नाक्रान्तः।

---

८६ आर्य added before अत्र F·S·B·E·N· . तु added after राक्षसः E·G· . पुनः omitted R· ; तावद् for it S· . अन्तर्नगरे added before वर्तमानः S·B·E·N· , नगरे G· . कथम् added after आर्येण G· , एव M· , अपक्रामन् S· . ८७ वृषल added before राक्षसोऽपि S·B·E·N·G· . खलु added after अपि S·B·E·N·G· . निज added before स्वामिनि B·N· . रागत्वात् A·P·E· . एवात्र for एकत्र B·N·G· . संवासाच्च A·P·F·S·G· , सहवासाच्च B·N· . नन्दकुलानुरक्तानां S· . अत्यन्तं B·E·N· . विश्वास्यतरः S· . सह for सहाय M·R· . सहायैरभियुक्तः F· , संपदाभियुक्तः A·P·M·R·J· . कोशवत्त्वात् B·N· . खलु omitted S· ; न for it E· , नः G· . प्रकोपम् A·P· . बाह्यमर्थं विकुर्वन् for बाह्यकोपमुत्पादयन् F· , बाह्यार्थं विकुर्वन् A· , बाह्यार्थमविकुर्वन् P· , बाह्यमर्थं विद्(sic·द्रा)वन् M·R· . अपि omitted E· . दुःसाध्यो S· . अतो added after इति S·B·E·N· . कथमपि (omitted in P·) उपनिपतितोऽपि शास्त्र इत्यत्रस्तरस्य एव एष्यत्नायः (v.l. इत्ये P·) कष्टसाध्य दूरीकृतः for न दुःख......पेक्षितः A·P·M·R·J· . ८८ अत्रस्थः for इहस्थः E·G· , अत्र स्वयम् S· .

८९ चाण० । कथमनुपक्रान्तो भविष्यति । ननूपायैरेवासौ हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः ।

९० राजा । कस्माद्विक्रम्य न गृहीतः ।

९१ चाण० । राक्षसः खल्वसौ । विक्रम्य गृह्यमाणः स्वयं वा विनश्ये-द्युष्मद्बलानि वा विनाशयेत् । एवं सत्युभयथापि दोषः । पश्य ।

स हि भृशमभियुक्तो यद्युपेयाद्विनाशं
ननु वृषल वियुक्तस्तादृशेनासि पुंसा ।
अथ तव बलमुख्यान् घातयेत् सापि पीडा
वनगज इव तस्मात् सोऽभ्युपायैर्विनेयः ॥ २५ ॥

९२ राजा । न शक्नुमो वयमार्यस्य वाचं वाचातिशयितुम् । सर्वथामात्यराक्षस एवात्र प्रशस्यतरः ।

---

८९ अथ added before कथम् B·N· . अपक्रान्तः for अनुपक्रान्तः B·N· . हृदयशङ्कुः S· , हृदयशल्यः E· . दूरीकरणस्य चोक्तं (v·l. उक्तं G·) प्रयोजनम् added at the end B·E·N·G· . ८८–८९ These two speeches are omitted in A·P·M·R·J·F· . ९० आर्य added before कस्माद् in all but S· . The latter omits the whole speech. ९१ वृषल added before राक्षसः S·B·E·N·G· . विक्रम्य omitted P· . निगृह्यमाणः S·B·E·N·G· , विगृह्यमाणः P· . अतिनश्येद् for वा विनश्येद् S· . च for वा before विनाशयेत् S· . युष्मद्बलानि बहूनि नाशयेत् स्वयं वा विनश्येत् A·P·M·R·J·F· . अपि before दोषः omitted S· . दोषाः M· . वियुक्ताः B· . अपि for असि R·J·P·S·B·E·N·G· , एव A·P· . नाशयेत् for घातयेत् S·B·E·N· . नव for वन B· . सोऽभ्युपायैः in all but E· . ९२ तत्र for न A·P·F· . वाचा वाचम् for वाचं वाचा in S·B·N· , मतिम् in the rest . [illegible]तुम् A· . अपि added after सर्वथा S· . अत्र omitted M· ; नः for it S· .

९३ चाण० सक्रोधम् । न भवानिति वाक्यशेषः । भो वृषल तेन किं कृतम् ।

९४ राजा । श्रूयताम् । तेन खलु महात्मना

लब्धायां पुरि यावदिच्छमुषितं कृत्वा पदं नो गले
व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः ।
अत्यर्थं विपुलैश्च नीतिविभवैः संमोहमापादिता
विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्ग्येषु नः ॥२६॥

९५ चाण० विहस्य । एतत् कृतं राक्षसेन ।

९६ राजा । अथ किम् । एतत् कृतममात्यराक्षसेन ।

९७ चाण० ।–वृषल मया पुनर्ज्ञातं नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतू राजाधिराजपदे नियोजित इति ।

---

९३ सक्रोधम् omitted S·E·G· . मा तावदेवम् added before भो B·N· , न तावत् A· , ननु तावत् P· , न तावत् त्वम् E· . मा तावत् for भो S· . खल for वृषल G· . ९४ यदि न ज्ञायते added before श्रूयताम in E· , यदि न ज्ञायते तदा in B·N· , यदि न ज्ञायते तत् in S·G· . खलु येन for तेन A·P· , येन M·R·J·F·S·E·G· . रुद्धायां S· निपुणैः for विपुलैः S· . स्वनीति for च नीति A·P·J·E· , सुनीति B·N· . वर्गेषु P·M·R·J·F·S·B·N· , मार्गेषु G· . ९५ वृषल added before एतत् B·E·N·G· . ९६ अथ किम् । omitted S·E· . The whole speech is omitted in A·P·M·R·J·F·G· . ९७ चाण० । omitted and the speech read in continuation of मु·रा·।३।९५। in A·P·M·R·J·F·G· . वृषल omitted G· . न added after पुनः G· . ज्ञात्वा for ज्ञातं S· . उत्कृत्य E· . किं न added after मलयकेतुः S· . अधिराज्यपदं for राजाधिराजपदे E· . योजितः F·N·G· . इति omitted S· .

९८ राजा। अन्येनेदमनुष्ठितम्। किमत्रार्यस्य।

९९ चाण०। अहो मत्सरिन्

आरुह्यारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडां
लोकप्रत्यक्षमुग्रां सकलरिपुकुलोत्सादद्दीर्घां प्रतिज्ञाम्।
केनान्येनावलिप्ता नव नवनवतिद्रव्यकोटीश्वरास्ते
नन्दाः पर्यायभूताः पशव इव हताः पश्यतो राक्षसस्य॥२७॥

अपि च

गृध्रैराबद्धचक्रं वियति विचलितैर्दीर्घनिष्कम्पपक्षै-
र्धूमैर्ध्वस्तार्कभासं सघनमिव दिशां मण्डलं दर्शयन्तः।
नन्दानां नन्दयन्तः पितृवननिलयान् प्राणिनः पश्य चित्ता-
न्निर्यान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः॥२८॥

१०० राजा। अन्येनैवेदमनुष्ठितम्।

१०१ चाण०। आः केन।

१०२ राजा। नन्दकुलविद्वेषिणा दैवेन।

१०३ चाण०। दैवमविद्वांसः प्रमाणयन्ति।

---

९८ अलमुपालभ्य। आर्य added in the beginning B·N·. दैवेन for अन्येन S·B·N·. एव added before इदम् in all. ९९ अहो for हे M·R·. स्फुरणमिव करा० M·. कुलोच्छेद B·E·N·. नवनवतिशत for नव नवनवति in all. शूराः for भूताः S·G·. रुध for बद्ध M·. विचरितैः M·, चलतया S·G·, चलनया B·N·, विचलितोद् A·. अस्तार्क for ध्वस्तार्क S·. भासां for भासं in all. तैर्धयन्तः for दर्शयन्तः M·. नन्दैरानन्दयन्तः A·P·R·J·F·, नन्दैरानाययन्तः M·. चैते(sic·चैता) निर्वान्ति for चित्तान्निर्यान्ति in G·, चैता निर्वान्ति in S·, चैतान्निर्वान्ति in the rest. ते न for नैते P·. बहुल M·R·F·. १०१ आः omitted S·B·E·N·G·. १०२ द्वेषिणा for विद्वेषिणा F·S·. इदमनुष्ठितम् added after दैवेन B·E·N·.

१०४ राजा। विद्वांसोऽप्यविकत्थना भवन्ति।

१०५ चाण० सकोपम्। वृषल वृषल भृत्यमिव मामारोढुमिच्छसि।

शिखां मोक्तुं बद्धामपि पुनरयं धावति करः
प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः।
प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना
परीतः कालेन ज्वलयसि पुनः कोपदहनम् ॥२९॥

१०६ राजा सावेगमात्मगतम्। अये कथं सत्यमेवार्यः कुपितः। तथा हि

संरम्भस्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामयापि
भ्रूभङ्गोद्भूतधूमं ज्वलितमिव पुनः पिङ्गया नेत्रभासा।
मन्ये रुद्रस्य रौद्रं रसमभिनयतस्ताण्डवे संस्मरन्त्या
संजातोदग्रकम्पं कथमपि धरया धारितः पादपातः ॥३०॥

१०७ चाण० कृतककोपं संहृत्य। वृषल वृषल अलमुत्तरोत्तरेण। यद्यस्मत्तो गरीयान् राक्षसोऽवगम्यते तदिदं शस्त्रं तस्मै दीयता-

---

१०५ सकोपम् omitted M·R·. वृषल once in all but B·N·G·. कथम् added before भृत्यम् E·. आरोढुम् E·, आरोढुम् F·. मुक्ताम् (?) for बद्धाम् S·. मम for अपि E·. भूमौ पादं प्रहृत्य added with variations as a stage-direction before प्रतिज्ञामारोढुं &c. in all but M·R·. पुन for पुन M·R·. चलो for चलत E·. क्रम for पुनः in all but B·N·. १०६ नेपथ्ये for सावेगमात्मगतम् M·. ननु added after अये S·B·E·N·. गरम्भात्स्पन्द S·B·E·N·G·, संरम्भात् स्पन्द F·. भ्रूभङ्गोद्भेद in all but E·. पुरः for पुनः A·P·M·R·J·F·G·. ताण्डवेषु स्मरन्त्या in all but B·N·. संजातोदग्रकम्पं A·P·M·R·J·F·, संपातोदग्रकम्पं E·, संजातापि ... G·. कथमिव for कथमपि R·F·. पादपातः S·E·. १०७ वृषल once A·M·R·F·S·G·. वरीयान् S·B·E·N·. भवता added after अवगम्यते E·. एतद् for तद् F·S·B·E·N·; तद् omitted G·.

म् । शय्यागृहगतोऽस्मात् च प्रत्यक्षादाकाशे लक्ष्यं बद्ध्वा स्वगतम् । राक्षस राक्षस एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः ।

चाणक्यतश्चलितभक्तिमहं सुखेन
जेष्यामि मौर्यमिति संप्रति यः प्रयुक्तः ।
भेदः किलैष भवता सकलः स एव
संपत्स्यते वत तवैव हि दूषणाय ॥ ३१ ॥

निष्क्रान्तः ।

१०८ राजा । आर्य वैहीनरे अतः प्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राजकार्याणि करिष्यतीति गृहीतार्थाः क्रियन्तां प्रकृतयः ।

१०९ कञ्चु० स्वगतम् । कथं निरुपपदमेव चाणक्यमिति नार्यचाणक्यमिति । हन्त संहृतोऽधिकारः । अथ वा न खल्वत्र वस्तुनि देव-

---

राक्षस once A·R·F·G·, एव added after एष B·N· . बुद्धि- प्रकर्षः E· . स्खलित for चलित B·E· . एष for एव S·. शठ for वत A·P·J·S·B·E·N· , स तु G· . विनाशनाय for हि दूषणाय B· . १०८ आर्य omitted G· . अद्य for अतः S·B·E·N·G· . अनादिश्य for अनादृत्य S· . एव omitted S· . राजा कार्याणि for राजकार्याणि E· , राज्यं A·P·M·R·J·F· . Before this speech is added कञ्चु० । देव—कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् । प्रकृतिसुभगा भावा ह्येते मदस्य च हेतवो व्रजति पुरुषो यैरुन्मादं त एव तवाङ्कुशाः॥ in S· . १०९ निरुपपद एव B·N·G· . चाणक्यो नार्य (v·l·नार्यः G·)चाणक्य इति B·E·N·G· , निरुपपेदचाणक्यो मौर्यः चाणक्य इति S· . नार्यचाणक्य इति omitted M·S· . हन्त omitted G· . संगृहीतः A·M·R·J·F· , गृहीतः P· , ननेव हृतः B·N· , सत्यं संहृताधिकारः G· , हृताधिकारः S· . अस्मिन् for अत्र E· . दैवदोषः R·G· , देवं (v·l·देवं E·) दोषेणावगन्तुमर्हामि B·E·N· , देवं दोषेणावगच्छामि S· .

दोषः। कुतः।

स दोषः सचिवस्यैव यदसत् कुरुते नृपः।
याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम्॥ ३२॥

११०राजा। आर्य किं विचारयसि।

१११कञ्चु०। देव न किंचिद्विचारयामि। किं त्वेतच्चिन्तयामि दिष्ट्या देव इदानीं देवः संवृत्त इति।

११२राजा स्वगतम्। एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः सकामो भवत्वार्यः। प्रकाशम्। आर्य आर्य शीघ्रं गच्छ गच्छ।

११३कञ्चु०। यदाज्ञापयति देवः। निष्क्रान्तः।

११४राजा। शोणोत्तरे अनेन शुष्ककलहेन शिरोवेदना मां बाधते। तच्छयनगृहमादेशय।

कुतः omitted B·N·. ११० आर्य omitted R·. किमेवं विचारेण भवतः S·. १११ नरदेव M·. विचारयामि। किं त्वेतच्चिन्तयामि omitted in A·P·M·R·J·F·G·. विज्ञापयामि for चिन्तयामि B·N·, विचारयामि S·. इति omitted in all but B·N·. ११२ निगृह्यमाणेषु for गृह्यमाणेषु S·B·N·G·, विगर्ह्यमाणेषु E·. The प्रकाश portion of the speech is omitted in all but E·, the manuscript F· omitting the स्वगत portion also. ११३ The speech is omitted in all but E·, which reads आर्य: for देवः. ११४ राजा। omitted and the speech read in continuation of मु·रा·३।११२। with the stage direction प्रकाशम् in all but F·E·. आर्य for शोणोत्तरे G·. अनेन omitted R·. शिरोव्यथा G·. तत् omitted A·M·R·J·S·G·; ततः for it E·. गृहमार्गम् for गृहम् A·P·. The whole speech is altogether omitted in F·.

११५ प्रती०। एदु एदु देवो।

११६ राजा स्वगतम्।

आर्याज्ञयैव मम लङ्घितगौरवस्य
बुद्धिः प्रवेष्टुमिव भूविवरं प्रवृत्ता।
ये सत्यमेव हि गुरूनतिपातयन्ति
तेषां कथं नु हृदयं न भिनत्ति लज्जा ॥३३॥

निष्क्रान्तौ।

इति कृतककलहो नाम तृतीयोऽङ्कः।

---

११५ एत्वेतु देवः।

---

११५ एदु once P·R·E· . महाराओ for देवो B·N· . The speech is omitted in F· . ११६ आसनादुत्थाय added before स्वगतम् F·S·B·E·N· . स्वगतम् omitted G· . अवनेर्विवरं (v·l· रे G·) for इव भूविवरं S·B·E·N·G· . न for हि S·B·E·N·G· . गुरुं for गुरून् E· . प्रतिमानयन्ति for अतिपातयन्ति S·B·E· , प्रतिपादयन्ति N·G· . इति निष्क्रान्ताः सर्वे for निष्क्रान्तौ in all. कृतककलहो नाम omitted in all but E· .

ततः प्रविशत्यध्वगवेषः करभकः ।

१ कर० । हीमाणहे हीमाणहे ।

जोअणसदा वि अहिअं को णाम गदागदं इह करेदि ।

अट्ठाणगमणगुव्वी पहुणो अण्णा जइ ण होदि ॥ १ ॥

जाव अमच्चरक्खसस्स एदं गेहं गच्छामि । श्रान्तवत् परिक्रम्य । भो को एत्थ दुवारिआणं । णिवेदेदु भट्टिणो अमच्चरक्खसस्स एसो करभओ तुवरन्तो पाडलिउत्तादो आगदोत्ति ।

२ प्रविश्य दौवारिकः । भद्द सणेहिं मन्तेहि । एसो अमच्चो कज्जचि-

---

१ आश्चर्यमाश्चर्यम् । योजनशतादप्यधिकं को नाम गतागतमिह करोति । अस्थानगमनगुर्वी प्रभोराज्ञा यदि न भवति । यावदमात्यराक्षसस्यैतद् गेहं गच्छामि । भोः कोऽत्र दौवारिकाणाम् । निवेदयतु भर्त्रेऽमात्यराक्षसाय । एष करभकस्त्वरमाणः पाटलिपुत्रादागत इति । २ भद्र शनैर्मन्त्रयस्व । एषोऽमात्यः

---

१ ही ही माणहे for the first हीमाणहे A·P·M·R·J·G· , हि हि माणहे F· , हा हा माणहे N· . The second हीमाणहे omitted R·F·E· . जोअणसअं समहिअं S·B·E·N·G· , राअणिओओ महिओ A·P·M·R·J·F· . गआगआइं इह करइ M·R·F· ; इह omitted E· , हि for it S· . करेज्ज for करेदि E·N·G· , कारज्जं(sic· ज्ज) S· . अत्थाण B·E·N·G· , अट्ठाअ (?) S· . होज्जं (sic· होज्ज) S· , होज्जइ E·G· . ता added before जाव B·N·G· . जोअणसअसमहिअं inserted after जाव F·. ज्जेव for एदं S·B·E·N· . भो omitted A·P·M·R·J·F·S·E· . को twice S· . णिवेदेदु in all. दाव added before भट्टिणो B·N· . अज्जस्स for भट्टिणो अमच्चरक्खसस्स S· . क्खु added after एसो S·B·E·N· . करभओ विअ added after करभओ S·B·E· ; कज्जं superadded B·E· . २ सणिअं A·P·F·, मा उच्चं B·E·N·G·, मा णं उच्चेहिं S· . क्खु added after एसो S·B·E·N· ; भद्दा superadded B·N· . अमच्चरक्खसो for अमच्चो in S·B·E·N·G· . रज्ज for

न्ताजणिदेण जाअरेण समुप्पण्णसीसवेअणो अज्ज वि सअणं ण मुञ्चदि । ता चिट्ठ मुहुत्तअं। लद्धावसरो तुह आअमणं णिवेदेमि ।

१ करः। भद्दमुह तह करेहि ।

ततः प्रविशति शयनगृहगत आसनस्थः शकटदासेन सह सचिन्तो राक्षसः ।

४ राक्ष० स्वगतम् ।

मम विमृशतः कार्यारम्भे विधेरविधेयता-
मथ च कुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम् ।
अपि सुविहिते तत्कृत्यानां निकाममुपग्रहे
कथमिदमिहेत्युन्निद्रस्य प्रयान्त्यनिशं निशाः ॥२॥

अपि च

कार्यचिन्ता जनितेन जागरेण समुत्पन्नशीर्षवेदनोऽद्यापि शयनं न मुञ्चति । तस्मात् तिष्ठ मुहूर्तम् । लब्धावसरस्तवागमनं निवेदयामि । १ भद्रमुख तथा कुरु ।

कज्ज B· . समुप्पादिद for समुप्पण्ण S·G· . सरीर for सीस G·· दाव added after अज्ज वि S·B·E·N·G· . सअणतलं S·B·E·N·G· . विमुञ्चदि N·G· . ताव added after चिट्ठ B·N· . जाव से added before लद्धावसरो S·B·N·G· , जाव E· . भविअ added before तुह S·B·N· G· . भवदो आअमणं B· , भवदाअमणं G· . १ भद्द मुहुत्तअं for भद्दमुह G· . तह करेमि E·N· , तह होदु S· , जधा दे रोअदि P·B· . † ४ गृह omitted S·B·E·N·G· . आसनगतेन S·B·E·N· . ४ कार्यं स्वैरं for कार्यारम्भे S· . अपि च for अथ च A·P·M·R·J·F·S· G· , सहज- B·N· . अपि च विहिते in E· , अथ च विहते in B·N· , अथ च विहिते in the rest. प्रत्कृत्यानां in all but S·B·E· . प्रयात्यनिशं निशा A·P·M·R·J·F·S· . पुरः for पुनः G· , मुहुः N· . तद् omitted M·R· .

कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्
बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च ।
कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्यजातं
कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥३॥

तद् दुरात्मा चाणक्यबटुः

५ उपसृत्य दौवारिकः । जेदु–

६ राक्ष० । अतिसंधातुं शक्यः स्यात् ।

७ दौवा० । अमच्चो ।

८ राक्ष० वामाक्षिस्पन्दनं सूचयित्वात्मगतम् । दुरात्मा चाणक्यबटुर्जयत्वतिसंधातुं शक्यः स्यादमात्य इति वामाक्षिस्पन्दनेन प्रस्तावगतं प्रतिपादयति । तथापि नोद्यमस्त्याज्यः । प्रकाशम् । भद्र किमसि वक्तुकामः ।

९ दौवा० । अमच्च एसो करभओ पाडलिपुत्तादो आअदो दुआरे

---

६ जयतु– ७ अमात्यः । ९ अमात्य एष करभकः पाटलिपुत्रादागतो द्वारि तिष्ठति ।

तदपि for तद् in A·P· , तदपि नाम in the rest. ५ जेदु twice S·B·E·N·G· . ६ अभिसंधातुम् S·B·E·N·G· , अनुसंधातुम् P· . ७ राक्षसः(sic· रक्खसो) added after अमच्चो G· . The speech is omitted in S· . ८ राक्ष० omitted and the speech read in continuation of मु·रा·।७।६ in S· . दुरात्मा omitted R·B·E·N·G· . जयति B·N· . अभिसंधातुम् B·E·N·G· . राक्षसः added after अमात्यः E· . वागीदृशी added after इति in F· , वागीश्वरी in the others excepting S·B· . प्रस्तावगता in all but S·B·E· . All from अतिसंधातुम् to त्याज्यः is omitted in S· . ९ एसो omitted A·P·M·R·J·F· . क्खु added after एसो G· . पाडलिपुत्तादो आअदो omitted A·P·M·R·J·F·G· . आसूदो (sic· आगुदो) added before आअदो N·

चिट्ठदि।

१० राक्ष०। शीघ्रं प्रवेशय।

११ दौवा०। जं अमच्चो आणवेदि। निष्क्रम्य पुरुषमुपसृत्य। भद्द उपसप्प अमच्चम्। इति निष्क्रान्तः।

१२ कर० उपसृत्य। जेदु अमच्चो।

१३ राक्ष०। भद्र उपविश।

१४ कर०। जं अमच्चो अणवेदि। भूमावुपविशति।

१५ राक्ष० स्वगतम्। कस्मिन् प्रयोजने मयायं प्रहित इति प्रयोजनानां बाहुल्यान्न खल्ववधारयामि। इति चिन्तां नाटयति।

ततः प्रविशति वेत्रपाणिः पुरुषः।

१६ पुरु०। ओशलेह अज्जा ओशलेह। अवेह माणहे अवेह। किं

---

११ यदमात्य आज्ञापयति। भद्र उपसर्पामात्यम्। १२ जयत्वमात्यः। १४ यदमात्य आज्ञापयति। १६ अपसरत आर्याः अपसरत। अपेत मानुषाः अ-

---

वट्टदि for चिट्ठदि S. इच्छदि अमच्चं पेक्खिदुं for दुआरे चिट्ठदि B.E.N. १० आर्य किं विचारयसि added before शीघ्रं N.G. अविलम्बितं for शीघ्रं S.E., अवारितं B. एनम् added at the end B. ११ जं...वेदि omitted P.; तह for it A.M.R.J.F. एसो (खु G.) अमच्चो चिट्ठदि। (ता B.E.N.) added before उपसप्प S.B.E.N.G. णं for अमच्चं S.B.E.N.G. १२ जेदु twice S.B.E.N.G. १३ करभक स्वागतम्। उपविश्यताम् for भद्र उपविश S.B.E.N.G. १४ अज्जो for अमच्चो A.P., देवो G. १५ अथ added before कस्मिन् B.E.N. अयं omitted G. प्रणिधिः added after अयं B.N. प्रणिहितः for प्रहितः S. कार्याणां for प्रयोजनानां E.G. प्रभूतत्वात् for बाहुल्यात् S.B.E.N., बहुत्वात् G. १६ ओशलेह and अवेह once only M.R. अज्जा omitted A.P.M.R.J.F. आअदो added before अवेह A.P.M.J.F., अअं R. माणवा for माणहे A.P.M.R.J.F., हीं माणहे S. ता added before किं G.

ण पेस्कह-

दूले पच्चाशत्ती दंशणमवि दुल्लहं अधण्णेहिं ।
कल्लाणकुलहलाणं देआणं भूमिदेआणं ॥ ४ ॥

आकाशे । अज्जा किं भणाह । किं णिमित्तं ओशालणा कलीअदि-त्ति । अज्जा एशे खु कुमाले मलयकेदू शमुप्पण्णशीशवेअणं अमच्चलक्कशं पेस्किदुं इदो य्येव आअश्चदि । ता ओशालणा कलीअदि । इति निष्क्रान्तः ।

ततः प्रविशति भागुरायणेन कञ्चुकिना चानुगम्यमानो मलयकेतुः ।

१७ मल० निःश्वस्यात्मगतम् । अद्य दशमो मासस्तातस्योपरतस्य । न चास्माभिर्वृथापुरुषाभिमानमुद्वहद्भिस्तमुद्दिश्य तोयाञ्जलिरप्यावर्जितः । प्रतिज्ञातमेतत् पुरस्तात्

वक्षस्ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं
हाहेत्युच्चरितार्तनादकरुणं भूरेणुरूक्षालकम् ।

पेत । किं न प्रेक्षध्वम्- दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः । कल्याणकुलगृहाणां देवानां भूमिदेवानाम् ॥

णं पेक्खह णं पेक्खह for किं ण पेस्कह S. गुण for कुल F. देआणं omitted G. अ added before भूमि in S.B.E., विअ in A.P.M.R.J.F.N.. मणुस्स for भूमि A.P.M.R.J.F.N.. भणह P.F.. एसा added before ओशालणा B.N.. ओशालगं A.P.M.R.J.. अज्जा omitted S.. खु omitted G.. उप्पण्ण for शमुप्पण्ण M.R.. सुणिअ added before पेस्किदुं B.. देक्खिदुं for पेस्किदुं A.P.F.. इह for इदो B.E.N.. ता omitted B.. एदिणा कालणेण (मए S.) added before ओशालणा S.B.E.N.G.. १७ अथ for अद्य P.. अपवर्जितः S.. अथ वा added before प्रतिज्ञातम् B.N.. दन्त for रत्न S..

ताहङ्मातृजनस्य शोकजनितं संप्रत्यवस्थान्तरं
शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः ॥५॥

किमत्र बहुना।

उद्यच्छता धुरमकापुरुषानुरूपां
गन्तव्यमाजिनिधनेन पितुः पथा वा।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो
नेयो मया रिपुवधूनयनानि बाष्पः ॥ ६ ॥

प्रकाशम्। आर्य जाजले एक एवाहममात्यराक्षसस्यातर्कितगमनेन प्रीतिमुत्पादयितुमिच्छामि। तदुच्यन्तामस्मद्वचनादनुयायिनो राजानः। कृतमनुगमनेनेति।

१८ कञ्चु०। यदाज्ञापयति कुमारः। परिक्रम्याकाशे। भो भो राजानः

आर्याः किं भणथ। किं निमित्तमुत्सारणा क्रियत इति। आर्याः एष खलु कुमारो मलयकेतुः समुत्पन्नशीर्षवेदनममात्यराक्षसं प्रेक्षितुमित एवागच्छति। तस्मादुत्सारणा क्रियते।

निधाय for विधाय E. तिलाया(sic·तिलस्या) ञ्जलिः N., जलस्याञ्जलिः E. किमिति for किमत्र E., तत् किमत्र N., तत् किमिह B. धु(sic·धु)रमरौ for धुरमका० P., धुरमरौ A.M. गन्तव्यः for गन्तव्यम् F. निहतेन for निधनेन S.G., विहितेन B.E.N. पिता for पथा in E. स्वजनलोचनगोचरेभ्यो S. अतर्कितागमनेन R.B.E.N.G. अतः for तद् S.B., ततः E., यतः G. उच्यताम् (sic· न्ताम्) P.E.G. अस्मदनुयायिनो G. अनुगमनक्लेशेनेति in all but G. उच्यन्तामस्मद्वचनादनुयायिनो राजानः is put before and तत् after एक......च्छामि in all. १८ तथा for यदा... कुमारः A.P.M.R.J.F.

कुमारः समाज्ञापयति। न खल्वहं केनचिदनुगन्तव्य इति। विलोक्य सहर्षम्। कुमारस्याज्ञानन्तरमेव सर्वे राजानो निवृत्ताः। पश्यतु कुमारः।

सोत्सेधैः स्कन्धदेशैः खरतरकविकाकर्षणात्यर्थभुग्नै-
रश्वाः कैश्चिन्निरुद्धाः खमिव खुरपुटैः खण्डयन्तः पुरस्तात्।
केचिन्मातङ्गमुख्यैर्विहतजवतया मूकघण्टैर्निवृत्ता
मर्यादां भूमिपाला जलधय इव ते देव नोल्लङ्घयन्ति ॥ ७ ॥

१९ मल०। आर्य त्वमपि सपरिजनो निवर्तस्व। भागुरायण एको मामनुगच्छतु।

२० कञ्चु०। यदाज्ञापयति कुमारः। इति सपरिजनो निष्क्रान्तः।

२१ मल०। सखे भागुरायण विज्ञप्तोऽहमिहागच्छद्भिर्भद्रभटप्रभृतिभिर्यथा वयममात्यराक्षसद्वारेण न कुमारमाश्रयामहे किं तु कुमारस्य सेनापतिं शिखरसेनं द्वारीकृत्य दुष्टामात्यपरिगृहीता-

---

वः समादिशति for समाज्ञापयति G. कुमार एते added before कुमारस्य E., कुमार कुमार एते B.N., भवदाज्ञासमनन्तरमेव सर्व एव for कुमारस्या...सर्वे B.N.. हि added before पश्यतु S.B.N.G.. सोत्सेकैः E., सौधोच्चैः F.. खरकविककशा E.G., मुखरकविकया B.N., खरतरकालि(sic. वि)का M.R.. ०त्यन्त for ०त्यर्थ M.R.. प्रखरखुरपुटैः for खमिव खुरपुटैः S., खमिव खरपदैः G.. विहित for विहत A.P.E.. १९ राजा for मल० A.P.. जाजले added after आर्य B.E.N.. एक एव for एको B.N.. अनुयातु S.. २० तथा for यदा...कुमारः A.P.M.R.J.F.. सपरिजनो omitted M.R.F.S.G.. २१ किं added before विज्ञप्तः G.. विज्ञापितः for विज्ञप्तः B.E.N.. आश्रयणीयम् added after कुमारम् A.P.M.R.J.F.N.G.. शिखरसेनं omitted F.; शिखरकं for it A.P.M.R.J.. उरीकृत्य for द्वारीकृत्य A.M.R.J.F.G., उररीकृत्य P..

श्चन्द्रगुप्तादपरक्ताः कुमारमाभिगामिकगुणयोगादाश्रयणीयमाश्रयामहे । तन्न मया सुचिरमपि विचारयता तेषां वाक्यार्थोऽवधारितः ।

२२ भागु० । कुमार न दुर्बोधोऽयमर्थः । विजिगीषुरात्मगुणसंपन्नः प्रियहितद्वारेणाश्रयणीय इति न्याय्यमेव ।

२३ मल० । सखे भागुरायण नन्वमात्यराक्षसोऽस्माकं प्रियतमो हिततमश्च ।

२४ भागु० । एवमेतत् । किं त्वमात्यराक्षसश्चाणक्ये बद्धवैरो न चन्द्रगुप्ते । तद्यदि कदाचिच्चाणक्यमतिजितकाशिनमसहमानः

सन्तः added after अपरक्ताः B·E·N·. अ(sic· आ)भिमानिक for आभिगामिक in S·, आभिरामिक in the rest. तत्र for तन्न P·S·. नैतेषाम् for तेषाम् S·. अयं omitted F·S·B·N·. न added before अवधारितः P·. २२ कुमार omitted S·. न omitted F·. एव added after न B·N·. अत्यन्त added before दुर्बोधो B·N·. वाक्यार्थः for अर्थः S·. पश्य added before विजिगीषुः B·N·G·, कुमार S·. विजिगीषुमात्मगुणसंपन्नं A·P·M·R·J·F·. विहित for हित G·. ०श्रयणीयमाश्रयीतेति A·P·M·R·, ०श्रयणीयमाश्रयेदिति J·F·B·N·. ननु added after इति in all but A·P·. न्याय्यः for न्याय्यम् in all but A·G·. अर्थः added after एव F·, अयमर्थः A·P·M·R·J·. This speech is omitted in E·. २३ न त्वन्योऽस्माकममात्यराक्षसात् for नन्वमात्यराक्षसोऽस्माकं S·. निरर्गलं added after अस्माकं E·G·. २४ कुमार added before एवम् B·E·N·. एव तत् for एतत् R·. चाणक्यं प्रति for चाणक्ये S·. न तु for न B·N·G·. चन्द्रगुप्तं प्रति for चन्द्रगुप्ते S·. न चन्द्रगुप्ते omitted F·. तद्यदि omitted S·; चन्द्रगुप्तो यदि for it F·. चन्द्रगुप्तः added before चाणक्यम् B·E·N·G·. जितकाशितया for जितकाशिनम् E·.

स साचिव्यादवरोपयेत् ततो नन्दकुलभक्त्या नन्दान्वय एवायमिति सुहृज्जनापेक्षया चामात्यराक्षसश्चन्द्रगुप्तेन सह संदधीत। चन्द्रगुप्तोऽपि पितृपर्यायागत एवायमिति संधिमनुमन्येत। एवं सत्यस्मासु कुमारो न विश्वसेदित्ययमेषां वाक्यार्थः।

२५ मल०। युज्यते। अमात्यस्य गृहमादेशय।

२६ भागु०। इत इतः कुमारः। परिक्रम्य। इदममात्यगृहम्। प्रविशतु कुमारः।

२७ मल०। एष प्रविशामि।

२८ राक्ष० स्वगतम्। आः स्मृतम्। प्रकाशम्। भद्र अपि दृष्टस्त्वया कुसुमपुरे वैतालिकः स्तनकलशः।

२९ कर०। अमच्च अह इं।

---

२९ अमात्य अथ किम्।

स omitted A·P·F·S·B·E·N·G·. अपरोपयेत् A·P·E·. नन्दकुलः for नन्दान्वयः A·P·. च added before अयम् E·. कृत्वा added after इति B·N·. संपन्न added before गृह० B·N·, संयत S·E·G·. संधीयेत S·. चन्द्र......मन्येत omitted in S·. पारंपर्यागत for पर्यायागत B·. कृत्वा added before संधिम् B·N·. च added after एव S·. अपि added after अस्मासु S·B·E·N·. विश्वस्याद् for विश्वसेद् E·. इति omitted S·. एतेषां for एषां R·, एषो (sic. एषां or एष) S·. २५ सखे भागुरायण added before अमात्यस्य B·N·. अमात्यराक्षस- for अमात्यस्य E·, अमात्यराक्षसस्य S·B·N·G·. गृहमार्गम् B·N·. २६ इतः once R·. कुमार added before इदम् S·B·E·N·G·. राक्षसस्य inserted after अमात्य S·B·E·N·G·. इत इतः कुमारः। परिक्रम्य। and प्रविशतु कुमारः। omitted in G·. २८ स्वगतम् omitted B·N·G·; स्मृत्वा for it E·. आः स्मृतम्। प्रकाशम्। omitted E·. अये for आः A·P·M·R·J·F·G·. वैतालिकः omitted A·P·M·R·J·F·G·.

३० मल० आकर्ण्य । सखे भागुरायण कुसुमपुरवृत्तान्तः प्रस्तूयते । न तत्र तावदुपसर्पामः । शृणुमस्तावत् । कुतः ।

सत्त्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः ।
अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः ॥ ८॥

३१ भागु० । यदाज्ञापयति कुमारः ।

३२ राक्ष० । भद्र अपि तत्कार्यं सिद्धम् ।

३३ कर० । अमच्चप्पसाएण सिद्धं ।

३४ मल० । सखे भागुरायण किं तत् कार्यम् ।

३५ भागु० । कुमार गहनः खलु सचिववृत्तान्तो नैतावता परिच्छेत्तुं शक्यते । अवहितस्तावच्छ्रोतुमर्हति कुमारः ।

३६ राक्ष० । भद्र विस्तरेण श्रोतुमिच्छामि ।

---

३३ अमात्यप्रसादेन सिद्धम् ।

---

३० सखे omitted in all but B·E·N· . वृत्तान्ते G· . प्रस्तूयते omitted G· ; प्रस्तुतः for it S·E· , वर्तते B· . तस्म for न M·B·E·N· . तत्र omitted M·B·E·N·G· . तावद् omitted B·N· . उपसर्पावः S·B·E·N·G· . तत् पटान्तरितावेव added before शृणु० G· . शृणुमस्तावत् omitted E· . शृणुवः for शृणुमः G· . किं कारणमिति for कुतः in S·B·N· , किं कारणमिति । पश्य in E· , किं कारणमेतत् G· . मन्त्र for सत्त्व B· . राज्ञः F· . पुनः for पुरः A·P·M· . ३२ भद्र omitted S· . ३३ अमच्चस्स B·E·N· . ३४ सखे omitted S·E·G· . भागुरायण omitted M·R·F· . सिद्धम् added after कार्यम् E· . ३५ खलु omitted in all but B·E·N· . इच्छति for अर्हति E· . शृणु for श्रोतुमर्हति कुमारः A·P·M·R·J·F· . ३६ भद्र omitted S· . तत् added after भद्र G· .

३७ कर० । सुणादु अमच्चो । अत्थि दाव अहं अमच्चेण आणत्तो । करभअ कुसुमपुरं गच्छिअ मह वअणेण भणिदव्वो तुए वेआलिओ थणकलसो जह चाणक्कहदएण तेसु तेसु अण्णाभङ्गेसु अणुचिट्ठीअमाणेसु चन्दउत्तो समुत्तेअणसमत्थेहि सिलोएहिं उवसिलोअइदव्वो त्ति ।

३८ राक्ष० । ततस्ततः ।

३९ कर० । तदो मए पाडलिउत्तं गदुअ सुणाविदो अमच्चसंदेसं वेआलिओ थणकलसो । एत्थन्तरे णन्दउलविणासदूणस्स पोरजणस्स परितोसं समुप्पादअन्तेण चन्दउत्तेण आघोसिदो को-

---

३७ शृणोत्वमात्यः । अस्ति तावदहममात्येनाज्ञप्तः । करभक कुसुमपुरं गत्वा मम वचनेन भणितव्यस्त्वया वैतालिकः स्तनकलशो यथा चाणक्यहतकेन तेषु तेष्वाज्ञाभङ्गेष्वनुष्ठीयमानेषु चन्द्रगुप्तः समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्य इति । ३९ ततो मया पाटलिपुत्रं गत्वा श्रावितोऽमात्यसंदेशं वैतालिकः स्तनकलशः । अत्रान्तरे नन्दकुलविनाशदूनस्य पौरजनस्य परितोषं समुत्पादयता चन्द्रगुप्तेनाघोषितः कौमुदी-

---

३७ अज्जो for अमच्चो G. एत्थ for अत्थि S. अमच्चेण omitted G. जह added before करभअ in all but S. करभअ twice B.N.G. गच्छ for गच्छिअ A.P.M.R.J.F.S. तुए omitted S.E.G. भण वेआलिअं थणकलसं for भणिदव्वो......कलसो A.P.M.R.J.F. अणुचिट्ठअन्तेसु S., अणुचिट्ठ(-ट्ठि)अमाणेसु E. उत्तेअण for समुत्तेअण in all but B.N. ३८ भद्र added before ततस्ततः in all but S.B.N. ततः once R. ३९ अदो for तदो E. गच्छिअ S.B.P.N.G. अमच्चस्स S.B.E.N. वेआलिओ omitted E. राक्ष० ॥ ततस्ततः ॥ कर० ॥ added before एत्थन्तरे in S.P.N. दुम्मिअस्स for दूणस्स A.P.G., दूमिदस्स S.E., दुम्मणस्स B.N. चन्द्रउत्तहदएण E.G., रण्णा A.P.M.R.J.F. कुसुमउरे added before कोमुदी B.E.N.

मुदीमहोस्सवो । सो अ चिरकालपरिवट्टमाणो जणिदपरिचओ अभिमदवन्धुजणसमागमो विअ ससिणेहं बहु माणिदो णअरजणेण ।

४० राक्ष० सबाष्पम् । हा देव नन्द

कौमुदी कुमुदानन्दे जगदानन्दहेतुना ।
कीदृशी सति चन्द्रेऽपि नृपचन्द्र त्वया विना ॥१॥

४१ कर० । तदो सो लोअलोअणाणन्दभूदो अणिच्छन्तस्स य्येव तस्स णिवारिदो चाणक्कहदएण । एत्थन्तरे थणकलसेण चन्दउत्तसमुत्तेइआ सिलोअपरिवाडी पवट्टिदा ।

४२ राक्ष० । कीदृशी सा ।

महोत्सवः । स च चिरकालपरिवर्तमानो जनितपरिचयोऽभिमतवन्धुजनसमागम इव सस्नेहं वहु मानितो नगरजनेन । ४१ ततः स लोकलोचनानन्दभूतोऽनिच्छत एव तस्य निवारितश्चाणक्यहतकेन । अत्रान्तरे स्तनकलशेन चन्द्रगुप्तसमुत्तेजिका श्लोकपरिपाटी प्रवर्तिता ।

सो वि for सो अ B·N· , सो P·F· . पवत्तमाण(v·l· णो G·) जाणिद S·B·E·N·G· . परिओसो for परिचओ B·E·N·G· . वध्रु for वन्धु A·P·M·R·J·F·. वहु omitted A·P·M·R·J·F· . णाअर A·P·E·G· . ४० राजचूडामणे added after नन्द F· . भद्र ततस्ततः added after the stanza S·B·N·G· . ४१ अमच्च added before तदो B·E·N· . तदो omitted S· . लोअ omitted P·G· ; अ for it S· , रायलोय E· . तह added after य्येव R·B·N·. णअरजणस्स for तस्स S·E·G· , णाअरजणस्स B·N· . कोमुदीमहोस्सवो added after चाणक्कहदएण B·N· . चन्दउत्तस्स M·R·B·N· . समुत्तेअणसमत्था for समुत्तेजिआ S·B·E·N·G· पारिपाटी, A·P·J·F· , परिवाटी B·N· . परिवाडी S·E·, परिपाडी R·G·, वाजा M· . पउत्ता for पवट्टिदा S·B·E·N·G· . ४२ राक्ष० ॥ कीदृशी सा ॥ करभकः स्स्वो...पठति । omitted S·B·E·N·G·.

करभकः सत्त्वोद्रेकस्येत्यादि पूर्वोक्तं पठति ।

४३ राक्ष० सहर्षम् । साधु सखे स्तनकलश साधु । काले भेदबीजमुप्तमवश्यं फलमुपदर्शयिष्यति । कुतः ।

सद्यःक्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत् ।
किंतु लोकाधिकं धाम बिभ्राणः पृथिवीपतिः ॥ १० ॥

४४ मल० । एवमेतत् । सद्यःक्रीडेत्यादि पुनः पठति ।

४५ राक्ष० । ततस्ततः ।

४६ कर० । तदो चन्दउत्तेण अण्णाभङ्गकलुसिदेण पसङ्गसूचिदं अमच्चगुणं पसंसिअ अपब्भंसिदो अहिआरादो चाणक्कहदओ ।

४७ मल० । सखे भागुरायण गुणप्रशंसया दर्शितश्चन्द्रगुप्तेन राक्षसे भक्तिपक्षपातः ।

४८ भागु० । कुमार न तथा गुणप्रशंसया यथा चाणक्यबटोर्निराकरणेन ।

---

४६ ततश्चन्द्रगुप्तेनाज्ञाभङ्गकलुषितेन प्रसङ्गसूचितममात्यगुणं प्रशस्यापभ्रष्टोऽधिकाराच्चाणक्यहतकः ।

---

४३ सखे omitted A·P·M·R·J·F· . भेद omitted S· . उप्तम् omitted P· . अवश्यमेव B·N· . उपदर्शयति A·P·J·F·E·G· , दर्शयति M·R· . यतः for कुतः B·N· . किं नु for किमु A·P·M·R·J·N·G· . बिभ्राणाः पृथिवीभुजः S· . ४४ एवमेव S· . सद्यः...पठति omitted A·P·M·R·J·F· . ४५ भद्र added before ततस्ततः S·E·G· . ततः once R· . ४६ कलुसिदहिअएण B·N· , कलुसिहिअएण E·G· . सुइरं for पसङ्गसूचिदं S· . अमच्चस्स गुणं M·R·S·E·G· , अमच्चं सुगुणं F· . ४७ गुण omitted F·S· . भक्ति omitted P·R·F·G· . ४८ कुमार omitted in all but B·N· . दर्शितः added before यथा E· .

४९ राक्ष० । भद्र किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधश्चन्द्रगुप्तस्य चाणक्यं प्रति कोपकारणमुतान्यदप्यस्ति ।

५० मल० । सखे चन्द्रगुप्तस्यापरकोपकारणान्वेषणेन किं फलमेष पश्यति ।

५१ भागु० । कुमार मतिमांश्चाणक्यो न निष्प्रयोजनमेव चन्द्रगुप्तं कोपयिष्यति । न च कृतवेदी चन्द्रगुप्त एतावता चाणक्यगौरवमुल्लङ्घयिष्यति । सर्वथा चाणक्यचन्द्रगुप्तयोः पुष्कलकारणाद्यो विश्लेष उत्पद्येत स आत्यन्तिको भविष्यतीति ।

५२ कर० । अमच्च अत्थि अण्णाइं वि चन्दउत्तस्स कोवकारणाइं । उवेक्खिदो णेण अवक्कमन्तो कुमारो मलअकेदू अमच्चरक्खसो अ त्ति ।

---

५२ अमात्य सन्त्यन्यान्यपि चन्द्रगुप्तस्य कोपकारणानि । उपेक्षितोऽनेनापक्रामन् कुमारो मलयकेतुरमात्यराक्षसश्चेति ।

---

४९ भद्र omitted in all but B·E·N·. अयम् omitted S·. एव omitted P·. अपि omitted S·G· ५० भागुरायण added after सखे S·B·E·N·. चन्द्रगुप्तकोप E·G·, चन्द्रगुप्तस्य चाणक्यप्रकोप S·. ०न्वेषणे B·E·N·, ०न्वेषणात् S·. अमात्यः for एष S·. ५१ कुमार omitted M·R·. एतत् फलम् (एष E·) पश्यति । (अति B·N·) added after कुमार in B·E·N·. न omitted B·E·N·. स्वल्पप्रयोजने for निष्प्रयोजनम् E·. किमिति added after एव B·E·N·. कृतवेदी R·. चाणक्य before गौरवम् omitted in all but E·. उल्लङ्घयति (ध) E·. उत्पद्यते S·B·E·N·G·. भवति for भविष्यति S·E·G·. All from सर्वथा to भविष्यति is omitted in F·. ५२ अमच्च omitted A·P·M·R·J·F·. अण्णं वि A·P·M·R·J·F·. कारणं A·P·M·R·J·F·. चाणक्के added aftre कारणाइं B·E·N·; राक्ष०॥ किं किम्॥ कर०॥ जधा पढमं दाव superadded B·N·. कुमारो omitted A·P·M·R·J·F·G·. अ omitted A·P·M·J·S·G·. त्ति omitted B·N·.

५३ राक्ष० सहर्षम् । सखे शकटदास हस्ततलगतो मे संप्रति चन्द्रगुप्तो भविष्यति ।

५४ शक० । इदानीं चन्दनदासस्य बन्धनान्मोक्षो भवतां च पुत्रदारैः सह समागमो जीवसिद्धेश्च क्लेशच्छेदः ।

५५ भागु० स्वगतम् । जातः सत्यं जीवसिद्धिप्रभृतीनां क्लेशच्छेदः ।

५६ मल० । सखे भागुरायण हस्ततलगतो मे संप्रति चन्द्रगुप्त इति व्याहरतः कोऽस्याभिप्रायः ।

५७ भागु० । किमन्यत् । चाणक्यादपकृष्टस्य चन्द्रगुप्तस्योद्धरणान्न किंचित् कार्यमवश्यं पश्यति ।

५८ राक्ष० । भद्र हृताधिकारः क्व साम्प्रतमसौ वटुः ।

---

५३ सहर्षम् omitted A·P·M R·J·F· . सखे omitted in all but B·N· . हन्त added before हस्त B·E·N· . ५४ शक० । omitted and the speech assigned to Râkshasa in continuation of मु· रा· ।४।५३। in A·P·M·R·J·F·S·E·G· . बन्धनात् omitted G· . तव for भवतां in all but B·N· . कलत्रेण for दारैः E· . सह omitted S·E· . जीवसिद्धेश्च क्लेशच्छेदः omitted in A·P·M·R·J·F·E·G· ; जीवसिद्धिप्रभृतीनां क्लेशच्छेदः for it in B·N· , जीवसिद्धेः संप्रति क्लेशच्छेदः in S·. ५५ जातः omitted S· . जीवसिद्धेः for जीवसिद्धिप्रभृतीनां S·B·N· . The speech is omitted in all but S·B·N· . ५६ भागुरायण omitted A·P·G· . मे संप्रति चन्द्रगुप्तः omitted A·P·M·R·J·F· , संप्रति omitted G· . भविष्यति added before इति B·N· . अयम् added after कः B·N· . ५७ कुमार added before किम् S·G· . उद्धरणादन्यो for उद्धरणान्न G· , उद्धरणेऽन्यो S·B·N· . अवगच्छति for पश्यति B·N· . उद्धरणे ननु सौकर्यमवपश्यति E· . ५८ अथ added after भद्र E· . असौ omitted M·R·G· .

५९ कर० । तहिं य्येव पाडलिउत्ते पडिवसदि ।

६० राक्ष० सावेगम् । भद्र किं तत्रैव प्रतिवसति । न तपोवनं गतः प्रतिज्ञां वा न पुनः समारूढवान् ।

६१ कर० । अमच्च तवोवणं गच्छदि त्ति सुणीअदि ।

६२ राक्ष० । शकटदास नेदमुपपद्यते । पश्य ।

देवस्य येन पृथिवीतलवासवस्य
साग्रासनापनयजा निकृतिर्न सोढा ।
सोऽयं स्वयंकृतनराधिपतेर्मनस्वी
मौर्यात् कथं नु परिभूतिमिमां सहेत ॥ ११ ॥

६३ मल० । सखे भागुरायण चाणक्यस्य तपोवनगमने पुनः प्रतिज्ञारोहणे वा कास्य स्वार्थसिद्धिः ।

६४ भागु० । नात्यन्तदुर्बोधोऽयमर्थः । यावच्चाणक्यहतकश्चन्द्रगुप्ताद्

---

५९ तत्रैव पाटलीपुत्रे प्रतिवसति । ६१ अमात्य तपोवनं गच्छतीति श्रूयते ।

---

५९ अहिवसदि A·P·M·R·J· , परिवसदि F·S·E· . ६० सावेगम् omitted M·R· , किम् omitted in all but E· . न पुनः omitted A· ; पुनः omitted P· . ६१ अमच्च omitted S· ; अज्ज for it G· . गमिस्सदि for गच्छदि B·N· . ६२ सावेगम् added after राक्ष० B·N· . इदम् omitted G· ; एतद् for it A·P· . वस्तु added after इदम् S· . स्वाग्रा० for साग्रा० A·P·M·R·J·F· . ०नयनाद् for ०नयजा A·M·R·J·F· , ०नयना P· . बोढा for सोढा S· . नराधिपतः for नराधिपतेः S· . ६३ भागुरायण omitted A·P·M·R·J·F·G· . चाणक्य-for चाणक्यस्य P· . तपो omitted A·P·M·R·J·F·G· . रोपणे for रोहणे R· . कार्यं for स्वार्थ E· . ६४ कुमार added before नात्यन्त S·B·N· . यावत् twice in all but E·G· . निरपेक्षः added after यावत् B·E·N· . चाणक्यः for चाणक्यहतकः E· .

दूरीभवति तावदस्य स्वार्थसिद्धिः ।

६५ शक० । अमात्य अलमन्यथा विकल्प्य । उपपद्यत एवैतत् । पश्यत्वमात्यः ।

राज्ञां चूडामणीन्दुद्युतिखचितशिखे मूर्ध्नि विन्यस्तपादः
स्वैरेवोत्पाद्यमानं किमिति विषहते मौर्य आज्ञाविघातम् ।
कौटिल्यः कोपनोऽपि स्वयमभिचरणे ज्ञातदुःखः प्रतिज्ञां
दैवात् पूर्णप्रतिज्ञः पुनरपि न करोत्यायतिज्यानिभीतः ॥ १२ ॥

६६ राक्ष० । सखे शकटदास एवमेतत् । गच्छ विश्रामय करभकम् ।

६७ शक० । यदाज्ञापयत्यमात्यः । करभकेण सह निष्क्रान्तः ।

६८ राक्ष० ।—अहमपि कुमारं द्रष्टुमिच्छामि ।

६९ उपसृत्य मल० । अहमेवार्यं द्रष्टुमागतः ।

७० राक्ष० नाट्येनावलोक्य । अये कुमारः । आसनादुत्थाय । इदमासनम् । उपवेष्टुमर्हति कुमारः ।

दूरीभविष्यति R· . तावत् twice in all but E·G· . कार्य for स्वार्थ M· ?. ६५ अमात्य omitted A·P·M·R·J·F· . अन्यथा विकल्पेन P·G·, अन्यथा विकल्पितेन S·E· , अत्यन्तविकल्पितेन B·N· . एव omitted R·S·E-G· . कृतः added before पश्यतु B·N· कोपितोऽपि G· . अतिचरणे for अभिचरणे B· ; दृष्टदोषः for ज्ञातदुःखः E· ; अभिचरणज्ञातदुःखप्रतिज्ञो A·P·M·R·J·F· , अभिचरणाज्ज्ञातदुःखप्रतिज्ञो G· , अभिचरणाज्ज्ञातदुःखप्रतिज्ञो N· , अभिचरणे ज्ञातदुःखप्रतिज्ञो S· . तीर्ण for पूर्ण A·P·M·R·J·F· . ग्लानि for ज्यानि A·P·M·R·J·F·E·G· . वरेन् पापात्मिच्याजिर्भाह्: for करोत्यायतिज्यानिभीतः in S· . ६६ सखे omitted in all but B·N· . विश्रमय S· . तद् added before गच्छ B·E·N· . ६७ तथा for यदा...मात्यः A·P·M·R·J·F· . ६९ अमात्य एषः added before अहम् S· . एव omitted M·R· ; अपि for it A·P·F·G . द्रष्टुमागतः omitted G· . ७० आगतः added after कुमारः E· , एवागतः B· .

७१ मल०। अयमुपविशामि। उपविशत्वार्यः। यथार्हमुपविष्टौ।

७२ मल०। आर्य अपि सह्या शिरोवेदना।

७३ राक्ष०। कुमारस्याधिराजशब्देनातिरस्कृते कुमारशब्दे कुतो मे शिरोवेदनायाः सह्यता।

७४ मल०। उरीकृतमेतदार्येण न दुष्प्रापं भविष्यति। तत् कियन्तं कालमस्माभिरेवं संभृतबलैरपि शत्रुव्यसनमुदीक्षमाणैरुदासितव्यम्।

७५ राक्ष०। कुमार कुतोऽद्यापि कालहरणस्यावकाशः। प्रतिष्ठस्व विजयाय।

७६ मल०। आर्य अपि किंचिच्छत्रोर्व्यसनमुपलब्धम्।

७७ राक्ष०। बाढम्। उपलब्धम्।

७८ मल०। कीदृशं तत्।

७९ राक्ष०। सचिवव्यसनम्। किमन्यत्। अपकृष्टश्चाणक्याच्चन्द्रगुप्तः।

---

७१ अहम् for अयम् B·N·. स्वयम् added after अयम् E·. ७२ आर्य omitted M·S·. ७३ कुमार added before कुमारस्य in all but B·E·. अद्यापि added before शब्देन E·. मे omitted S·B·E·. ७४ स्वयम् added before उरीकृतम् B·. उररीकृतम् P·S·E·. एतद् omitted G·. अस्माभिरेवं omitted S·. अवेक्षमाणैः for उदीक्षमाणैः B·E· ७५ कुमार omitted A·M·R·J·F·G·. रिपुजयाय B·. ७६ आर्य omitted F·; अमात्य for it B·. अपि omitted A·P·M·R·J·F·. किंचित् omitted A·M·R·J·F·S·E·G·; किं for it F·. शत्रुव्यसनम् A·P·M·R·J·F·. ७७ बाढम्। omitted A·M·J·F·S·G·; गाढम् for it B·N·. The whole speech is omitted in P·R·. ७८ तत् omitted S·B·E·N·G·. ७९ This speech is omitted in P·.

८० मल०। आर्य सचिवव्यसनमव्यसनमेव।

८१ राक्ष०। कुमार अन्येषां भूपतीनां कदाचिदमात्यव्यसनमव्यसनं स्यान्न पुनश्चन्द्रगुप्तस्य।

८२ मल०। आर्य नैतदेवम्। चन्द्रगुप्तप्रकृतीनां चाणक्यदोषा एवापरागहेतवः। तस्मिन् निराकृते प्रथममपि चन्द्रगुप्तेऽनुरक्ताः संप्रति सुतरामेव तत्रानुरागं दर्शयिष्यन्ति।

८३ राक्ष०। मा मैवम्। इह खलु द्विप्रकाराः प्रकृतयश्चन्द्रगुप्तसहोत्थायिन्यो नन्दकुलानुरक्ताश्च। तत्र चन्द्रगुप्तसहोत्थायिनीनां

---

८० आर्य omitted M·R· ; अमात्य for it E· . अव्यसनम् omitted S·. The speech is omitted in P· . ८१ कुमार omitted in all but B·E·N· . भूमिपतीनां G· , भूमिपालानां E· . अपि added before स्यान्न B·N· . तु for पुनः E·. The speeches मल०॥ आर्य ननु विशेषतश्चन्द्रगुप्तस्येति ॥ राक्ष० ॥ किं कारणं यदमात्यव्यसनमव्यसनम् ॥ are added after मु·रा·।४।८१। in B·N·, मल० ॥ आर्य ननु विशेषतश्चन्द्रगुप्तस्य ॥ राक्ष०॥ अमात्यवचने किं कारणमिति ॥ in E·, मल०॥ आर्य नैतदेवम् ॥ राक्ष० । किं कारणमिति ॥ in G· , मल० ननु विशेषतश्चन्द्रगुप्तस्य ॥ राक्ष० ॥ किं कारणमिति ॥ in S· . ८२ आर्य नैतदेवम् omitted in S·B·E·N· ; इदं कारणम् for it in G· . कुतः added after एवम् M·F· . हि added after प्रकृतीनां B·E·N· . अपकार for अपराग P· . तस्मिंश्च for तस्मिन् A·P·M·R·J·E·G· , अ[illegible] F· , [illegible] S· . अपकृते for निराकृते S· . एव for अपि S· . चन्द्रगुप्तमनुरक्ताः S·E·G· , चन्द्रगुप्तानुरक्ताः B·N· . प्रकृतय इदानीं पुनः for संप्रति B·N·. तत्त्वानुरागं for तत्रानुरागं F· . ८३ कुमार [illegible] for मा मैवम् [illegible] , कुमार मैवम् F·. ताः for इह in all but B·N· . खलु omitted B·N· . द्विविधाः for द्विप्रकाराः S· . प्रकृतय...तत्र is wanting in S· . नन्दानुरक्ताश्च [illegible] . चन्द्रगुप्तानुरक्तानां for चन्द्रगुप्तसहोत्थायिनीनां S· .

चाणक्यदोषा एव विरागहेतवो न नन्दकुलानुरक्तानाम्। तास्तु खलु नन्दकुलमनेन पितृभूतं कृतघ्नेन घातितमित्यपरागामर्षाभ्यां विप्रकृताः सत्यः स्वाश्रयमलभमानाश्चन्द्रगुप्तमनुवर्तन्ते। त्वादृशं पुनः प्रतिपक्षोद्धरणे संभावितशक्तिमभियोक्तारमासाद्य क्षिप्रमेनं परित्यज्य त्वामेवाश्रयिष्यन्ते। अत्र निदर्शनं वयमेव।

८४ मल०। आर्य किमेतदेकमेव सचिवव्यसनमभियोगकारणं चन्द्रगुप्तस्याहोस्विदन्यदप्यस्ति।

८५ राक्ष०। कुमार किमन्यैर्बहुभिरपि। एतद्धि प्रधानतमम्।

८६ मल०। आर्य कथमिव प्रधानतमम्। किमिदानीं चन्द्रगुप्तः

प्रकृतीनां added before चाणक्य B·E·N·. एव omitted E·. नन्दकुलानुगतानाम् for नन्दकुलानुरक्तानाम् A·P·J·G·, नन्दकुलमनुगतानाम् S·, नन्दानुगतानाम् M·R·. तु omitted S·. पितुकूलभृतं S·B·E·N·. कृत्स्नं added after भृतं S·B·N·. कृतघ्नेन omitted A·P·M·R·J·F·. अपराधामर्षाभ्यां F·, अपरागानर्थाभ्यां M·R·. आश्रयम् for स्वाश्रयम् G·, स्वस्वाश्रयम् S·, स्वाशयम् E·. एव added before अनुवर्तन्ते in all but F·S·. तादृशाः for त्वादृशं F·. तु added before पुनः E·. विपक्षोद्धरणे E·, प्रतिपक्षोद्धरण–S·. संभाव्य in all but B·N·G·. एव तं for एनं E·. त्वामेव omitted M·R·F·S·G·. आश्रयन्ते M·R·F·B·N·G·, आश्रयन्ति E·. अस्य for अत्र P·. कुमारस्य added after अत्र P·B·E·. ८४ अमात्य for आर्य B·. एकम् omitted F·. आहोन्यदपि किंचित् P·. ८५ कुमार omitted A·P·M·R·J·. अपि omitted R·F·S·. तत्र added before प्रधानतमम् S·B·E·N·. नाम added at the end S·. सचिवव्यसनमेव प्रधानतमं व्यसनम् for the whole speech P·. ८६ अमात्य for आर्य B·E·N·. इव omitted S·B·E·N·G·. प्रधानतमम् omitted M·R·. प्रधानतमं नाम S·B·E·N·G·.

स्वकार्यधुरामन्यत्र मन्त्रिण्यात्मनि वा समासज्य स्वयं प्रतिविधातुमसमर्थः ।

८७ राक्ष० । बाढम् । असमर्थः । कुतः स्वायत्तसिद्धिषूभयायत्तसिद्धिषु वा भूमिपालेषु कदाचिदेतत् संभवति । चन्द्रगुप्तस्तु दुरात्मा नित्यं सचिवायत्तसिद्धिरेव स्थितश्चक्षुर्विकल इवाप्रत्यक्षलोकव्यवहारः कथमिव स्वयं प्रतिविधातुं समर्थः स्यात् । कुतः ।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ १३ ॥

अपि च

नृपोऽपकृष्टः सचिवात् तदर्पणः
स्तनंधयोऽत्यन्तशिशुः स्तनादिव ।

राज्य added after स्व S·B·E·N·G· . धुरम् S·G· . समासाद्य G· . स्यात् added at the end B·N· . ८७ एव added after असमर्थः B· . किं कारणमिति for कुतः in S·N·G· , मल० ॥ किं कारणम् ॥ राक्ष० ॥ for it in B·E· . वा omitted G· . भूपालेषु S·G· . कदाचिद omitted S·E· उभयायत्तसिद्धिषु वा भूमिपालेषु कदाचिद् omitted in A·P·M·R·J·F· . तत् for एतत् A·P·M·R·J·F·S·E·G· . न (तु B·N·) चन्द्रगुप्ते added after संभवति B·N·G· . ०सिद्धश्चैव स्थितः for ०सिद्धिरेव स्थितः in S· , ०सिद्धावेव स्थितः in A·P·M·R·J·F· , ०सिद्धाव(sic·वेव) स्थितः in G· , ०सिद्धावेवावस्थितः in B·N· , ०सिद्धौ व्यवस्थितः in E· . सर्वलोक for लोक B·N· . सं०व्यवहारः S·G· . कथमपि for कथमिव G· . प्रतिविधानसमर्थः G· . कुतः omitted A·P·M·R·J·F·. वावष्टभ्य for च विष्टभ्य G·. The stanza अत्यु० is wanting in M·S· . अपि च omitted A·P·M·R·J·S· ; किं च for it F· .

अदृष्टलोकव्यवहारमूढधी-
र्मुहूर्तमप्युत्सहते न वर्तितुम् ॥ १४ ॥

८८ मल० स्वगतम्। दिष्ट्या न सचिवायत्ततन्त्रोऽस्मि। प्रकाशम्। यद्यप्येवं तथापि बहुष्वभियोगकारणेषु सत्सु सचिवव्यसनमभियुञ्जानस्य शत्रुमभियोक्तुरैकान्तिकी सिद्धिर्भवति।

८९ राक्ष०। ऐकान्तिकीमेव सिद्धिमवगन्तुमर्हति कुमारः। कुतः।

त्वय्युत्कृष्टबलेऽभियोक्तरि नृपे नन्दानुरक्ते पुरे
चाणक्ये चलिताधिकारविमुखे मौर्ये नवे राजनि।
स्वाधीने मयि (इत्यर्धोक्ते लज्जां नाटयन्)
मार्गमात्रकथनव्यापारयोगोद्यमे
त्वद्वाञ्छान्तरितानि संप्रति विभो तिष्ठन्ति साध्यानि नः॥ १५ ॥

९० मल०। यद्येवमभियोगकालमार्यः पश्यति ततः किमास्यते।

उत्तुङ्गास्तुङ्गकूलं स्नुतमदसलिलाः प्रस्यन्दिसलिलं

मन्दधीः in all but S·B·E·. ८८ मात्रो for तन्त्रो S·. अमात्य added after प्रकाशम्। in B·N·, आर्य in S·E·. यद्येवं P·M·R·F·E·. खलु added after तथापि B·E·N·G·. अपि added after सत्सु G·. सचिव omitted A·P·M·R·J·F·S·. व्यसनिनम् for व्यसनम् E·. नैकान्तिकी for ऐकान्तिकी B·E·N·G·. कार्य omitted S·B·E·. ८९ कार्य added before सिद्धिम् A·P·M·R·J·F·. सिद्धिम् omitted S·. कुतः omitted E·. योग्योद्यमे R·S·E·G·. त्वद्वाक्यान्तरितानि E·. सिध्यन्ति for तिष्ठन्ति P·. ९० आर्य added after यदि S·, अयि (sic·आर्य) E·, अमात्य B·N·. अमात्यः for आर्यः R·B·N·. तत् for ततः B·E·N·, तर्हि S·. ततः किमास्यते omitted R·. पश्य added after आस्यते। in B·N·. कुम्भं for कूलं S·. प्रस्यन्द(sic·न्दि) P·. सलिलाः(sic· लं) E·. स्यन्दिनीरं सलीलं for प्रस्यन्दिसलिलं S·.

श्यामाः श्यामोपकण्ठद्रुममतिमुखराः कल्लोलैर्मुखरम् ।
स्रोतःखातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिन्दूरशोणा मम गजपतयोऽपास्यन्तु शतशः ॥१६॥

अपि च

गम्भीरगर्जितरवाः स्वमदाम्बुमिश्र-
मासारवर्षमथ शीकरमुद्गिरन्त्यः ।
विन्ध्यं विकीर्णसलिला इव मेघमाला
रुन्धन्तु वारणघटा नगरं मदीयाः ॥ १७ ॥

भागुरायणेन सह निष्क्रान्तो मलयकेतुः ।

९१ राक्ष० । कः कोऽत्र भोः ।

९२ प्रविश्य पुरुषः । आणवेदु अमच्चो ।

९३ राक्ष० । प्रियंवदक ज्ञायतां सांवत्सरिकाणां द्वारि कस्तिष्ठति ।

९४ पुरु० । जं अमच्चो आणवेदि । निष्क्रम्य पुनः प्रविश्य । अमच्च एसो खु संवच्छरिओ खवणओ-

---

९२ आज्ञापयत्वमात्यः । ९४ यदमात्य आज्ञापयति । अमात्य एष खलु सांवत्सरिकः क्षपणकः-

---

श्यामश्यामोपकण्ठ S. . नम्र for कण्ठ F. . द्रुममलिमुखराः B.N. , द्रुमन(sic.म)तिमुखराः S. , द्रुममवि(sic.ति)मुखराः E. . स्फारकल्लोलमालम् for कल्लोलमुखरम् S. . तरम् (sic. तटम्) S. . दशनैः for रदनैः J.F.S.B.E.N.G. . दारयन्तो नदीनां for उत्सादिततटाः S. . यास्यन्त्येते रिपूणां for शोणं सिन्दूरशोणा S. . यास्यन्ति for अपास्यन्तु A.P. , पास्यन्ति J.F.S.B.E.N.G. . पश्यतां दुर्निवाराः for अपास्यन्तु शतशः S. . रवं for रवाः S. . गममदाम्बु M.R. . इव for अथ in all . रोत्स्यन्ति for रुन्धन्तु S.B.E. . ९१ कः once E. . ९३ सांवत्सराणां A. . मध्ये added before द्वारि E.G. . ९४ All from जं to संवच्छरिओ omitted in A.P.M.R.J.F. ; संवच्छरिओ omitted in S. .

९५ अनिमित्तं सूचयित्वा राक्ष० स्वगतम् । **कथं प्रथममेव क्षपणकदर्शनम् ।**

९६ पुरु० ।–**जीवसिद्धी ।**

९७ राक्ष० । **भद्र अबीभत्सवेषं कारयित्वा प्रवेशय ।**

९८ पुरु० । **जं अमच्चो आणवेदि** । निष्क्रान्तः ।

९९ प्रविश्य क्षप० ।

शाशणमलिहन्ताणं पडिवय्यह मोहवाहिवेय्याणं ।
ये पढममेत्तकडुअं पश्चापश्चं उवदिशन्दि ॥ १८ ॥

उपसृत्य । **धम्मशिद्धी होदु शावगाह ।**

---

९६ जीवसिद्धिः । ९८ यदमात्य आज्ञापयति । ९९ शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम् । ये प्रथममात्रकटुकं पश्चात्पथ्यमुपदिशन्ति ॥ धर्मसिद्धिर्भवतु श्रावकस्य ।

---

९५ स्वगतम् omitted A·P·F· . क्षपणकः for क्षपणकदर्शनम् in all but B·N· . ९६ The speech is omitted in S· . ९७ राक्ष० । omitted and the speech read in continuation of मु·रा·।८।७५। with the stage-direction प्रकाशम् । in S· . भद्र omitted in all but A·P·G· . दर्शनं for वेषं in all but G· . धृत्वा for कारयित्वा G· , कृत्वा A·P·M·R·J·F·S·E· . ९८ तह for जं...वेदि A·P·M·R·J·F·G· . ९९ वा मुहुत्त for पढमेत्त G· , वि सुहमत्त S· , मुहुत्तमेत्त M·F· , सुहमेत्त E·N· . खु देसन्ति for उवदिशन्दि S· . सिद्धी for शिद्धी E·G·, लाहो S·B·N·. सावकस्स S· , साधकस्स E·, सावका B·N· , सावगाणं A·P·M·R·J·F·G· .

१०० राक्ष० । भद्न्त निरूप्यतां तावदस्मत्प्रस्थानदिवसः ।

१०१ क्षप० नाट्येन चिन्तयित्वा । शावगा णिल्रूविदा अय्य आ मज्झण्णादो णिव्वुत्तशमस्तकल्लाणा तिही शंपुण्णचन्दा पुण्णमाशी । तुह्माणं उत्तलाए दिशाए दक्खिणं दिशं पस्तिदाणं अ दक्खिणे णक्खत्ते । अवि अ

अस्ताहिमुहे शूले उदिदे शंपुण्णमण्डले चन्दे ।
गमणे वुहस्य लग्गे उदिदस्तमिदे अ केदुम्मि ॥ १९ ॥

---

१०१ श्रावक निरूपिता आर्य आ मध्याह्नान्निर्वृत्तसमस्तकल्याणा तिथिः संपूर्णचन्द्रा पौर्णमासी । युष्माकमुत्तरस्या दिशो दक्षिणां दिशं प्रस्थितानां च दक्षिणं नक्षत्रम् । अपि च अस्ताभिमुखे शूर उदिते संपूर्णमण्डले चन्द्रे । गमने बुधस्य लग्नमुदितास्तमिते च केतौ ।

---

१०० भद्र for भदन्त M·F· . अस्माकं for अस्मत् B·E·N· . प्रवान for प्रस्थान S· , प्रतिष्ठान G· . योग्य added before दिवसः B·N· . १०१ उवासका N·G· , साधका E· . णिल्रूविदे । for णिल्रूविदा in G· , णिल्रूविदे लग्गे । in E· , णिल्रूविदे मुहुत्ते in B· , णिल्रूवि(sic· विदे) in S· . अय्य omitted in B·N· ; मए for it in A·P·M·R·J F· , भाणण्णए दिअहे in S· . आ मज्झण्णादो omitted in S· ; मज्झण्णादो for it in E· , मज्झंदिणं in F· , आ मज(sic·मज्झण्ण)द्दो in N· . णिवुत्त in all but B· . समद्ध(sic·त्थ)कल्लाणा F· , सव्वकल्लाणा A·P·J· , संपुण्णकल्लाण (sic· णा) N· , सत्तमकल्णा S·E·G· , मत्तन(sic·म)कला(sic·लणा) B· . सोहणा added before तिही S·B·E·G· . तिही शंपुण्णचन्दा omitted N· . दक्खिणादिसि F· . दक्खिणदुवालिके for दक्खिणे S·B·E·N·G· . अवि अ omitted P· . गम(sic·गम)णे G· , मय(sic·गम)णे E· , गह(sic·गम)णे S· , गन(sic·गम)णं P· , गमण A·M·R·J·F·B· .

१०२ राक्ष० । भदन्त तिथिरेव तावन्न शुध्यति ।

१०३ क्षप० । शावगा

एक्कगुणा होदि तिही चउग्गुणे होदि णऽकत्ते ।
चउशस्टिगुणे लग्गे एशे योइशिअशिद्धन्ते ॥ २० ॥

ता

लग्गे होदि शुलग्गे कूलगहं पलिहलिज्जाशु ।
पाविहि दीहं लाहं चन्दस्स बलेण गश्चन्ते ॥ २१ ॥

१०४ राक्ष० । भदन्त परैः सांवत्सरिकैः सह संवाद्यताम् ।

---

१०३ श्रावक एकगुणा भवति तिथिश्चतुर्गुणं भवति नक्षत्रम् । चतुःषष्टिगुणं लग्नमेव ज्यौतिषिकसिद्धान्तः ॥ तस्माल्लग्नं भवति सुलग्नं क्रूरग्रहं परिहर । प्राप्नुहि दीर्घं लाभं चन्द्रस्य बलेन गच्छन् ॥

---

१०२ भद्र for भदन्त P·F· . तावत् omitted in all but B·N· . १०३ साश्वक E· . एक्कगुणा तिहीं चउग्गुणे णऽकत्ते । in all but B· . दीसदि added after एशे B·E·N· . योइशिअ omitted in M· ; जोइस for it in the rest. तन्त added after योइशिअ in all but B·N· . ता omitted P·B·N· . होहि for होदि E· . सोमम्मि गहम्मि जइ (v·l· जो F·) वि दुल्लग्गे for कूल...जाशु in A·P·M·R·J·F· , सोमम्मि गहं च जा हि (sic·गहम्मि जो वि) दुल्लग्गं in E· , सोमं पि गहं अ (sic· सोमम्मि गहम्मि) दुल्लग्गे in G· , सोमम्मि गहम्मि दुल्लहं लग्गं in S· . पाविसिहि(sic· हिसि) G· , उव्वहसि F· , वहेसि A·P·M·R·J· , पाउसि (sic· पावेसि) S· , हविहसि (sic· वहिहिसि) E· . दीहसिद्धी (sic·द्धिं) E· , दीहसाइ(sic· सिद्धिं) F· , दीहमाणउ(sic· माणं) E· , दिग्घमाइं(sic· माणं) S· , दीहं सिद्धिं A·P·M·R·J· . १०४ भदन्त omitted M·R· . तिथिरेव न शुध्यति । added after भदन्त S. . अन्यैः for अपरैः S· , परैः P· . सार्धं for सह B·N·.

१०५ क्षप० । शंवादेदु शावगे । हगे उण गमिस्सं ।

१०६ राक्ष० । न खलु कुपितो भदन्तः ।

१०७ क्षप० । कुविदे ण तुह्माणं भदन्ते

१०८ राक्ष० । कस्तर्हि ।

१०९ क्षप० ।–भअवं कदन्ते । येण अत्तणो पक्कं उज्झिअ पलस्स पक्कं पमाणीकलेशि । निष्क्रान्तः ।

११० राक्ष० । प्रियंवदक का वेला वर्तते ।

१११ पुरु० । अमच्च अत्थाहिलासी भअवं सूरो ।

---

१०५ संवादयतु श्रावकः । अहं पुनर्गमिष्यामि १०७ कुपितो न युष्माकं भदन्तः १०९.–भगवान् कृतान्तः । येनात्मनः पक्षमुज्झित्वा परस्य पक्षं प्रमाणीकरोषि । १११ अमात्य अस्ताभिलाषी भगवान् शूरः ।

---

१०५ साधके E. अहं for हगे in all but S.E.. णिअं गेहं for उण B.. १०९ स्वगतम् added after क्षप० in F.S.B.E.N.G.. . भवन्ते for भअवं S.E. . कदन्ते omitted E. . प्रकाशम् । added before येण E. . पल- for पलस्स in all but M.S.G. . पक्लो for पक्कं A.P.M.R. J.F. . पमाणं for पमाणी-S. . कलेशदि for कलेशि in all but B.E. ११० ज्ञायतां (v.l.ज्ञायतां ज्ञायतां S.) added before का in all but M.R. . इति added after वर्तते in all but A.P. . १११ निष्क्रम्य पुनः प्रविश्य added after पुरु० G. . अमच्च omitted in A.P.J. ; जं अमच्चो आणवेदि । निष्क्रम्य पुनः प्रविश्य for it in S.B.E.N. . आस्थाभि(sic. अस्थाभि)लासी E. . भअवं omitted S. .

११२ राक्ष० आसनादुत्थाय विलोक्य । अये अस्ताभिलाषी भगवान् भास्करः। संप्रति हि

आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः
पर्णच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा।
एते तस्मिन् निवृत्ताः पुनरपरगिरिप्रान्तपर्यस्तबिम्बे
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः ॥२२॥

निष्क्रान्तौ।

इति राक्षसोद्योगो नाम चतुर्थोऽङ्कः।

---

११२ आसनाद् omitted A·P·M·R·J· . अये omitted S· . सूर्यः for भास्करः S· , सहस्रदीधितिः B· . तथा हि for संप्रति हि B·E· . पत्र for पर्ण S·B·E·N· . उपनत for उपवन M·R· . आश्वेत(sic·आश्वेव) पातः(sic·याताः) S· . पुनरपरककुप् for पुनरपरगिरि S· , पुनरितरककुप् B·N· , पुनरपि ककुभः F·G· , पुनररयिरि (sic· पुनरपरगिरि) E· . पर्यन्त for पर्यस्त A·P· . विभवच्छायया for विभवं स्वामिनं S· . इति निष्क्रान्ताः सर्वे for निष्क्रान्तौ in all. राक्षसोद्योगो omitted in all but A· .

ततः प्रविशति लेखमलंकरणस्थगिकां मुद्रितामादाय सिद्धार्थकः ।

१ सिद्धा० । हीमाणहे हीमाणहे ।

बुद्धिजलणिज्झरेहिं सिच्चन्ती देसकालकलसेहिं ।
दंसेदि हि कज्जफलं गरुअं चाणक्कणीदिलदा ॥ १ ॥

ता गहीदो मए अज्जचाणक्केण पढमलेहिदो अमच्चरक्खसस्स मुद्दालञ्छिदो अअं लेहो तस्स य्येव मुद्दालञ्छिदा इअं अ आहरणपेडिआ । चलिदो ह्मि किल पाडलिउत्तं । जाव गच्छामि ।

---

१ आश्चर्यमाश्चर्यम् । बुद्धिनिर्झरजलैः सिच्यमाना देशकालकलशैः । दर्शयति हि कार्यफलं गुरुकं चाणक्यनीतिलता ॥ तद् गृहीतो मयार्यचाणक्येन प्रथमलेखितोऽमात्यराक्षसस्य मुद्रालाञ्छितोऽयं लेखस्तस्यैव मुद्रालाञ्छितेयं चाभरणपेटिका । चलितोऽस्मि किल पाटलिपुत्रम् । यावद् गच्छामि ।

---

† १ स्थलिकां B·, गनिकां N·, प्रवेवि कां S· . च added after स्थगिकां S·B·E·N·G· . सनुद्राम for मुद्रिताम् B·E· , मुद्राम् S· , मुद्रिकाम् P·G· . १ हां हां माणहे हां माणहे A·P·J· , हां हां माणहे M·R·G· . हि हि माणहे F· , ह्रीमाणहे E· . णिब्भरेहिं for णिज्झरेहिं M·R·F·S·E· , शिख (sic· र्माह) रेहिं N· . सलिलेहिं for कलसेहिं P· , यो (sic· जो or तो) एहिं S· . दंसेहि(sic· इ) N· , दंसिस्सादि A·P·R·J·B· . हि omitted in B·E·N·G· ; इह for it in F· , अज्ज in S· . गुरुफलं for कज्जफलं S· , अज्ज फलं B· . ता omitted S·B·N· . लिहिदो in all but B· . ०लंकिदो for लञ्छिदो S· . अअं omitted B· . ०लंकिदा for लञ्छिदा S· . अ omitted A·P·M·R·J·S·B· . पवेविआ for पेडिआ S· , पविविआ E· . किल omitted B·N· . ता added before जाव B·E·N·G· . जाव गच्छामि omitted S· .

परिक्रम्यावलोक्य च । कहं खवणओ आअच्छदि । जाव से असउ-णभूदं दंसणं मह संमदं य्येव ता ण पडिहरामि ।

२ प्रविश्य क्षप० ।

अलिहन्ताणं पणमामो ये गम्भीलदाइ बुद्धीए ।
लोउत्तलेहिँ लोए शिद्धिं मग्गेहिँ गश्चन्ति ॥ २ ॥

३ सिद्धा० । भदन्त वन्दामि ।

४ क्षप० । शावगा धम्मशिद्धी होदु । निर्वर्ण्य । शावगा पस्ताणशमु-

---

कथं क्षपणक आगच्छति । यावदवस्याशकुनभूतं दर्शनं मम संमतमेव तन्न प्रतिहरामि । २ अर्हतः प्रणमामो ये गम्भीरतया बुद्धेः । लोकोत्तरैर्लोके सिद्धिं मार्गैर्गच्छन्ति ॥ ३ भदन्त वन्दे । ४ श्रावक धर्मसिद्धिर्भवतु । श्रावक प्रस्थानसमु-

---

अये added before कहं E· . ता added before जाव B·N· . अस्स for से F· , मे B·N· अवसउणभूदं R·S· . इमस्स added after भूदं B· , एदस्स G· , इदं N· , एदं S· . ता आदित्तदंसणेण पडिहणामि for मह...हरामि B· , भद्ददंसणेण पडिहणामि G· , शुद्धदंसणेण पडिहणामि E· , दंसणेण (sic·आदित्तदंसणेण) पवि(sic·डि)हगामि S· . २ णमिमो for पणमामो S· , पणमामि A·P·M·R·J·F·N· . जे दे for ये A·P·J·B· E·N· , जेण (sic·जाणं) S· , एदे M·R· , जे ते F·G· . मग्गन्ति for गश्चन्ति B·E· , मग्गामि S· . ३ पणमामि for वन्दामि B·. ४ शावगा omitted S· . विद्धी for शिद्धी S·E·G· , लाहो B· . दे added after शिद्धि S·B·E· . शावगा omitted M·R· . समुद्दसंतलण–for पस्ताणशमुव्वहणे B·, अत्थाणं समुद्दतलण-S·, अत्थाण समुव्वहणे G·, अद्धाण (sic·अत्थाण) समुद्धा(sic·द्द)तलण E· , गभीलदाए अत्थाण समुद्दतलणे N· ,

व्वहणे किदव्ववशाअं विअ तुमं पेरकामि ।

५ सिद्धा० । कहं भदन्तो जाणादि ।

६ क्षप० । शावगा किं एत्थ याणिदव्वं । एशे दे मग्गादेशकुशले करगदे लेहे अ शूएदि ।

७ सिद्धा० । जाणिदं भदन्तेण । देसन्तरं पत्थिदो ह्मि । ता कहेदु भदन्तो कीदिसो अज्ज दिवसो त्ति ।

८ क्षप० विहस्य । शावगा मुण्डं मुण्डाविअ णऽकत्ताणि पुश्चशि ।

९ सिद्धा० । भदन्त संपदं वि किं जादं । कहेहि । जदि अत्तणो अणु-

---

द्वहने कृतव्यवसायमिव त्वां प्रेक्षे । ५ कथं भदन्तो जानाति ६ श्रावक किमत्र ज्ञातव्यम् । एष ते मार्गादेशकुशलः करगतो लेखश्च सूचयति। ७ ज्ञातं भदन्तेन । देशान्तरं प्रस्थितोऽस्मि । तस्मात् कथयतु भदन्तः कीदृशोऽद्य दिवस इति । ८ श्रावक मुण्डं मुण्डयित्वा नक्षत्राणि पृच्छसि । ९ भदन्त सांप्रतमपि किं जातम् । कथय । यद्यात्मनोऽनु-

---

दे for तुमं S· , दे हिअअं B· . ५ कहं भदणा (sic·भदन्तेण) जाणिदं E· . ६ णं added before and य्येव after एशे B· . मग्गणाओकण्णधारे for मग्गादेसकुशले करगदे B· , मग्गदंसणकण्णधाले S·E· . नउणे added after कुशले in all but S·B·E·G· . गद-for गदे P· . अ omitted S·B·E· . ७ चलिदो for पत्थिदो B·E· . भदन्तो omitted E· ; भणो (sic·भवं) for it E· . ८ मुण्डिअमुण्डो for मुण्डं मुण्डाविअ A·P·M·R·J·F·N·G· , मुण्डं मुण्डिअ B· , मुण्डाग्नि(sic· वि)अ मुण्डं E· . उपाधोसिद्धमुण्डणेणि (sic·उपाध्यमुण्डणे णक्खत्ताणि or सिद्धमुण्डणे णक्खत्ताणि) for मुण्ड...णऽकत्ताणि S· . ९ भदन्त omitted S· . वि omitted F· . ता added before कहेहि S·B·E·N·G· . पत्ताणस्स for अत्तणो in all but B· .

ऊलं भविस्सदि तदो गमिस्सं । अण्णधा णिवत्तिस्सं ।

१० क्षप० । शावगा ण शंपदं एदस्सिं मलयकेदुकडए अणुऊलेण अणणुऊलेण वा अग्गहिदमुद्देण गच्छीअदि ।

११ सिद्धा० । भदन्त कहेहि कुदो एदम् ।

१२ क्षप० । शावगा णिशामेहि । पढमं दाव एत्थ कडए लोअस्स अणिवालिदे णिग्गमे पवेशे अ आशी । दाणिं इदो पच्चाशण्णे कुशुमपुले ण केवि अमुद्दालञ्छिदे णिग्गमिदुं पवेस्टुं वा अणुमोदीअदि । ता यदि भाउलायणस्स मुद्दालञ्छिदे शि तदो गच्छ

कूलं भविष्यति ततो गमिष्यामि । अन्यथा निवर्तिष्ये । १० श्रावक न सांप्रतमेतस्मिन्मलयकेतुकटकेऽनुकूलेनाननुकूलेन वा अगृहीतमुद्रेण गम्यते । ११ भदन्त कथय कुत एतत् । १२ श्रावक निशामय । प्रथमं तावदत्र कटके लोकस्यानिवारितो निर्गमः प्रवेशश्चासीत् । इदानीमितः प्रत्यासन्ने कुसुमपुरे न कोऽप्यमुद्रालाञ्छितो निर्गन्तुं प्रवेष्टुं वानुमोद्यते । तस्माद्यदि भागुरायणस्य मुद्रालाञ्छितोऽसि ततो गच्छ

ता for तदो B· . अण्णधा णिवत्तिस्सं omitted A·P·M·R·J·F·N· . १० सावका णं (sic·ण) for शावगा ण P·B·N· . अणुऊले अणणुऊले वा G· , अणुकूलं A·P·M·R·J·F· . अग्गहिदमुद्देण omitted A·P·M·R·J·F·S·E·G· ; अगहिदमुद्दाग(sic·द्देग) for it B·N· . दिवसे added after वा E· . गच्छदि G· , भविस्सदि A·P·M·R·J·F· . ११ कुदो क्खु अअं for कुदो एदं B·N· , कुदो कट्ठ (sic·कट्ठं) खु दाणिं G· , तदो कधं खु णादि (sic·दाणिं) E· , तदो पि कहं णु दाणिं S· . १२ मलअकेदु–added before कडए B·N· . अणिवालिअ- for अणिवालिदे B·E·N·G· , व(sic·अ)णिवालिआ S· . णिग्गमप्पवेसो in all. णिक्कमिदुं B·E·N· . विसिदुं B·E·N· , पविस(sic·सि)दुं S· . शि omitted in all but B·E·N· .

वीशद्धे । अण्णधा च्चिष्ट णिउक्के । मा गुम्माहिआरिएहिं शंयमि-
द्कलचलणे लायउलं पवेशीअशि ।

१३ सिद्धा० । किं न जाणादि भदन्तो जह अहं अमच्चरक्खसस्स सेवओ सिद्धत्थओ । ता अमुद्दालञ्छिदं वि मं णिक्कमन्तं कस्स सत्ती णिवारेदुं ।

१४ क्षप० । शावगा लक्खशस्स पिशाचस्स वा शेवगे होहि । ण उण अमुद्दालञ्छिदस्स इदो णिक्कमणोवाए ।

विश्रब्धः । अन्यथा तिष्ठ तूष्णींकः । मा गुल्माधिकारिभिः संयमितकरचरणो राजकुलं प्रवेश्यसे । १३ किं न जानाति भदन्तो यथाहममात्यराक्षसस्य सेवकः सिद्धार्थकः । तस्मादमुद्रालाञ्छितमपि मां निष्क्रामन्तं कस्य शक्तिर्निवारयितुम् । १४ श्रावक राक्षसस्य पिशाचस्य वा सेवको भव । न पुनरमुद्रालाञ्छितस्येतो निष्क्रमणोपायः ।

णिर्वात्तदव्वं for चिष्ट णिउक्के S. . निव्व(sic·णिव)त्तिअ णिउक्कं added before चिष्ट in B·N· , निव्वत्तिदव्व (sic·णिव्वत्तिअ) णिळुक्को in E· , निव्व(sic·णिव)त्तिअ णितिक्को (sic·णिउक्को) in G· . तुमं added after मा B·E· . गुम्मट्ठाणाधिवेहिं B· . पवेसीहइ(sic· सिहि)सि S·E·G· . १३ जधा omitted A·P·M·R·J·F· . अहं omitted A·P·M·R·J·F·N· . णीणाहिदो त्ति for सेवओ A·P·M·R·J·F· , नंतेणिओ S· , केळिअरो(sic· केरओ) अन्तिओ B· . सिद्धत्थओ omitted in all but S·B·E· . णिक्कमन्तं omitted S· ; णिक्का(sic·क्क)न्तं for it G· . हि added after सत्ती E· . १४ केलको for शेवगे S·E·G· , केय(sic·ल)को N· , केळिअगे (sic·केळओ) B·; शेवगे omitted A·P·M·R·J·F· . होदु for होहि F· . णत्थि for ण S·B· . उण omitted S· . दे added before अमुद्दा० S·B·E·N·G· . इदो omitted A·P·B· . णिक्कम(sic·मणो)वाओ M·R·G· , णिक्कमणोवाओ E·, णिग्गमोवाओ F·.

१५ सिद्धा०। भदन्त मा कुप्प। भण मे कज्जसिध्धी होदु त्ति।

१६ क्षप०। शावगा गश्च। होदु दे कज्जशिद्धी। हगे वि भाउलायणादो मुद्दं याचेमि। निष्क्रान्तौ।

इति प्रवेशकः।

ततः प्रविशति पुरुषेणानुगम्यमानो भागुरायणः।

१७ भागु० स्वगतम्। अहो वैचित्र्यमार्यचाणक्यनीतेः।

मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना
मुहुः संपूर्णाङ्गी मुहुरतिकृशा कार्यवशतः।
मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफले-
त्यहो चित्राकारा नियतिरिव नीतिर्नयविदः॥ ३॥

प्रकाशम्। भासुरक न मां दूरीभवन्तमिच्छति कुमारः। अतोऽस्मिन्नेवास्थानमण्डपे न्यस्यतामासनम्।

---

१५ भदन्त मा कुप्य। भण मे कार्यसिद्धिर्भवत्विति। १६ श्रावक गच्छ। भवतु ते कार्यसिद्धिः। अहमपि भागुरायणान्मुद्रां याचे।

---

१५ ण for मा A·P·. कुप्पस्स F·. मा कुप्प omitted S·. भण मे omitted A·P·M·R·J·F·; तेण हि for it S·E·. मे added before होदु E·. १६ शावगा omitted M·R·; उवासआ for it N·G·. कज्जं सिद्धं N·. अहं for हगे in all. वि omitted M·R·. पाडलिउत्तं गन्तुं added before मुद्दं B·E·N·. पडिच्छेमि for याचेमि B·N·. १७ विचित्रता B·. चाणक्यस्य F·. कुतः added after नीतेः। in B·E·N·G·, यतः in S·. लभ्योद्भेदा M·R·F·. भ्रश्यद्बीजा B·E·. मुहुरतिबहु E·. नाम for न मां S·. अतिगच्छति for इच्छति G·. अवस्थान for आस्थान S·. विन्यस्यताम् F·B·E·N·G·, निवेशय S·. माम् for आसनम् S·.

१८ पुरु० । एदं आसणं । उवविसदु अज्जो ।

१९ भागु० उपविश्य । भद्र यः कश्चिन्मुद्रार्थी मां द्रष्टुमिच्छति स त्वया प्रवेशयितव्यः ।

२० पुरु० । जं अज्जो आणवेदि । निष्क्रान्तः ।

२१ भागु० स्वगतम् । कष्टम् । एवमयमस्मासु स्नेहवान् कुमारो मलयकेतुरतिसंधातव्य इत्यहो दुष्करम् । अथ वा

कुले लज्जायां च स्वयशसि च माने च विमुखः
शरीरं विक्रीय क्षणिकधनलोभाद्धनवति ।
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना
विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ॥ ४ ॥

ततः प्रविशति प्रतीहार्यानुगम्यमानो मलयकेतुः ।

२२ मल० स्वगतम् । अहो राक्षसं प्रति विकल्पबाहुल्यादाकुला मे बुद्धिर्न निश्चयमधिगच्छति । कुतः ।

भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना
किं चाणक्यनिराकृतेन कृतिना मौर्येण संधास्यते ।

---

१८ एतदासनम् । उपविशत्वार्यः।   २० यदार्य आज्ञापयति ।

---

१८ इद for एदं E. , इमं G. . १९ भद्र भासुरक S.B.E.N.G. . मुद्रार्थम् A.F. . ममान्तिकमिह for मां द्रष्टुमिच्छति S. . स omitted P. . २० अमच्चो for अज्जो A.F.G. , २१ अपि for अयम् A.P.J. , अपि नामायम् S.B.N. , अपि यद् M.R.F.G. . अभिसंधातव्यः S.E.G. . अथ वा omitted A.P. . क्षणिकधनलोभात् E. , क्षणिकमपि लोभाद् A.P.M.R.J.F. . विचारान्निष्क्रान्तः E. . परतन्त्रो E. . २२ मे omitted R.S. . वितर्क for विकल्प P.F.S.E.G. . संधास्यति R.F.E. .

स्थैर्यं भक्तिगुणस्य वाविगणयन् किं सत्यसंधो भवे-
दित्यारूढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥ ५ ॥

प्रकाशम् । विजये क भागुरायणः ।

२३ प्रती० । कुमार एसो खु कडआदो णिक्कमिदुकामाणं मुद्दासंपादणं अणुचिट्ठदि ।

२४ मल० । विजये मुहूर्तमसंचारा भव । यावदस्य पराङ्मुखस्यैव पाणिभ्यां नयने पिदधामि ।

२५ प्रती० । जं कुमारो आणवेदि ।

२६ प्रविश्य पुरुषः । अज्ज एसो खु खवणओ मुद्दाणिमित्तं अज्जं पेक्खिदुं इच्छदि ।

२७ भागु० । प्रवेशय ।

२८ पुरु० । जं अज्जो आणवेदि । निष्क्रान्तः ।

२९ प्रविश्य क्षप० । धम्मशिद्धी शावगाह होदु ।

३० भागु० स्वगतम् । अये राक्षसस्य मित्रं जीवसिद्धिः । प्रकाशम् ।

---

२३ कुमार एष खलु कटकान्निष्क्रमितुकामाणां मुद्रासंपादनमनुतिष्ठति । २५ यत्कुमार आज्ञापयति । २६ आर्य एष खलु क्षपणको मुद्रानिमित्तमार्यं प्रेक्षितुमिच्छति । २८ यदार्य आज्ञापयति । २९ धर्मसिद्धिः श्रावकस्य भवतु ।

वाधिगणयन् P·M·R·J·G· , वाधिगुणयन् A· , वाथ गणयन् F· . आरभ्य for आरूढ S· . २३ कामस्य(sic· स्स) B·N· . संपादनाधिआरे चिट्ठदि B·N· . २४ निभृतपदसंचारा for असंचारा A·P·S·G· , निभृतपदसंचारी B·E·N· . च added after अस्य P·, एव F· . २६ णिक्क(*v·l·* णिक्ख E·)मण- added before मुद्दा S·E· . २७ भागुरक प्रवेशय E· . २८ तह for जं...वेदि A·P·M·R·J·F·E·G· . २९ विद्धी for शिद्धी B·E·N·G· , लाहो S· . सावगाणं in all. ३० मन्त्री for मित्रं G· .

भदन्त न खलु राक्षसस्य प्रयोजनमेव किंचिदुद्दिश्य गम्यते ।

३१ क्षप० कर्णौ पिधाय । शान्तं पावं शान्तं पावं । शावगा तहिं गमिस्सं यहिं लक्खशस्स पिशाचस्स वा णामं वि ण शुणीअदि ।

३२ मागु० । बलीयान् सुहृदि प्रणयकोपः । तत् किमपराद्धं राक्षसेन भदन्तस्य ।

३३ क्षप० । शावगा ण मम किंवि लक्खशेण अवलद्धं । शयं य्येव मन्दभग्गे अत्तणो अवलज्झामि ।

३४ मागु० । भदन्त वर्धयसि मे कुतूहलम् । श्रोतुमिच्छामि ।

---

३१ शान्तं पापं शान्तं पापम् । श्रावक तत्र गमिष्यामि यत्र राक्षसस्य पिशाचस्य वा नामापि न श्रूयते । ३३ श्रावक न मम किमपि राक्षसेनापराद्धम् । स्वयमेव मन्दभाग्य आत्मनोऽपराध्यामि ।

भदन्त omitted A·P·M·R·J· . राक्षसप्रयोजनम् E· . किंचिद् omitted S· . नगरं गम्यते E· . ३१ शन्त पावं once R·S·E·G· . उज्जेव्व added after तहिं B· . गन्तुमीहामि for गमिस्सं S· . वा added after लक्खशस्स M·R· . पिशाचस्स omitted A·P·E· . वा omitted E·G· . सुणामि E· . ३२ भदन्त added before बलवान् B·N· . बलीयान् S·B·N·G· , गरीयान् E· . ते added before सुहृदि B·N· . ३३ मे for मम S· . इदाणिं added before य्येव A·P·M·R·J·F· , इदं E·G· , लक्खशे S· . भाओ for भग्गे in all but N·G· . अत्तणो omitted S· . णं added after अत्तणो B·G· . कम्मणु लज्जामि for अवलज्झामि B· , कम्मेणु लज्जामि N· , कम्मेणु लज्जे A·P·M·R·J·G· , कम्मेणु लज्जे-इ(sic·लज्जे) F· , अवलद्धाम (sic·द्धामि) E· , उ(sic·अ)वलद्धादि (sic·द्धि) S· . ३४ मे omitted F· . मल० स्वगतम् ॥ मम च ॥ मागु० ॥ added after कुतूहलम् । in S·B·E·N· . भदन्त added before श्रोतुम् S·

३५ मल० स्वगतम् । अहमपि श्रोतुमिच्छामि ।

३६ क्षप० । शावगा किं एदिणा शुदेण ।

३७ भागु० । यदि रहस्यं तत् तिष्ठतु ।

३८ क्षप० । ण हि लहस्सं ।

३९ भागु० । यदि न रहस्यं तत् कथ्यताम् ।

४० क्षप० । शावगा ण लहस्सं एदं । तहवि ण कहिस्सं ।

४१ भागु० । अहमपि मुद्रां न दास्यामि ।

४२ क्षप० स्वगतम् । युक्तमिदानीमर्थिने कथयितुम् । प्रकाशम् । का

---

३६ श्रावक किमेतेन श्रुतेन । ३८ न हि रहस्यम् । ४० श्रावक न रहस्यमेतत् । तथापि न कथयिष्यामि । ४२ का गतिः ।

---

३५ स्वगतम् omitted S·B·E· . च for अपि S· . श्रोतुमिच्छामि omitted S·E·N·G· . ३६ शावगा omitted M·R· . भोदि added after एदिणा E· . असुणिदव्वेण added before शुदेण A·P·M·R·J·F·S·E·G· . सुणिदेण for शुदेण B·N· . तुह्माणं added after शुदेण S· . ३७ भदन्त यदि B·N· . तत् omitted S·E· ; तदा for it B·N· . ३८ सावका added before ण हि S·E·G· , उपासका B·N· . हि omitted P·M·R·J·F·S·E· . किंदु अदिनिसंसं added after लहस्सं in all but B·N·G· . ३९ यदि न रहस्यं omitted B·N·G· . तर्हि for तत् B·N·G· . ४० णत्थि for ण S·B·N·G· . लहस्सं omitted B·N·G· . एदं omitted E· . सन्दं ते for तह वि S· . अदिणिसंसं added after कहिस्सं B·E·N·G· . ४१ भदन्त अहमपि A·B·N· . दास्ये M·R· .

गदो । एशे णिवेदेमि । शुणादु शावगे । अस्ति दाव हगे मन्दभग्गे पढमं पाडलिउत्ते णिवशमाणे लक्खशेण मित्तत्तणं उवगदे । तहिं अवशले लक्खशेण गूढं विशकण्णआपयोअं उप्पादिअ घादिदे देवे पव्वदीशले ।

४३ मल० सबाष्पमात्मगतम् । कथं राक्षसेन घातितस्तातो न चाणक्येन ।

४४ क्षप० । तदो हगे लक्खशस्स मित्तं त्ति कदुअ चाणक्कहदएण शणिआलं णअलादो णिव्वाशिदे । दाणिं पि लक्खशेण अणे-

---

एष निवेदयामि । शृणोतु श्रावकः । अस्ति तावदहं मन्दभाग्यः प्रथमं पाटलिपुत्रे निवसन् राक्षसेन मित्रत्वमुपगतः । तत्रावसरे राक्षसेन गूढं विषकन्याप्रयोगमुत्पाद्य घातितो देवः पर्वतेश्वरः । ४४ ततोऽहं राक्षसस्य मित्रमिति कृत्वा चाणक्यहतकेन सनिकारं नगरान्निर्वासितः । इदानीमपि राक्षसेनाने-

---

४२ एशे णिवेदेमि omitted in all but B·N· . अत्थ for अस्ति A· . अहं for हगे A·P·M·R·J·F·S· . अस्ति दाव omitted S· . मन्दभाओ A·M·R·F· , [illegible] B· . अहिणिवशमाणे A·P·J·E· , अहिणिवशमाणे F· , अहिणिवशमाणेण G· , अहिणि-वशन्तेण M·R· . [illegible] S·B·E·N· . च added after तहिं B·E·N· . अन्तले for अवशले E· , [illegible] S· [illegible] for कण्णआ A·S·E· E·N·G· . पओएण S· . उप्पादिअ omitted S· ; समुप्पादिअ for it B·N· . वाचा added before घादिदे E· . पादिदे for घादिदे F· . देवे omitted A·P·M·R·J·F·G·. ४३ तातः omitted R· ; स्व (sic·त) तातः for it F· . [illegible] ॥ [illegible] (ततः once R·) ॥ added after चाणक्येन । in all. ४४ हदगे for हगे G· , गद्दे (sic·हगे) E· . मित्त A·S·E· . [illegible] P·R·F· . त्ति omitted F·B·N· . णिक्कासिदे A·P·F·S·G· . अण्णाअ for अणेअ S·

अलायकज्जकुशलेण किंवि तालिशं आलहीअदि येण हगे यीअलोआदो णिव्वाशिज्जामि।

४५ भागु०। भदन्त प्रतिश्रुतराज्यार्धसंप्रदानमनिच्छता चाणक्यहतकेनेदमकार्यमनुष्ठितं न राक्षसेनेति श्रुतमस्माभिः।

४६ क्षप० कर्णौ पिधाय। शन्तं पावं शन्तं पावं। चाणक्केण विशकञ्ञाए णामं वि ण शुदम्।

४७ भागु०। भदन्त इयं मुद्रा दीयते। एहि कुमारं श्रावय।

४८ मल० सास्रमुपसृत्य।

कराजकार्यकुशलेन किमपि तादृशमारभ्यते येनाहं जीवलोकान्निर्वासयिष्ये। ४६ शान्तं पापं शान्तं पापम्। चाणक्येन विषकन्याया नामापि न श्रुतम्।

लाआ for लाय S·; लाय omitted M·R·J·F·B·N·G·. अकज्ज for कज्ज J·F·B·N·G·. आलम्भीअदि S·B·E·N·. अहगे for हगे F·. णिक्कासिज्जेमि A·P·M·R·J·F·, णिक्कासि(sic· सी) आमि B·N·, णिक्कासिअदि (sic· सीआमि) G·, णिक्कासीहो (sic· हे) S·. ४५ भदन्त omitted G·. प्रतिश्रुत्य M·R·F·. संप्रदान omitted in all but B·E·. अयच्छता for अनिच्छता A·P·M·R·J·F·N·, अभिगच्छता G·. न राक्षसेन omitted E·. ४६ शन्तं पावं read once in R·J·F·S·B·N·G·, and omitted altogether in E·. सावका added before चाणक्केण S·B·E·N·G·. चाणक्को B·N·, चाणक्कस्स S·E·G·. कण्णा for कञ्ञाए G·. जाणादि for शुदं B·, विदिदं S·E· तेण जव्व दुट्ठबुद्धिणा लक्खसेण एसा अकज्जसिद्धी किदा। added at the end in B·N·. ४७ भदन्त omitted P·M·R·J·G·. कष्टमिदम् added after भदन्त B·N·. इयं added before मुद्रा S·B·E·N·. दीयते omitted S·; प्रदीयते for it P·. संश्रावयाव: B·N·, श्रावयाम: P·. ४८ सास्रम् omitted in all but E·. उपसृत्य omitted S·B·N·G·

श्रुतं सखे श्रवणविदारणं वचः
सुहृन्मुखाद्रिपुमधिकृत्य भाषितम्।
पितुर्वधव्यसनमिदं हि येन मे
चिरादपि द्विगुणमिहाद्य वर्धते ॥ ६ ॥

४९ क्षप० स्वगतम्। अये श्रुतं मलयकेतुहतकेन। हन्त कृतार्थोऽस्मि। निष्क्रान्तः।

५० मल० प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा। राक्षस राक्षस युक्तमिदम्।

मित्रं ममायमिति निर्वृतचित्तवृत्ति
विश्रम्भतस्त्वयि निवेशितसर्वकार्यम्।
तातं निपात्य सह बन्धुजनाश्रुतोयै-
रन्वर्थतोऽपि ननु राक्षस राक्षसोऽसि ॥ ७ ॥

५१ भागु० स्वगतम्। रक्षणीया राक्षसस्य प्राणा इत्यार्यादेशः। भवतु। एवं तावत्। प्रकाशम्। कुमार अलमावेगेन। आसनस्थं कुमारं किंचिद्विज्ञापयितुमिच्छामि।

५२ मल० उपविश्य। सखे किमसि वक्तुकामः।

५३ भागु०। कुमार इह खल्वर्थशास्त्रव्यवहारिणामर्थवशादरिमित्रो-

इदम् for रिपुम् P. इव for इह in all but G. वर्तते for वर्धते S.G. ४९ अये गुदं मलयकेतुहदएण E.N.G. हन्त omitted A.P.B.N. चाणक्यः for अस्मि E., कौटिल्यः S. ५० राक्षस once R.F.B.N. इदम् omitted R.G.; युक्तम् for it A.P.M.J.F. इदम् for अयम् in all but B.N. वृत्तिः B.E. कार्यः B.E. जनाक्षि for जनाश्रु S.B.E. ५१ राक्षसप्राणाः F. कुमार twice S. आसनसंस्थं E. ५२ एहि added in the beginning F. वक्तुमनाः S. ५३ अत्र(sic अर्थशास्त्र)व्यवहारा(sic रि)णाम् R.

दासीनव्यवस्था न लौकिकानामिव स्वेच्छावशात् । यतस्तस्मिन् काले सर्वार्थसिद्धिं राजानमिच्छतो राक्षसस्य चन्द्रगुप्तादपि बलीयस्तया सुगृहीतनामा देवः पर्वतेश्वर एवार्थपरिपन्थी महानरातिरासीत् । तस्मिंश्च राक्षसेनेदमनुष्ठितमिति नातिदोषमिवात्र पश्यामि । पश्यतु कुमारः ।

मित्राणि शत्रुत्वमिवानयन्ती मित्रत्वमप्यर्थवशाच्च शत्रून् ।
नीतिर्नयत्यस्मृतपूर्ववृत्तं जन्मान्तरं जीवित एव पुंसः ॥ ८ ॥

तदत्र वस्तुनि नोपालम्भनीयो राक्षसः । आ नन्दराज्यलाभादुपग्राह्यश्च । परतस्तस्य परिग्रहे वा परित्यागे वा कुमारः प्रमाणम् ।

५४ मल० । एवम् । सखे सम्यग् दृष्टवानसि । यतोऽमात्यवधे प्रकृतिक्षोभः स्यात् । एवं च संदिग्धो विजयः स्यात् ।

